Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ सुश्लिष्टपरिशिष्ट ॥

॥ ओंनमोगणेशाय ॥ प्रत्येकप्रकरणवर्त्तिनोविचाराव्यु
त्पत्त्यादिहनसुदेतथाभवन्ति । कल्पाणोविलिखतितद्वि
धाययत्नात्सुश्लिष्टंकल्पपरिशिष्टवाक्यजातम् ॥ स्वामिन्
सोममैतन्नहिनहिविदितंशीतरश्मेःसवक्रः स्वर्गंगावेद
भोभुजगपरिदृढः शोभनेसद्विजिह्वः । स्वीयाङ्गस्पर्शपू
नादिहभगवतैवोच्यतामित्यकस्मादर्थिप्रत्यर्थिभावः शिव
शिवयोः श्रेयसेनःसदास्तु ॥ १ ॥ अधीत्यसर्वतन्त्रा
निबन्धानवलोक्यच । श्रीकेशवेनविदुषा परिशिष्टमि
होच्यते ॥ २ ॥ तत्रादौव्यवहारनिर्णयः ॥ हारीतः ॥
प्राङ्न्यायकारणोक्तौतुप्रत्यर्थीनिर्दिशेत्क्रियाम् । मिथ्यो
क्तौपूर्ववादीतुप्रतिपत्तौनसाभवेत् ॥ अत्रक्रियापदंप्राङ्न्या
यकारणयोर्य्यदिदर्थंकमन्वेतितावदर्थकमेवमिथ्योत्तरेप्य
नुषज्यते तेनमिथ्योत्तरेऽर्थिनएवादृष्टमपिप्रमाणंअतएवो
पलक्षणमपिसङ्गच्छति इतिभ्रान्तोसि ॥ श्रूयमाणशब्देनपुन
रन्वयमानमनुषङ्गोलाघवान्नतुर्थावैषम्यसहितो गौरवात्
अतएवनकश्चिदभियोक्तारंपुनर्हि व्यनियोजयेत् अभियुक्ता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यदातव्यं दिव्यं दिव्यविशारदैरितिया ज्ञवल्क्य नदिव्यप्रा शौपूर्वोक्तेनाभियोक्तुस्तन्निषेधेनार्थतोऽभियोजकस्यतद्विधा वुत्तरोक्तेनतन्नियमनात् सिद्धेसत्यारंभस्य नियमार्थत्वा त्। प्रत्यर्थिनः प्राप्तित्वे सन्दिग्धानत्वेवा कालगर्भार्यां प्रति ज्ञायां बरकजातस्याज्ञानरूपोत्तरप्रतिरूपके तच्छून्यस्या र्थिनएवानन्यगतिकत्वात् छलस्यावश्यनिरस्यत्वात्। शौ चनिश्चययोस्तौल्येमेच्छस्यद्वयोरन्यतरः कुर्यादितरोवर्त्त येच्छिरइतियाज्ञवल्क्यवचनात्। शौचनिश्चययोरिच्छाया स्ततौलेप्रत्यर्थिनएवनकश्चिदभियोक्तारमित्यादि वचनात् नचोभयसङ्कोचेगौरवादवश्यसंकोचप्राप्ताञ्जनियमएवसं कोस्तुअनुपपत्तेःस्वनिर्वाहकसाचविषयकत्वे ननियमापे याक्रियापदसंकोचस्यान्याय्यत्वादितिदिक्॥ उपलक्षणा मेतत्प एतयंबनेयमिति नकिञ्चिदेतत् सचायंव्यवहार स्तुःपात्चाहवृहस्पतिः पूर्व्वपक्षआद्यपादोद्वितीय श्चोत्त रोमतःक्रियापादस्तथाचान्यश्चतुर्थोनिर्णयः स्मृतःतथामि योक्तोसचतुःपादःप्रत्यवस्कन्दनेतथाप्राङ्न्यायेसतुविज्ञेयो द्विपात्संप्रतिपत्तिषुचतुष्पादितिसम्यग्भाषेत्तरसतीतिवि शेषणीयम् तेनयत्रभाषोत्तरानन्तरार्थिवचनं निर्णयस्त्वे तिपादद्वयमेवयत्रोत्तरमाभासरूपम्तत्रभाषाप्रत्यर्थिवचननि र्णयाद्इतिपादत्रयमेवेति। नचतर्हिसंप्रतिपत्तावपिभाषोत्त रनिर्णयाद्इतिपादत्रयमेवेतिवाच्यम्उत्तरवादिनैवभाषार्थ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

स्याङ्गीकृतत्वेननिर्णेतव्याभावात् स्ववचनेनैवतस्यपराजि
तत्वात् निर्णयकरणरूपतृतीयप्रहरस्येत्तचाभावात् तस्मा
त्सुष्ठूक्तम् द्विपात्स्य प्रतिपत्तिस्त्विति ॥ तत्रपूर्वं पक्षोभाषा
पादः सचार्थिवाच्यः अर्थित्वञ्चाधिक पीडावशात् सचद्र
व्यापचाराद्वा प्रारिप्सितकार्य्यप्रसङ्गाद्वा नतुप्रथमंनिवेद
नमात्रेण तदाहव्यासः यस्यचास्त्यधिका पीडाकार्य्यंवाप्य
धिकंभवेत् तस्यार्थिभावोदातव्योनयः पूर्वंनिवेदयेत् बृह
स्पतिः प्रतिज्ञादोषनिर्म्मुक्तम् साध्यंसत्कारणान्वितम् नि
श्चितंलोकसिद्धञ्चपक्षं पक्षविदोविदुः अल्पाक्षरः प्रभूता
र्थोनिःसन्दिग्धोनिराकुलः विरोधिकारणैर्म्मुक्तोविरोधि
प्रतिषेधकः यदात्वेवंविधःपक्षःकल्पितःपूर्ववादिनादद्यात्
तत्पक्षसम्बद्धं प्रतिवादीतदोत्तरम् साध्यंसाध्यस्यसिद्ध्यर्थं
स्यप्रत्याय्यधर्म्मविशिष्टस्यधर्म्मिणोवचनंपक्षं विदुस्तेनक्षम
तस्यवचनंपक्षं विदुरित्यर्थः अतस्त्वं मह्यं हेम्नांशतस्यधार
यः मत्तऋणत्वेन गृहीततावद्देयकत्वादिति भाषाशरीरं
सिद्ध्यतीति अत्रदेहीत्यर्थिताभिव्यञ्जकमाह नतुभाषा न्तरं
तमित्यवधेयम् एवंनिर्द्दोषायांभाषायां सत्यां ज्ञाततदर्थे
नो[illegible]रंदेयम् तदाहबृहस्पतिः विनिश्चितेपूर्वपक्षे ग्राह्याग्रा
ह्यविशोधितेप्रतिज्ञातेस्थिरीभूतेलेखयेदुत्तरन्ततः नारदः
पक्षस्यव्यापकं सारमसंदिग्धमनाकुलम् अव्याख्यागम्य
मित्येतदुत्तरन्तद्विदोविदुः पक्षस्यव्यापकंभाषितहेतोरा

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च्छादकम् यद्यपिसंप्रतिपत्तिरज्ञानादिकं चोत्तरं नभाषि
तहेत्वाच्छादकम् तथापि तदभिसन्धिनाप्रयुक्तमेवेतिद्रष्ट
व्यम् नचैवमुत्तराभासातिव्याप्तिः विभाजकोपाध्यवच्छि
न्नत्वेसतीतिविशेषणात् अतएवउत्तीर्य्यतेऽनस्तीर्य्यतेप्रकृता
भियोगोऽनेनेत्युत्तरमिति नव्यास्तु पक्षस्यप्रतिज्ञातस्यबा
ध्यमानत्वादिव्यापकं साधकमित्याहुः पक्षस्यबाध्यमानत्वे
साध्येपक्षीकृतस्यव्यापकमभिव्यापकंतथाचाऽर्थमनागृहीत
मर्थज्ञपरिशोधितमित्यपिमिथ्याकारणघटितमुत्तरमप
क्षाभिव्यापकत्वात्संगृह्यतएवेत्यन्ये तदेवार्थचातुर्विध्येन
विभज्यतेकात्यायनः सत्यंमिथ्योत्तरञ्चैवप्रत्यवस्कन्दनन्त
थापूर्वंन्यायविधिस्त्वेवउत्तरंस्याच्चतुर्विधम् व्यासः साध्यस्य
सत्यवचनंप्रतिपत्तिरुदाहृताकारणंस्यादवस्कन्दोमिथ्या
स्यात्साध्यनिह्नुतिः साध्यस्यभाषितस्यहेतुसाधनस्यकण्ठ
तोऽर्थतोवानिह्नवोमिथ्योत्तरम् केवलसाधननिह्नवस्तुसंप्र
तिपत्तिभिन्नेष्वेषुत्रिष्वप्युत्तरेषुसमानइतिसम्प्रतिपत्तावुत्त
रेसिद्धसाधनमुखेनपक्षताविघटनद्वाराऽऽश्रयासिद्धिर्न्नामहे
त्वाभासः स्थापनादोषइतिनचवंभाषितुरेवपराजयः विचार
स्यास्यतत्वनिर्णयार्थत्वात् तत्रचसिद्धसाधनस्यादोषत्वा
दिति मिथ्योत्तरन्तु तत्रकात्यायनः अभियुक्तोभियोगस्य
यदिकुर्य्यादपह्नवम् मिथ्यातत्तुविजानीयादुत्तरं व्यवहार
तः अभियोगोऽभियोगहेतुगृहीतत्वादिः तेनहेत्वपलापएव

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मिथ्योत्तरमितिसारम् व्यास: मिथ्यैतन्नाभिजानामि ममतत्रसंनिधि: अजातश्चास्मितत्काले इतिमिथ्याचतुर्विधा अत्रमिथ्यैतदितिकण्ठतोनजानामीत्यादिकं चिकमर्थतोपप्लव: अत्रचसहेतुसाध्यापह्नवोक्तिरुत्तरान्तरव्यवच्छेदद्वारा मिथ्योत्तरलक्षणोपयुक्ताहेतूपह्नवएवस्वरूपासिद्धिर्नामस्थापनादोषइतिविवेक्तव्यम् तत्रगृहीततुात्त्वंधारयसीतिभाषायांमयानगृहीतमितिशब्दत: कालविशेषगर्भायांतस्यांतदान जातइत्यर्थत: देशकालविशेष गर्भायांतुतस्यांतदातत्रनाहमासमित्यर्थत: देशादिसत्यांतच्छून्यायां वातस्यांनजानामीत्यर्थतएव योग्याभावे नार्थतस्तदग्रहणप्रतिपादनात् अत्रचचरमचयं ग्रहणास्कन्दनमुखेनग्रहणाभावप्रतिपादकंसापदेशमिथ्योत्तरमित्युच्यते आद्यन्तु मिथ्योत्तरमात्रंनजामीतितुसापदेशमिथ्योत्तरमभि मानमात्रात् यत्तुपिचादि गृहीततुभाषायांतद्ग्रहणे धिकरणत्वेनाभिमतकालापेक्षयाचरमजातस्यतत्तुत्रसानजानामीत्युत्तरम् तदुत्तरप्रतिरूपकम् अर्थतोपिस्थापितहेत्वपह्नवासंभवात् नचैतदुत्तराभावादेवतत्रस्थापकस्यजयइतिवाच्यम् धर्म्मव्यवहारेकुलस्यावश्यनिरसनत्वेनतत्रस्थापकेनग्रहणस्याप्राप्तस्यचावश्यप्रमापणीय त्वादिति कारणोत्तरञ्चापरम् कारणंस्थापकसाध्यस्यधार्य्यमाणत्वस्यध्वंसकारणम् निर्य्यातनादि तद्रूपम् अतएवमिथ्योत्तरादस्यभे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

दः तद्धि धार्य्यमाणत्वस्याभावप्रयोजकम् ग्रहणरूपम् न
तु ध्वंसकं कदाप्यवधारितत्वात् अतएवप्राङ्न्यायादस्यभेदः
प्राङ्न्यायोहि धार्य्यमाणत्वसामान्याभावज्ञापकइति नचै
वंतयोरेवसांकर्य्यं स्यात् मिथ्योत्तरेगृहीतत्वाभावप्रयु
क्तसामान्याभावज्ञापकत्वम् प्राङ्न्यायेचपूर्वजितत्वप्रयुक्त
सामान्याभावज्ञापकत्वमतोभेदइति एतच्चत्रिविधम् पूर्व
वाद्युक्तंहि स्वापेक्षयाधिकबलं समबलम् दुर्बलञ्च तत्राद्यं प्र
त्यवस्कन्दनं तदाह बृहस्पतिः अर्थिनाभिहितोयोर्थः प्रत्य
र्थीयदितंतथाप्रपद्यकारणंब्रूयात् प्रत्यवस्कन्दनंहि तत् अ
र्थिनोक्तं गृहीतत्वहेतुं सत्यमित्युपगम्य यदीदानीमधार्य्य
माणत्वेपरिशोधिततत्वादिकं कारणं ब्रूयात् तदातदुत्तरं
प्रत्यवस्कन्दनं भवतीत्यर्थः यथामयात्वत्तः शतंगृहीतमिति
सत्यं किन्तुपरिशोधितमिति इदञ्च त्वं मह्यमिदानीं शत
स्यधारयःमत्तःप्रतिदेयतयागृहीततावद्धन कत्वादिति भा
षायांनिर्य्यातनस्थलेव्यभिचारवारणाया परिशोधितेतिहे
तौविशेषणम् स्थापकस्यहृदिस्थं उक्तमेव वातस्यचासिद्धि
रुत्तरवाक्यार्थः तथाचविशेषणासिद्धिपरमिदं कारणोत्तर
म् स्थापनाहेतौ असिद्धोहेत्वाभासोदोष इति ॥ कात्याय
नः अर्थिनाभिहितोयोर्थः प्रत्यर्थीयदितंतथा प्रपद्यकार
णं ब्रूयादाधर्य्यं भृगुरब्रवीत् आधर्य्यं दुर्बलत्वं पूर्वपक्षस्ये
तिशेषः प्रदोपक्ततस्तु कारणं धार्य्यमाणत्वे कारणं गृही

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्वम् तत्प्रपद्याभ्युपेतएवब्रूयात् परिशोधनादिकमितिशे
ष: इत्येवंक्रमेणयोजनासमर्थादाहुः अपरिशोधितत्वस्था
पनाद्धेतुविशेषणं कण्ठरवेणचोक्तमितिचाहुः केचित्तु अप
द्यस्थापनाद्धेतुंप्रती तएयत्तद्विपरीतवचनम् तत्कारणोत्तर
मितिद्वितीयपरमेवेदंवाक्यमितआहुः तन्नसमहीनवलयोः
कारणोत्तरयोः स्थापना धर्माभावेन एतद्वाक्यस्य तदुभ
याविषयत्वादिति वस्तुतस्तु त्वद्वनंमत्साधारणम् मदविभ
क्तत्वादर्शितत्वादित्यवचनैतदेवंत्वद्विभक्तमदर्शितत्वा दित्यनवल
वत्कारणोत्तरेकण्ठोक्तस्याविभक्तत्वस्यखण्डनात् साधारण
त्वत्वंसस्यचाजननान्नप्राचीनव्याख्या किन्तुप्रपद्याभ्युपेतए
साधितहेतुविशेष्यभागमात्रंकारणमनभियोज्यताप्रयोजकं
रूपंविभक्तत्वनिर्य्यातितत्वादितियत्तूक्तंतद्बलवत्कारणोत्त
रमितिव्याख्याज्यायसीतिसमवलन्तुमदीयेयंभूः क्रमागत
त्वादितिभाषायामिदमेवोत्तरम् अत्रच सत्प्रतिपक्षोनामहे
त्वाभासोदशाविशेषेस्थापनादोषइतिद्रष्टव्यम् दुर्बलन्तुविं
शतिवर्षादारभ्यसमेय साधिविषयोभूः तावत्समयादारभ्यत
त्स्वामिनासव्याहितत्वादितिभाषायांपञ्चवर्षादारभ्यसा
मदीया पञ्चमिदित्येनैवमव्याहितत्वादिति अत्रापि सत्प्रति
पक्षोनामहेत्वाभासःस्थापनादोषइतिद्रष्टव्यम् आधौप्रतिग्रहे
क्रीतिपूर्व्वैवबलवत्तरादितिवचनाद्दुर्बलत्वमितएवसेयं अत्रचवल
वत्तिकारणोत्तरेप्रतिवादिनोऽत्वयोस्तुस्थापकस्यप्रमाणमनु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सन्धेयम् तदुक्तं गुरावभिहिते हेतौ प्रतिवादिक्रिया भवेत् दुर्व
लेत्रादिनः प्रोक्ता तुल्ये पूर्वक्रियैव चेति पूर्वैति पूर्वोत्तरयोः सा
क्षिसाम्ये एवं प्राङ्न्यायोत्तरन्तु अस्मिन्नर्थे मयायं पूर्वं जित इ
त्येवं रूपं यदाह बृहस्पतिः आचारेणावसन्नोपि पुनर्लेखयते य
दि सोभिधेयो जितः पूर्वं प्राङ्न्यायस्तु स उच्यते आचारेण व्यव
हारेण अवसन्नो भङ्गी लेखयते भाषाम् अत्र चोत्तरवादिन एव
क्रियाते नैव पूर्वं जयस्य विभावनीयत्वात् पूर्वलिखितवचनात्
अत्र च त्रसत्पूर्वं हेतुबाधः स्थापनाहेतुदोषाबाधो नाम हेत्वाभा
सो दोष इति द्रष्टव्यम् निर्णीतत्वेन संशयाभावादसिद्धिहेत्वा
भासो हेतुदोष इत्यन्ये कात्यायनः पक्षैकदेशे यत्सत्यमेकदेशे च
कारणम् मिथ्या चैवैकदेशे स्यात् संकरात्तदनुत्तरम् एक
देशे एकस्मिन्नंशे यदुत्तरं सङ्कीर्य्यते तदनुत्तरमित्यर्थः शे
षं एकदेशपदं चानुवाद इति तथाहि शतं धारयास्येव परिशो
धितं वा न गृहीतं वेति संकरात्तदनुत्तरमित्यर्थः यत्तु भिन्न
भिन्नावच्छेदेन कारणादिस्पर्शि तत्सदुत्तरमेवेति अवच्छे
दकभेदेन सांकर्य्यस्यैवाभावात् अत एव हारीतोपि मिथ्योत्त
रं कारणं च स्यातामेकत्र चेदुभे सत्यं चापि सहानेन तत्र ग्राह्यं
किमुत्तरं यत्प्रभूतार्थविषयं यत्र वा स्यात् क्रियाफलं उत्तरं तत्तु
विज्ञेयमसंकीर्णमतोऽन्यथा यदिति प्रभूतार्थविषयकमुत्तरं
समादाय विचार उपक्रमणीयः तुल्यार्थविषयकत्वे तु यत्र
क्रियाया भुक्त्यादेः फलं निर्णयस्य शीघ्रं भवति तदंशस्यैव प्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

माणंग्राह्यं तदुक्तं यच्चवास्याक्रियाफलमिति इदंचोत्तर
मसंकीर्णमेव यत्तु ततोऽन्यथातत्संकीर्णंहेयमितिपुरराष्ट्रवि
रुद्धश्चयस्वराजविवर्जित:अनेकपदसंकीर्ण: पूर्वपक्षोनसिध्य
तिअन्यथा श्रुतवाक्य वलाद नेकव्यवहार विषयमे तदि
तिकेचित्तन्नावक्तप्रतिज्ञंयत् कार्य्यं व्यवहारेषुनिश्चितंका
मंतदपिगृह्णीयाद्राजाततुवभुत्सयेतिपराहतेः। नचैकस्मि
न्विवादेत्तक्रियासाध्यादिनोर्द्वयो:। नचार्थसिद्धिरुभयोर्न्न
चैकत्रक्रियाद्वयमिति वाक्यैकवाक्यतावलादनेक क्रियाव्य
वहारविषयमेत्त दितिपरेतदपितुच्छं मिथ्योत्तरंकारणञ्च
स्यातामेकत्र चेदुभेसत्यं चापिसहा नेनतत्रग्राह्यंकिमुत्तरं
यत्प्रभूतार्थविषयं यच्चवास्यात्क्रियाफलमित्यादिविरोधा
त्तस्मादेकावच्छेदेनयत्रविरुद्धाक्षोपस्तद्विषयमेतदितितत्तु
तदयंवक्तु लार्थ: शताभियोगेसुद्रा:पं चाशत्परिशोधिता:
पंचविंशतिर्द्धार्य्यन्ते पंचविंशतिस्तु गृहीताएवनेत्युत्तरेका
रणभागश्चादौविचार्य्य: पश्चादपह्नुत: पंचविंशतिरपि अ
र्थिप्रमाणेन प्रत्यर्थिप्रमाणेनवावोध्या: नचैवंसतिएतद्वचन
विरोधएव न्यायवचनानामुत्सर्गतोन्यायमूलकत्वे नैवलघु
र्थंप्रमाण परिग्रहावाधकत्वात् सतिनिर्णयप्रमाणेचतदंशो
पिकारणारम्भकसं शयस्यावश्यनिरस्यत्वात्नचयत्प्रभूता
र्थविषयमित्यादिवचनवला देनलघुर्थं प्रमाणस्याम्नाता
यासतेयततस्मृतीनां श्रुतिमूलतापत्ते: नचैतदिष्टमेव अस

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

स्रवन्मूलान्तरत्वस्तत्प्रयोजकत्वात् यूपहस्त्यादिस्मृती
तथासिद्धोल्लनात् आसांचन्यायमूलकत्वस्यैवसम्भवात् मि
थ्याकारणसम्बन्धेग्राह्यं कारणमुत्तरमित्यादिकमपिवच
नमेवलेयमितितस्मात्प्रकरणारम्भकसंशयोनुवर्त्तते निर्णा
यकप्रमाणं चलभ्यते तावद्विचारणीयमितिपरमार्थः। न
नुनचैकस्मिन्विवादेतुक्रियास्याद्वादिनोर्द्वयोः नचार्थसिद्धि
रुभयोर्न चैकस्मिन्क्रियाद्वयमितिकात्यायनवाक्यएकस्यवा
दिनोर्द्वयोर्न क्रियाद्वयोद्वयोश्चनजयइत्यर्थः तथाचययोस्त्वा
संकीर्णस्योत्तरस्यग्राह्यत्वे तत्सर्वंप्रसज्येतेतिचेन्न नह्यीह
शोन्यायएवनभवतिवक्तृणोदर्शनानचेदृशमुत्तरन्नदेयं यथा
व्यवस्थितोत्तरदा नस्यनिषेधुमशक्यत्वात्तस्मादेकावच्छे
देनैवप्रकृतवचन.थंत्वादितिअथसाक्षिणः। तत्रयद्यपिसा
क्षादृष्टेरिसंज्ञायामितिपाणिनीयंसूत्रमव्यापकन्तथापिस
मक्षदर्शनात्साक्षीश्रवणाच्चैवसिध्यतीतिमनुवचनात्प्रमाता
र्थएवसाक्षीभवतीति। तत्रापिवचनाद्दोषतोभेदात्स्वयमुक्ति
स्मृतान्तरइति पश्चुदासेस्मृतान्तरोऽर्थिनिप्रेतेमुमूर्षुश्रावि
ताश्चेति। तेनमुमूर्षुणाधनिकेनयःसाक्षीस्वदायादेभ्योऽयमि
दंधनंमह्यंधारयत्ययन्नुजानातीतिश्रावितःस्मृतान्तरोपि
साक्षीभवत्येव। उभयोरप्युपयुक्ताशेषाभिज्ञानायाःसत्वा
त् किन्तुयोऽर्थः श्रावयितव्यःसान्तस्मिन्नसतिचार्थिनिक
तद्धृत्तरसाक्षित्वमित्यसाक्षीस्मृतान्तरः। अर्थिनासाक्षि

र्थियोर्यो विवादविषयीभूतः श्रावयितव्यस्तमिममर्थं जा
नीहितस्मिन् श्रावयितव्येऽर्थे श्रावयितव्यर्थिनि असतिस्त्वेति
अस्तुतत्वादर्थविशेषसाकाङ्क्षार्थे, साक्षीसाक्ष्यं वदत्विति हेतो
र्वृत्तान्तरोनसाक्षीतिनै तदुक्तम्भवति यस्मिन्नर्थेऽर्थि निय
तेऽर्थिपुत्रस्य नसंख्यादिस्थानं विशिष्यास्तितत्रसाक्षिणस्तस्य
त्वेपिनसाक्षित्वंसविशेषमनुपन्यासात् सामान्योपन्यस्त
स्यापितस्य साक्षिणोपिनसंख्यादौ विशेषेसाक्षित्वम्
स्वयमुक्तित्वापत्तेः तस्यचस्वयमुक्तिर्मृतान्तरदूत्यादिना
पर्युदस्तत्वात् किन्तूभयोरर्थिसाक्षिणोरप्रयुक्ताशेषाभि
ज्ञातावामिवमृतान्तरः साक्षीभवति अतएवयः साक्षीतु
दिशंगच्छन्मुमूर्षुर्वायथाश्रुतम् अन्यंसंश्रावयेत्तत्तु विद्या
दुत्तरसाक्षिणमितत्र मुमूर्षुश्रावितादितत्रचोभयत्रापिमृ
तान्तरः साक्षीभवतेत्रवेति दिक् वृहस्पतिः नवसप्तपं
चवास्युश्चत्वारस्त्रयएववा उभौतुश्रोत्रियौग्राह्यौनैकः स्या
त्तुकदाचन एकस्तुश्रोत्रियो पिनग्राह्यत्र इत्यर्थः शं
खोप्याह एकस्साक्षी सर्वथानग्राह्यः गुणवतोप्यगृह्
णमितिसर्वथा पदस्यार्थः एतच्चोभयाननुमतविषयम्
उभयानुमतस्त्वे कोपिग्राह्यएव अतएवयाज्ञवल्क्यः
उभयानुमत स्साक्षीभवेदेकोपिधर्मविदिति धर्मविदिति
सकलसाक्षिगुणोपलक्षणम् नारदोप्याह उभयानुम
तोयस्स्याद्द्वयोर्विवदमानयोर्भवत्येकोपि साक्षित्वम

ष्टव्यः स्यात्तुसंसदिउभयानुमतइतिउभयानुमतिविषय
इत्यर्थः नतूभयानुमतियोग्य उपलक्षणतापत्तेः योग्यता
लक्षणकत्वे चानुमतपदमनर्थकमेवस्यात् धर्म्मवित्सदादेवा
नुमतियोग्यस्यप्राप्तत्वादिति एकस्य साक्षित्वे अभिमत गु
णसंपन्नउभयानुमतोमिलितेतन्नम् आहितः पूत आहवनी
योभवतीतिवत् यत्तु भिन्न एवतन्त्रं तेननिर्गुणस्यापिसदोष
स्याप्युभयानुमतस्यैकस्य साक्षित्वमेवेतितन्न॥ एवमर्थभे
दाद्वाक्यभेदापत्तेरिति निर्दिष्टे व्यर्थं जातेषु
साक्षीचेत्साक्ष्यमागतः । नब्रूयादक्षरसमं नतंनिगदितं
भवेदिति अत्रत्वस्यहृदयमिदानीं शतस्यधारयः । एषचत
द्वेदेत्युद्दिष्टः । साक्षीयच्छ्रवणंनिगदतिनसंख्यांतच्छ्रवणांशे
निगदनिरस्तसंशयम पश्चायानिर्णीतिसंख्यांशेवादिशपथेन
निर्णय इतिकेचित्तन्न । प्रमाणद्वयप्रवृत्तिगौरवापत्तेः नचै
कस्यक्रियाद्वयमित्यस्य विरोधापत्तेश्च । किन्तूभयत्रापि
छ्रवणांशेसंख्यांशेचवादिशपथेनैवनिर्णयोलाघवादितिदिक्
न्यूनमभ्यधिकंवापिप्रब्रूयुर्य्यत्साक्षिणः तदप्यनुक्तंविज्ञेय
मेषसाक्ष्यविधिः स्मृतः अत्रेदमाकूतम् । वादिनाशतमा
त्रिभ्रेनतावदधिकाभिधानंसाक्षिणःप्रमाणावगतसार्धशत
ग्रहणमूलमितिवक्तुं शक्यते । आदराभ्यासातिशयोहि
स्मृतिमूलसंस्काराधायकः । तेनार्थीनस्मरति साक्षीच
स्मरत्यधिकमितिनोपपन्नं तेनान्यथानुपपत्त्येदमवगम्यते

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यद्वयं ग्रहणस्वरूपं जानात्येव संख्यादौ भ्रान्तइति मूलभूतवा
द्विवाक्यविरोधाद्व सीयते नहि भ्रान्तिमूलमभिधानम
न्यतरप्रज्ञासत्यत्वेप्रमाणम् ननु भवत्वेवमधिकाभि धाने
न्यूनाभिधानेतु कथमुत्तरवादिक थितशतग्रह णस्य साक्ष्य
भिहितपंचाशद्ग्रहणेपि सत्यत्वात्कथं नतस्य विजयइति श
चोच्यते । नाचोत्तरवादिनः शतसंख्यारूपेतात्पर्य्यं तथास
तिविशेषनिषेध प्रतिज्ञायाः शेषाभ्यनुज्ञाफल कत्वादिति
न्यायेनोनशतसंख्यावच्छिन्न ग्रहणस्वीकारप्रसङ्गात् कि
न्तु शतंमयानगृहीतमित्यस्यायमर्थो यत्तस्मिन्देशादौमया
स्यनकिमपिगृहीतमिति पंचाशद्ग्रहणाभिधानेपिनान्य
तरप्रतिज्ञासत्यत्वमिति साधूक्तम् तदप्यनुक्तमिति सर्वेष
चार्थसंशयप्रशमनार्थं द्वित्र्यादिनाक्रियान्तरेणनिर्णयइति
उक्तस्यापि संदेहानपाक रणेनफलतोऽनुक्तत्वादतोनैताव
ताजयपराजयावधारणम् किन्तु क्रियान्तरेणेतिवाक्यार्थः
तदुक्तम् नतंनिगदितं भवेदिति भवदेवादयः वस्तुतस्तु सा
क्षिणासंख्यानभिधानेऽधिकाभिधानेचसकलप्रतिज्ञायाम
वक्रियान्तरेणनिर्णयः संख्यायां भ्रान्तस्य तस्य द्वयेपि भ्रम
संभवात् तन्निगदस्यैवानुपादेयत्वात् न्यूनाभिधानेपंचाश
द्ग्रहणस्य भ्रान्त्यादि मूलकत्वेनशंकावीजाभावेनतदति
रिक्ताभिधानेतु विस्मरणस्यापि शंकितत्वाच्छलादेरवस्यनि
रसनीयत्वात्पंचाशद्ग्रहणनिगदस्यादीयतएव विरोधाद्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

भावात् कथंतर्हिसाक्षिणान्तरसम्भाव्यनिरूपणं संवादायेति
ब्रूमः नचावाच्यमनुक्तत्वातिदेशान्मानान्तरानुसरणन्तथा हि
अवधारणैववादत्तदुत्तरस्यानाद्यो वैयर्थ्यात् नान्त्योऽपिप्रमाण
फलकन्तथेत्यादि पराहतत्वात् तस्मात् साक्ष्यभिहिता
तिरिक्तेप्रमाणान्तरानुसरणमित्येवरमणीयम् यत्तु सा
क्ष्यभिहितेप्यप्रामाण्यशंकाजायते तत्रोभयत्रापिप्रमाणान्त
रानुसरणमेवेति दिक् यत्तु अनेकार्थाभियुक्तेन सर्वार्थव्यप
लापिनाविभावितैकदेशेनदेयन्तदभियुज्यते इति तदनेका
र्थाभियोगेतुयावत् संसाधयेद्धनीसाक्षिभिस्तावदेवासौलभ
तेसाधितन्धनमितिवचनविरोधेनव्याप्त्यैकदेशविषयमथवा
सपणश्चेद्विवादइति पणविषयमित्यग्रे स्फुटीभविष्यति ।
साध्यांशेनिगदिते साक्षिभिः सकलम्भवेत् स्त्रीसङ्गसाहसे
चौर्य्ये यत्साध्यं परिकीर्तितम् एवंदृष्टः साक्षीयदाप्रतिज्ञा
तार्थंनब्रूतेकिन्तुतद्व्याप्यं तदापितन्निगादकत्वादिनोक्त
यएवतदभिधानोपस्थापितानुमानेनवादिप्रतिज्ञातार्थस्य
प्रमितत्वात् नचयस्योचुः साक्षिणः सत्यांप्रतिज्ञामितिस्मृ
तेः साक्षिणा तदनभिधानान्नतथेतिवाच्यम् एतत्स्मृते
न्यायमूलकत्वात् साक्षिपदस्यप्रमाणोपलक्षकतयाकेना
पिप्रमाणेनयत्प्रतिज्ञातोऽर्थः प्रमितः सजयीभवेदित्येवंप
रत्वात् अथयस्याशेषंप्रतिज्ञातं साक्षिभिः परिवर्णितम्
सजयीस्यादन्यथातुसाध्यार्थन्नसमापयेदित्यत्रान्यथाशब्दे

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नाशेषप्रतिज्ञातार्थप्रतिपादनाभावोऽभिधीयतेसचाभिधा
नेनानपेक्षिताभिधानेनवोभयथापिसम्भवति तत्रान्त्यस्यतु
धीभवतिनून्नाभिधाने नाधिकाभिधाने नाज्ञानाभिधानेन
विरुद्धपक्षाभिधानेनवाऽत्रसर्वत्रप्रकारपञ्चकेपिसाध्यासि
द्धिरिष्टैवकिन्त्वनभिधानेऽज्ञानाभिधाने वाद्वयोरेवनिर्ण
यःएषामन्यतमाभावेदिव्यानत्राऽऽङ्गविशेषणमित्यादेर्न्नतुता
वतैवभङ्गोव्यवह्रियते । येतुतावतैवतत्रोभयत्रापिभङ्गइति
वदन्तिभ्रान्ताः विचारारम्भकसंशयस्यानिवृत्तेः अन
भिधानस्याज्ञानाभिधानस्यवाजयभङ्गयोरविशेषात् त
त्वनिर्णयस्यावश्यकर्त्तव्यत्वाच्च किञ्चनह्यनुभवः संस्का
रमाधत्तएव नापिसंस्कारवद्धृष्यतएवेतिचनियमोऽव्य
भिचारात् । न्यूनाभिधानेऽधिकाभिधानेवाप्रमाणा
न्तरानुसरणमेव न्यूनमप्यधिकंवापिप्रब्रूयुर्यंचसाक्षिण
इत्यादिवचनादितिसुव्यक्तमेव तस्माद्विरुद्धपक्षाभिधाने
परम्भङ्गोतएवयस्योचुः साक्षिणः सत्यांप्रतिज्ञांसज
योभवेत् अन्यथावादिनोयस्यध्रुवंतस्यपराजयइतिकात्य
तएवविष्णुरप्याह । तत्रान्यथावादिनइतिप्रतिज्ञातार्थस्या
सत्यत्ववादिनइत्येवार्थः पूर्वार्धेप्रतिज्ञासत्यत्वस्यैवोपस्थि
तत्वेनान्यथापदे नतद्व्यतिरिक्तस्यतदसत्यत्वस्यैवाभिधाना
न्तथैवव्युत्पत्तेः यत्तुवादिनइत्यस्यान्यथापदस्यचपरस्प
रंनान्वयः किन्तु विभिद्यैव तेनवस्तुवादिनः साक्षिणो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्यथावदन्तितस्यपराजय इत्येवार्थइतितन्नार्थं पौनरुक्त्या पत्तेः अध्याहारगौरवादध्याहारलक्षणवाक्य भेदापत्ते श्चेतिदिक् । अतसाक्षीचष्टष्टोयत्राहमिममर्थमश्रौषमि त्याह तत्रनार्थसिद्धिः शब्दार्थयोर्व्याप्त्यभावात् किन्तु प्रत्यक्षादिवशब्दादप्यर्थं यत्रावधारयति तत्राप्रामाण्यशं कानालिङ्गितशब्देनयत्प्रमितार्थमेवनिगदति तत्रैवार्थ सिद्धिः तस्यकलंकेतुनसाक्षीनवातन्निगदश्चादेयः प्रमि तार्थत्वाभावादितिदिक् वङ्गत्वम्परिगृह्णीयात्साक्षिद्वैधे नराधिपः समेषु चगुणोत्कृष्टानगुणद्वैधेद्विजोत्तमान् साक्षिविप्रतिपत्तौचप्रमाणंवहवोमताः तत्साम्ये शुचयो ग्राह्यास्तत्साम्ये स्मृतिमन्तरा: अत्रद्वैधं साक्ष्यन्त रोक्त व्यतिरेकाभिधायित्वम् तेननज्ञानामीतन्नभिधाने पिनद्वै धंतस्यज्ञानाभावपरत्वेनञ्चेयास्यशीत् विप्रतिपत्तिरपि द्वयोः परस्पराभावाभावएव एवञ्चैतद्वचनाभ्या मुभयो पस्थापितानामन्यतरोपस्थापिता नाम्नापरस्य रविरुद्धम निगदतांवहूनांगुणिनांवाशुचीनांवानिगदःतव्यवस्थेति त त्वम् उक्तोपिसाक्षिणः साद्वयेयद्यन्ये गुणवत्तराः द्विगुणावान्यथाब्रूयुः कूटाःस्युःपूर्वसाक्षिणःकूटाः अना देयनिगदाः एवञ्चपूर्वसाक्षिणाशपथेकृतेपित्तनोत्तरसा क्षिशपथेनैवसप्ताहाभ्यन्तरेनिर्णयइतिद्रष्टव्यम् । ननु क्रियांवलवतींत्यक्तुादुर्वलाय्यं: समाश्रयेत् सजयेऽवष्ट

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तैरभ्यैः पुनस्तान्नाद्रियात् क्रियामितत्रादिविरोधात् क
थंद्विगुणसाक्ष्यादिग्रहणंघटतइतिचेत एतद्वाक्यस्यसभ्योऽ
वधृतेसभ्यैरितिसूत्रोर्ज्जं यावधारणानन्तरविषयत्वात् उ
क्तोऽपिसाक्षिभिः साक्ष्य एतद्वचनस्य सामान्यमुखस्य ज
यानवधारणविषयत्वादतएवतत्रकृत्वे तिश्रवणादनुपन्यस्तं
बलवत् प्रमाणंदुर्बलप्रमाणप्रवृत्त्युत्तरमुपन्यस्तमपिसभा
इभ्यांन्तरेसंशयदशायांव्यापार्य्यमेव बाधकाभावात् अत
एवसभादिनाभ्यन्तरेबलवत्प्रमाणान्तरस्य ग्रहणंतदुपरि
तद्ग्रहणमितिचण्डेश्वरेणसिद्धवल्लिखितमितिदिक् नि
र्णीतव्यवहाराणांप्रमाणमफलंभवेल्लिखितं साक्षिणोभु
क्तिः पूर्वमावेदितंनचेत् पूर्वमुपन्यस्तंबलवत्प्रमाणंयत् सा
क्ष्यादिकंदूरत्वादिदोषाद्व्यापारयितुमशकितम् विचारकै
णाप्यधिकारत्वभ्रमेणपुरस्कृत्यदुर्बलंप्रमाणमाहृतंतच्चसभाहो
त्तरमपि । स्वल्पेऽर्थेबलवत्प्रमाणंव्यापार्य्यमेव पूर्वमावे
दितन्नचेदिति व्यक्तत्वे तिश्रुतेश्च नचैवंपूर्ववचनविरोधःते
षामुपन्यस्तप्रमाणाविषयत्वात्एतद्वचनस्यचोपन्यस्तप्रमा
णविषयकत्वात् अतश्चसभाह्वानन्तरमपिपुनर्दर्शनंविचार
साधकव्यापारणे बलवत्प्रमाणे अशक्यव्यापारणेतुभ्रमे
णविचारकदोषजमतएवसाक्षिसभ्योपसन्नानां दूषणेदर्श
नंपुनरितिकात्यायनएवमहर्षिणाप्युक्तमितिदिक् अथक्रिया
सदुत्तरेक्रियाद्वैयासाचद्वेधातदाह बृहस्पतिः ॥ द्विप

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कारा क्रिया प्रोक्ता मानुषी दैविकी तथा एकैकानेकधा
भिन्ना मुनिभिस्तत्ववादिभिः साक्षिलेख्यानुमानं च मानु
षी त्रिविधा स्मृता घटाद्या धर्म्मजान्ता च दैविकी नवधा स्मृ
ता अनलरवो भोगस्याप्युपलक्षकः दैविकी च द्वेधा शपथदि
व्यभेदात् तदाह बृहस्पतिः सत्यं वाहनशस्त्राणि गोबी
जरजतानि च देवब्राह्मणपादाश्च पुत्रदारशिरांसि च एते
च शपथाः प्रोक्ताः स्वल्पार्थे सुकरास्तथा साहसेष्वभिशापे
षु दिव्यान्याहुर्विशोधनम् हलायुधेन तु दिव्यशपथयोरभे
द एवोक्तस्तन्नान्दं परिसंख्यानविरोधात् न चोर्थानुरूपाः श
पथाः स्मृताः सत्यघटादय इत्यनेन विरोधः अस्याऽदृष्टसा
ध्योपलक्षकत्वादन्यथोभयोपादानानुपपत्तेः अत्र च क्रिय
योरपि सन्निपाते मानुषी क्रिया ग्राह्या तदाह कात्यायनः
यद्येको मानुषीं ब्रूयादन्यो ब्रूयात्तु दैविकीं मानुषीं तत्र गृह्णी
यान्न तु दैवीं कदाचन ॥ यद्येकदेशव्याप्तापि क्रिया विद्येत मा
नुषी सा ग्राह्या न तु पूर्णापि दैविकी वदतां नृणां एकदेशव्या
प्तापीति स्मृतिः पण विषयस्यार्थान्तरव्याप्तिविषयं वेति
तत्वन् क्रिया न दैविकी प्रोक्ता विद्यमानेषु साक्षिषु लेख्ये स
ति च वादेषु नस्याद्दिव्यं न साक्षिणः अत्र मिथ्योत्तरे मानुषी
क्रियार्थिन एव मिथ्या क्रिया पूर्ववादे कारणे प्रतिवादि
नः प्राङ्न्याय विधिसिद्धौ च जयपत्रं विनिर्दिशेत् मिथ्या
मिथ्योत्तरे सति पूर्ववादिनः क्रिया मानुषी न गृहीतं

मयैतत्रचहि प्रत्यर्थिनः सानभवन्त्यत्रचन्यायोमूलम् अभि
घापेत्वभावस्यैवपरीक्षणे यत्नान्नविरोधः तदभावेदैवी
तदाहयाज्ञवल्क्यः प्रमाणंलिखितंभुक्तिः साक्षिणश्चेति
कीर्त्तितम्एषामन्यतमाभावेदिव्यान्यतमसुच्यते सापिमि
थ्योत्तरे कारणोत्तरेतुप्रत्यर्थिनएवनकश्चिदभियोक्तारंपु
नर्दिव्येनियोजयेत् अभियुक्तायदातव्यंदिव्यंदिव्यविशार
दैःप्राङ्न्यायकारणोक्तौतुप्रत्यर्थीनिर्दिशेत्क्रियाम्मिथ्यो
क्तौपूर्ववादीतुप्रतिपत्तौनसाभवेत्विचारितमेतत् समबल
कारणोत्तरेदुर्बलकारणाभिधानेचपूर्वाक्रियापूर्ववादिनए
वेत्याह। गुरावभिहितेहेतौप्रतिवादिक्रियाभवेत्दुर्बलेवादि
नःप्रोक्तातुल्येपूर्वक्रियैवहि। नारदःद्वयोर्विवदतोरर्थेद्वयोः
सत्सुचसाक्षिषुपूर्ववादीभवेद्यस्यभवेयुस्तस्यसाक्षिणःइदन्तू
भयवादिनांसर्वथासाक्षिसाम्ये अन्यथानिर्देशापत्तेःनचसम
तुं साक्षिणांयत्रदिव्यैस्तत्रविशोधयेदितिकात्यायनविरोधः
अन्यतरवादिनः परस्परविरुद्धंनिगदतांनिगदात्संशया
नुच्छेदेतत्रा दृष्टेननिर्णय इतरस्य तदर्थत्वात्वैषम्ये बृह
स्पतिःसाक्षिद्वैधेप्रभूतास्तुग्राह्याःसाम्येगुणाधिकाःगुणि
द्वैधेक्रियायुक्तास्तत्साम्ये शुणवत्तराः प्राङ्न्यायेपिप्रतिवा
दिनः एवसर्वाक्रिया तदाहव्यासः प्राग्वृत्तवादी विज
यंजयपत्रेणभावयेत् इति । नारदः राज्ञापरिगृहीतेषु
साक्षिष्वेकार्यनिर्णये वचनंयत्रभिद्येततेस्युभेदादसाक्षि

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णः एकस्य भाषार्थस्योत्तरार्थस्य यथा निर्णयार्थं गृहीतानां वचनभेदादसाक्षित्वमित्यर्थः एतच्च साक्षिणां सर्वथा तौल्ये वचनभेदे द्रष्टव्यम् अन्यथा बहुत्वं परिगृह्णीयात् साक्षिद्वैधेन राधिपः समेषु च गुणोत्कृष्टान् गुणिद्वैधे द्विजोत्तमान् इति मनुवचन विरोधापत्तेः न चेदं साक्ष्युपादानपरं परिगृह्णीयात् इति वचनात् मतद्वचनप्रामाण्यपरमिति वाच्यम् परिग्रहानर्थक्यापत्तेः नापि वादिनोरेव साक्षिद्वैधे सतीदम् एकस्यापि वादिनः साक्षिभेदेऽर्थस्यासंकोचेन मागरूकत्वात् याज्ञवल्क्योप्याह । द्वैधे बहूनां वचनं समेषु गुणिनां तथा गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तराः॥ न चेदं वचनं मनुवचनानुरोधात्परिग्रहपरम् । निर्वीजलक्षणापत्तेः अथ साक्षिणां लिखितानां च निर्दिष्टानां च वादिनां तेषामेकोऽन्यथावादी भेदात्सर्वेप्यसाक्षिणः इति कात्यायनवचनेन एकस्याप्यन्यथावादे सर्वेषामसाक्ष्यमुच्यते इति विरोध इति चेन्न त्रयाणां साक्षिणां मध्ये एकस्याप्यन्यथावादेऽपरस्य तच्छून्यस्य सत्प्रतिपक्षिततया तृतीयस्य चैकतया न साक्षितो न निर्णय इत्यत्र कात्यायनतात्पर्यात् सत्प्रतिपक्षितावशिष्टानां त्वनेकत्वे तत एव निर्णय इति याज्ञवल्क्यतात्पर्यादिति कात्यायनवचनस्यास्य समूलभूतन्यायविरोधेनावश्यसंकोच्यत्वादिति ॥ साक्षिशपथाधिकारे ॥ नारदः यस्य दृश्येत सप्ताहादुक्तवाक्यस्य साक्षिणः रोगोऽग्निर्ज्ञातिमरणमृणं दाप्यो दम

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ:रोगास्तुज्वरातीसारविस्फोटकगूढास्थिपरिपीडनम्
नेत्ररुग्गलरोगश्चतथोन्मादश्चजायते शिरोरुग्भुजभङ्गश्चदै
विकावराधयोन्तथाम् इत्येतेग्राह्याः रोगादिकंघोरमिह
ग्राह्यम् अत्रसर्वत्रज्ञातिपदंसपिण्डपरम् तथैवट्टव्यवहा
रात् मा ह्ने सपिण्डतातुकन्यानांसवर्णानांत्रिपूरुषीतेनाद
त्तकन्यानामशौचेशपथेवाएषैवसपिण्डताग्राह्यायातुसपि
ण्डतासप्तमीपर्य्यन्तंसाविवाहादौ अतएव सप्तमीपर्य्यंतं
मातृसपिण्डासाचाविवाह्येतिरत्नाकरादौव्यक्तम्वादिश
पथेकात्यायनः आचतुर्दशकाद्दृश्योयस्यनोराजदैवकम्व्यस
नंजायतेघोरंसज्ञेयःशपथेशुचिःव्यसनमापत् घोरमतिपी
डाकरम् कोशाधिकारेविष्णुःयस्यपश्येतसप्ताहाद्द्विसप्ता
हाद्वापिवारोगोऽग्निर्ज्ञातिमरणंराजातङ्कमथापिवातम
शुद्धंविजानीयात्तथाशुद्धंविपर्य्यये॥पितामहःत्रिरात्रात्सप्त
रात्राद्वाद्विसप्ताहाद्वापिवावैकृतंयस्यदृश्येतपापकृत्सतुमा
नवःतस्यैकस्यनसर्वस्यजनस्ययदितद्भवेत् रोगोऽग्निर्ज्ञातिम
रणंस्यैवतस्यविभावना॥कात्यायनः अथदैवविसंवादात्त्रिसप्ता
हात्तुदापयेत् अभियुक्तंप्रयत्नेनतमर्थंदण्डमेवच तस्यैक
स्यनसर्वस्यजनस्ययदितद्भवेत्। रोगोऽग्निर्ज्ञातिमरणमत्र
न्दृष्टव्यमञ्जसः दैवविसंवादोरोगज्ञा।तिमरणादिःतस्यैक
स्येतिनतुदेशव्यापकोमरणादिःकिन्तुशपथानन्तरजन्मा अ
भियुक्तस्यासाधारणोरोगादिर्भङ्गलिङ्गमित्यर्थः अनयद्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पिनानीवाक्ये कालविकल्पः श्रूयते। तथापिशपथेसर्वत्र द्विस प्ताहानुयएव। अतएवशपथाधिकारेनारदोपि। ऊर्द्धंयस्यद्वि सप्ताहाद्वैकृतंसुमहद्भवेत्ना भियोज्यः सविदुषाकृतकालव्य तिक्रमात् । हलायुधेनतुवर्णानुक्रमेणत्रिराचादिव्यवस्थो क्ता । पारिजातेतु । कोशएवयस्यदेवस्यस्नपनोदकंपी तंतत्प्रचरतातारतस्येनत्रिरात्राद्दिव्यवस्थोक्ता । प्रदीपकृ तातु । देशकालापेक्षयाविकल्पउक्तः । सम्प्रदाय मार्ग मनुसरताचमयानारदवचनानुरोधेनचकोशएववर्णानुक् मेणकालविकल्पः स्वीकृतः । नारदः अनेकार्थाभियोगे नुसर्वार्थंत्र्यपलापिना विभावितैकदेशेनदेयन्तदभियुज्यते येषामर्थानांमिथोविनाभावस्तद्विषयमेतत् । न्यायमूल कत्वात् । यद्वाएकदेशविभावनेपिसर्वन्दद्यामिति पणवि षयम् अन्यथाऽदृष्टार्थकतापतेः । अतएवयाज्ञवल्क्योपि सपणश्चेद्विवादःस्यात्तत्रहीनं प्रदापयेत् । दण्डञ्चस्व पणञ्चैवधनिनेधनमेवचेतिमनुः । तीरितंचानुशिष्टञ्च यत्रक्वचनयद्भवेत् कृतंतद्धर्मतोविद्यान्नतद्भूयोनिवर्तते। ती रितमितितीरपारसमाप्तावित्यस्यचौरादिकस्यनिष्ठायां रूपम् । तेननिर्णीयसमापितमित्यर्थः । अनुशिष्टंसा क्षिभिरुक्तम् यत्रक्वचनग्रामादिसभायाम् नारदः । साक्षि सभ्याव सन्नानां दूषणेदर्शनं पुनः । स्वचर्य्या वसिता नाञ्चनास्तिपौनर्भवोविधिः । दृदमत्राकूतम् । अदुष्ट

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

साक्षिसभ्यादिभिर्य्यद्धर्मतोविचारितं तद्वादीच्छामात्रेण द्विगुणदण्डमास्थायापिनविचारणीयम् मनुविरोधादनवस्थापत्तेश्च किन्तु यन्निर्णीतमपि साक्षिसभ्यादि दुर्लक्षणमुद्भाव्यपराजितोवादीन स्वीकरोतिकिन्तुपुनर्विचारमर्थयती तत्रद्विगुणदण्डमास्थाय दूषणमेवापाततोविचारणीयम्। सिद्धेतुदूषणेद्विगुणन्दण्डन्तिरस्कृतत्र पुनस्तत्वतोविचारएवप्रवर्तीनीयः। पूर्वविचार सत्रसमया समत्रकत्वशंकायामेवपुनर्विचारस्तत्रापिपराजित सत्रादौद्विगुण दण्डस्वीकारस्ततोविचारप्रवृत्तौस्वोक्तसत्रसाक्ष्यादि दूषणंतेनप्रणेसाक्ष्यादिमात्रदण्डोविवादपदस्यपुनर्विचारणन्त्र। अपूरणेतुतेनपराजितस्यैवदण्डोनतुविचारान्तरमपीति। तदुक्तं याज्ञवल्क्येन दृष्टान्तं पुनर्दृष्ट्वा व्यवहारान्नये न्नृपः। सभ्यःसजयिनोदण्ड्याविवादाद्द्विगुणं दमम्। नारदोप्याह तीरितं चानुशिष्टञ्चयोमन्येतविधर्म्मतः द्विगुणंदण्डमास्थायतत्कार्य्यंपुनरुद्धरेत् असाक्षिकन्तुयद्दृष्टं विमार्गेणाचतीरितम्। असम्मतमतैर्दृष्टम्पुनर्दर्शनमर्हति। पितामहः। स्थावरेषु विवादेषु दिव्यानि परिवर्जयेत्। साक्षिभिर्लिखितेनाथभुक्त्यावातान्प्रसाधयेत्। इदन्तुसाक्ष्यादीनांप्रायिकतयातदादरणार्थम्। तदभावेदिव्यमपिकार्यम् अन्यथासन्देहतादवस्थ्यात्। यस्मिन्यस्मिन्विवादेतु साक्षिणांनास्तिसम्भवः। साहसेषु चसर्वेषु सर्वंदिव्यानि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वापयेत् । कात्यायनः । समत्वं साक्षिणाय्यं यदिव्यै
स्तत्र विशोधयेत् प्राणान्तिकविवादे च विद्यमानेषु साक्षिषु
यद्यपि साक्षिणां विशेषविधिनैवशेषनिषेधस्तथापि स्तेनाः
साहसिकाद्युत्यादिः कण्ठतोऽपि तन्निषेधोनिरर्थकस्तेन वि
हितालाभेऽविहितनिषिद्धाउपादेया इतिद्रष्टव्यम् । एतच्च
साक्षिपरीक्षणं ऋणादिषु नतु साहसादौ ॥ यदाह कात्याय
नः ऋणादिषु परीक्षेत साक्षिणः स्थिरकर्मसु । साहसात्या
यिके चैव न परीक्षा क्वचित्मतेति । साक्षिश्रावणमनुनार
दौ । अश्वमेध सहस्रञ्च सत्यञ्च तुलया धृतम् । अश्वमेध
सहस्राद्धि सत्यमेवातिरिच्यते ॥*॥ जयपत्रलक्षणे कात्यायनः
अर्थि प्रत्यर्थि वाक्यानि प्रतिज्ञा साक्षिवाक् तथा । निर्णयश्च
यथा तस्य यथा वावधृतं स्वयम् ॥ एतद्यथाक्षरं लेख्य यंथा
पूर्व्वं निवेशयेत् । बृहस्पतिः । सद्‌, त्त व्यवहारात्तु पूर्वपक्षो
त्तरादिकम् क्रियावधारणोपेतं जयपत्रेऽखिलं लिखेत् ।
पूर्वोत्तरक्रियायुक्तं निर्णयान्तं यदा नृपः । प्रदद्याज्जयिने ले
ख्यं जयपत्रं तदुच्यते । वशिष्ठः । प्राड्विवाकादिमुद्राङ्क
मुद्रितं राजमुद्रया । तथा निरस्ता तिक्रियायत्र प्रमाणे
नैव वादिना । पश्चात्कारो भवेत्तत्र न सर्वत्र विधीयते । नि
रस्तेति । साक्षिशपथादिरूपा क्रिया प्रमाणेनानुमानादि
नापश्रात् क्रियतइति । पश्चात्कारो जयपत्रम् । यत्र वादिवाक्य
तात्पर्यपर्य्यालोचनया जयावधारणं तत्र वै जयपत्रन्नतु साक्षि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निगादार्थिप्रत्यर्थि शपथादिनाजयावधारणेपि । नसर्वासु क्रियास्विति वचनादितिकेचित् तन्नपूर्वंजयविभावनस्या पि सत्यत्वे सर्वत्र व जय पत्रस्यन्यायतः सिद्धेः कथंतर्हिनस र्वास्विति वचनम् यादृशंजयपत्रं प्रत्याकलितस्थलेनतादृशंप्र माणेनजयावधारणस्थले इत्यत्र वतात्पर्य्यात् । एतच्चजयपत्र लिखनम् निरूपणस्यसमग्रकत्वप्रदर्शनार्थम् । भाषोत्तरले खनञ्चहेत्वन्तरेणपुनर्न्यायप्रत्यवस्थाननिरासार्थम् । प्रमाण लिखनं चपुनः प्रमाणनिरासार्थम् अतएवयथापक्षेषुधा न्येषुनिष्फलाः प्राड्षोगणाः । निर्णीतव्यवहाराणां प्रमाण मफलंतथेतिदिक् ॥*॥ अथभोगः ॥*॥ सागमोदी र्घकालश्चनिश्छि तोऽन्यवलोज्झितः । प्रत्यर्थिसन्निधानं चपञ्चाङ्गोभोग इष्यते । प्रमाणमितिशेषः । ननुसाग मत्वंविशेषणमनर्थकम् तदतद्भोगस्यापिप्रामाण्यात् । अ न्यायेनापियद्भुक्तं पित्रापूर्वतरै स्त्रिभिः । नतच्छक्यमपा कर्तुं क्रमात्त्रिपुरुषा गतम् । यद्विनागममत्यन्तंभुक्तं पूर्वत रैस्त्रिभिः नतच्छक्यमपाकर्तुंक्रमात्त्रिपुरुषागतम् । वर्षा णिविंशतिंभुक्त्वास्वामिनाव्या हतासती भुक्तिः सापौरु षीभूमेर्द्विगुणाचद्विपौरुषी । त्रिपौरुषीचत्रिगुणानतत्राप्य त्यागमः । एवञ्चत्रिपुरु षभोगआगमनिरपेक्षएवप्रमाण मितिन । सागमेनभोगेनभुक्तं सम्यग्यदाभवेत् । आह र्त्तालभतेतत्रनापह्नार्य्यंन्तत्तत्क्वचित् । आगमेनविशुद्धेनभो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गोयातिप्रमाणताम् आविंशद्वाग मोभोगः प्रामाण्यंनैव गच्छति। अनागमन्तुयोभुङ्क्ते बहून्यव्दशतानितु। चौर दण्डेनतंपापंदण्डयेदवनीपतिः। ननुतर्हिंसाधकवाधक मानसद्भावात् संशयएवास्तु उच्यते। पूर्वेषांवचनानामा गमसन्देहविषयत्वेनोत्तरेषांतदभावनिश्चय मात्रमव्यप्रष्ट न्तत्वेनविषयभेदेना विरोधात्। एवञ्चत्रिपुरुषभोगस्य लेख्यागम सन्देहेऽपिभोगः प्रमाणम्। अन्यचत्वागमनि श्चयसहितएव। आगमव्यतिरेकनिश्चयेतु शतवार्षिकोपि भोगोनप्रमाण मितिसिद्धम्। पश्यतोब्रुवतोहानिर्भूमे र्विंशतिवार्षिकी। परेणभुज्यमाना याधनस्यदशवार्षि की। अध्यासनात् समारभ्यभुक्तिर्य्यं स्याविघातिनी। त्रिंशद्वर्षाण्यविच्छिन्नातस्यता न्नविचालयत्। नन्वेते षांवचनानांविरोधेनषष्टिवर्षभुक्तेः प्रामाण्येऽप्यत्रिंशद्वा र्षिकोविंशतिवार्षिकोवाभोगोन प्रमाणमर्थतस्तयोः प्रा माण्यनिषेधादितिचेन्न विषयभेदेनाविरोधात् तथाहि पश्यतोब्रुवतइत्यभिधानाद्युधविरुद्धं वाङ्मात्रमपिनास्तितत्र विंशतिवार्षिकोभोगएवप्रमाणम्। त्रिंशद्वर्षाण्यविच्छि न्नेत्यत्राविघातिनीतिश्रुतेः विघातपदार्थस्यकलहताडना देरेवनिषेधात्॥ वाङ्मात्रविप्रतिपत्तौसत्यामपित्रिंश द्वार्षिकोभोगःप्रमाणमिति। एवञ्चाव्याहता सतीतिश्रुते :कलहताडनादिषु सत्स्वपिषष्टिवार्षिकोभोगो भूस्वत्वे प्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

माणमिति गवादौतुनीरवोदशवार्षिकोभोगः प्रमाणंवच
नादिति । अत्रकेचित् नह्युक्तवचनंभोक्तुःस्वत्वेप्रमाणंव्या
प्तेरभावात् किन्तुभोक्तुस्तादृशसत्रपार्श्वेतत्तद्वचनात् गोभू
म्यादिस्वामिनातद्भोगसम्बन्धे नधनंलभ्यतइत्यत्रप्रमाणम् ।
भुज्यमानान्परेणार्थान्यस्तान् मोहादुपेक्षते । समक्षं पश्य
तोप्यसत्तानभुक्तिः कुरुतेवशमिति । अन्येतुस्वाधेरनु
पभोगेनयत्राधिसिद्धिस्तद्विषयकमिदंवचनम् यत्राधिग्रहीता
भूम्यादिकमाहितं नभुज्यते किन्त्वाधिकचचिरंभुक्त्वा
ऽन्यत्राधीयते तत्रोत्तरस्याधिग्रहीतुस्तद्भूम्यादौ प्रभुत्वं
नतुप्रथमस्य तथाचयद्यप्याधौ प्रतिग्रहेक्रीतेपूर्वैवबलवत्तरे
त्यादिकंवचनमप्यस्ति तथापितदपवादकं पश्यतोब्रुवतइ
तिवचनम् तथाचापरत्रादकबलाद्द्वितीयस्यैवाधिःसिध्यति
यद्वाहानिपदमेवउपेक्षितुः पक्षे विचारकस्यन्यूनकोटिकः
संशयोभवतीत्येवंपरम् नतद्भङ्गएवतथा सतिहानिस्तत्
रेणपुनर्दर्शनं हीनस्यगृह्णतेवादइत्यादि वचनसिद्धं नघट
ते तस्मात्तादृशहानिमतोप्यस्यपुनर्विचारेणैवनिर्णयः का
र्य्यः । अतएवउपेक्षितायथाधेनुर्विनापालेननश्यति पश्य
तोऽन्यैस्तथाभुक्ताभूमिःपालेनहीयते । वर्षाणिविंशतिर्य्यं
स्यभूमिर्भुक्ता परैरिह । सतिराज्ञिसमर्थस्य तस्यसेह
नसिध्यति । इत्यत्रपश्यन्तमनादृत्ययायस्यभूमिः परैर्भु
ज्यतेसातस्यहीयते । तदीयत्वेननिश्चीयतइति । किंच

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यद्विंशतिवार्षिकोभोगःस्वतएवस्वत्वे प्रमाणम् तदाततएवसाध्यसिद्धौसक्तस्यसन्निधावर्थोयस्यलेख्येनभुज्यतेवर्षाणिविंशतिंयावत् पश्चंदोषविवर्ज्जितमितिवचनेनयद्भोगस्यलेख्यदोषनिराकरणार्थत्वमुक्तन्तद्व्याहन्येत् । वस्तुतस्तुहानिबोधकस्मृतीनांप्रमाणपरिपालनकर्तव्यताविधिशेषत्वमेवअतएवहानिवचनानिलिखित्वाक्ल्पतरौप्रमाणपरिपालनमुपसंहृतमिति । आगमोपिवलन्नैवभुक्तिस्तोकापियत्रनो । तथानागमन्तुयोभुङ्क्तेवहून्यव्दशतानितु । एवंचैतद्वचनयोः पर्य्यालोचनयासागमाभुक्तिः स्वत्वेप्रमाणम् । नत्वागमव्यतिरेकनिश्चये भोगः प्रमाणंपरस्परव्यभिचारात् किञ्चसर्वैरेवस्वत्वनिषेधात् एवञ्चागमसन्देहेभोगस्यप्रामाण्येव्यर्थविशेषणतेतिचेन्न । इदमिदानींममस्वमिति ह्येतावत्साध्यम् । तत्रहिस्वत्वभागेआगमस्यतन्त्रता । तस्यत्विदानीं पर्य्यन्तमनुवृत्तौभोगस्येतिद्वयोः सार्थकत्वात् नन्वागमव्यतिरेकनिश्चयेऽपिपाष्ठाह्निकोभोगः । प्रमाणमेव तदुक्तमन्यायेनाऽपियद्भुक्तं पितापूर्वतरैस्त्रिभिरितीतिचेन्नअनागमन्तुवहून्यव्दशतानितु चौरदण्डेनतंपापंदण्डयेदवनीपतिरितिवचनविरोधात् । किञ्च । नतच्छक्यमपाकर्त्तुमिनिर्देशेन त्याजनस्याशक्यतापरमभिधीयते । दण्डयेदित्यत्रदण्डएवेतिविशेषः। अतएवानागमन्तुयोभुङ्क्तइत्यत्रसन्तानापे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च्चयैकवचनमितिवा चव्चाणेनपारिजातत्तता वह्न्यव्द
शतपर्य्यन्तमपिपितापुत्रक्रमेण सन्तानेनभुज्यमाने पिव
स्तुनिभोगात्स्व त्वमनङ्गीकुर्व्वताऽस्यसुदूरनिरस्त त्वादि
ति। भुक्तिरेवगरीयसीत्यत्राल्पकालभुक्तिसाक्षिलेख्ये भ्यः प
ञ्चांगसम्पन्नाभुक्तिर्गरीयसीत्यर्थः इदन्त्विहविचार्यते ।
उक्तभोगोभोक्तुः स्वत्वजनकोवास्वत्वप्रमापकोवा तत्रना
द्यः । याजनादिवदस्यस्वत्वजनकत्वेनास्मरणात् । ना
पिद्वितीयस्तथाहि । लिङ्गतयावाभोक्तुः स्वत्वम सौ
प्रमापये दनुपपन्नतयावातत्रापिनप्रथमः । ईदृशभोगस्य
स्वत्वेनसहव्याप्ते ग्रीहकाभावात् । राजादिधनेव्यभि
चारात् । किञ्चानेनभोगेनप्राचीनस्वत्वस्यस्वतएवप्र
मापणेश्रन्यायेनापियद्भुक्तमितयादिकंविरुध्येत । नहि
स्वमन्यायेनभुज्यते । अतएवनद्वितीयोपि । किञ्चेयम
नुपपन्नता ॥ * ॥
सौ राजादिधनगोचरा नास्ति । यतोनतत्रकदाचिद
पिभोगः प्रमाणमिति । तस्मादेवंवाच्यम् । यदयंयथोक्तोभो
गः । पूर्वस्वामिनोभुक्त्युद्देशेनत्यागात् स्वत्वध्वंसमयोप
यति नहिसम्भवति तन्नजहाति परस्वभोगंचेदृशंतत्रवस्तु
नित्वमतदूतिकिञ्च यद्धि यदुद्देशेनत्यज्यते तत्तेनपरिगृह्णी
तम् तस्यस्वीभवति । यथासर्वभूतोद्देशेनत्यक्तं तोयादीति
नियमादिदमपिततएवभोक्तुः स्वीभवति । राजादिधनेतु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

नैवम् । तत्रत्यागस्यैवासम्भवात् । तस्माद्भूम्यादौविंशतिवा
र्षिकोभोगोगवादौदशवार्षिकएवपूर्वस्वामिनः । स्वत्वध्वं
सेप्रमाणमिति यत्कालवैषम्यंभूम्यादेर्म्महाफलत्वेनातिम
हत्वासदृत्वात् । तत्रचिरकालिनैवस्वत्वहानि कल्पना
त्तथाद्रव्यान्तराणाम्नातथात्वादल्प कालेनापिस्वत्वहानिक
ल्पनाद्युक्तम् । यत्तु भूम्यादावेवकालवैषम्येनभोक्तुःस्वत्वजन
नंतदपिवचनवलादेवयुक्तम् । यथा तदेवह्निजन्मपुत्रस्य
पितृधनेस्वत्वजनकम् । नतुपुत्रत्वादिति । प्रदीपकृतस्तुयत्रवह्नि
मत्कृतयानेदानीमत्रफलसम्भावना तदिदानींपरएवभुक्त्वा
पश्चादेतत्सकाशात्सभोगांशुवंग्रहीष्यामीत्यभिसन्धायस्वा
मीक्षमते । तत्रनास्तिविंशत्याहिकोभोगोनतुस्वामिनस्तदु
द्देशेनस्वभूमित्यागइतिव्यभिचारान्नायंभोगः । पूर्वस्वा
मिनस्त्यागेप्रमाणम् । नचात्रपूर्वस्वामिनात्यागाभावप्र
तिज्ञयादिवंत्यकार्य्यम् । तथाचतद्भोगेत्यागमनिर्णयइतिवा
च्यम् । तथापिपूर्वभोगसिद्धस्य पूर्वपरिग्रहस्य त्यागानव
धारणकालीनत्वेन भोक्तृस्वत्वा जनकतयातद्वैयर्थ्यात् ॥
चिरभूस्वामी सचेताः किमितिसंजह्यात् । नात्रदृष्टमुद्दे
श्यन्तदभावात् । नाप्यदृष्टम् धर्म्मशास्त्रेतिकर्त्तव्यताविर
हात् । महेच्छत्वसुशीलत्वदयालुत्वादिनापित्यागासम्भवः
स्वत्यजन्नपितैरेवक्षमते इत्यस्यासम्भवात् । नापियदुद्देशे
नयत्त्यज्यते तत्तस्यस्वमितिनियमः । उद्देशेनापरि गृही

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

तेव्यभिचारात् । अपिचत्यागाद्भोक्तुः स्वत्वंस्वरूपतोच्छा
ताद्वा । नाद्यः अदृष्टचरत्वात् । द्वितीयेच त्यागस्योक्तः
स्वामिवचनादिनाशयात् । तथाचत्वदुद्देशेनमयेदन्त्यक्तमि
ति । तत्स्वामिनस्तदभिसन्धिपूर्वकाद्वचनात्स्यात् । इ
दञ्चदानमेवेतिकृतमुपेक्षानुसरणेनेति । नचयथोक्तक्षम
येवत्यागानुमानम् । अत्यक्तेऽपिसौशील्या दिनाक्षमास
म्भवात् । नचैवंयथोक्तक्षमयाभोक्तृस्वत्वानुमानमपिनस्या
त् ॥ पूर्वस्वामिनस्तत्स्वत्वेपिसौशील्यादिनातस्यान्यथा
सिद्धेरितिवाच्यम् । षष्ठ्यब्दानृयावत्सौशील्यादिना क्षमा
सम्भवेपितादृशभोगस्यभोक्तृस्वत्वप्रमापकत्वं स्मृत्युक्तं भज्ये
त तस्मात्तादृशोभोगोभोक्तृस्वत्वे प्रमाणम् । तच्चपूर्वागमा
द्दोत्पन्नं स्वामि भोक्त्रुद्देश्यकतद्वस्तुत्यागाद्वे त्यवनाग्रहः ।
वस्तुतस्तुवचनवलादेवस्वत्वहानिः स्वत्वोत्पत्तिश्चेतित
त्वम् । ऋक्थिभिर्वापरैर्द्रव्यम समक्षं यस्यदीयते । अ
न्यस्यभुञ्जतः पश्चान्नसतंलब्धुमर्हति । पश्यन्नन्यस्यददतः
क्षितिं योनविचालयेत् स्वामीसतापिलेख्येन पुनस्तान्न
समानुप्यात् । अत्रचैतद्वचनयोः पर्य्यालोचनयाऋक्थि
भिरप्रसिद्धमन्यतमेन समक्षं दत्तं साधारणन्धनं तथापरै
र्वापरकीयंसमक्षं दत्तं ननिवर्तते अप्रतिषिद्धमनुमतंभव
तीतिन्यायात् एवञ्चन्यायतौल्यादन्यापिक्रियान्तरेष्वे
वगतिरितिद्रष्टव्यम् धर्मश्चव्यवहारश्चचरितंराजशासनम्

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चतुष्पाद्व्यवहारोऽयमुत्तरः पूर्वबाधकः । अथप्रथमस्यल क्षणपरीक्षणञ्च प्रपद्यैः । सत्येयोधर्मनिर्णयः । द्वि तीयस्यतुकेवलंशास्त्रमाश्रित्यक्रियतेयत्रनिर्णयः । व्यवहा रः सविज्ञेयोधर्मस्तेना वहीयते । युक्तियुक्तन्तुकार्य्यस्य द्विव्यय्यंचविवर्जितम् । धर्मस्तुव्यवहारेणवाध्यते तत्रना न्यथा । अयोग्यद्विव्याधीनोनिर्णयोवाध्यतइत्यर्थः । तृ तीयस्यतु । देशस्थित्यानुमानेन नैगमानुमतेनचक्रियते निर्णयस्तत्रव्यवहारेणवाध्यते । नैगमानुमते नानुमानेन । देशस्थित्याचरिताख्ययासामान्यमुखशास्त्रात् सारीव्यवहा रोवाध्यतेइत्यर्थः । चतुर्थस्यतु । विरुद्धंन्यायतोयत्रचरितं कल्प्यतेवुधैः एवंतत्रनिरस्येत चरितंतुनृपाज्ञया । न्याय यतोविरुद्धञ्चरितंराजाज्ञयावाध्यतेइत्यर्थः । यद्वा । न्या ययोः शास्त्र योर्वायत्रविरोधस्तत्रापिराजाज्ञयैवव्यवस्थे तिदिक् * ॥ विवादेतुनारदः । स्थानलाभनिमित्तंय द्दानग्रहणमिष्यते । तत्कुसीदमितिप्रोक्तंतेनवृद्धिः । कुसीदिनाम् । स्थानमवस्थानंमूलधनस्यतस्मिन्सतिवृ योलाभस्तन्निमित्तम् । तदर्थंयद्दानंसुवर्णाद्युत्तमर्णस्य ग्रहणमधमर्णस्यतत्कुसीदाख्यम्ऋणमित्यर्थः । इमेदान ग्रहणेकर्मव्युत्पन्ने । तेनेच्छायांनातिप्रसंगः। तथाचधनि केनतदर्थंप्रयुक्तंधनमधमर्णेनतथाभ्युपेत्यगृहीतम्ऋणमिति सिध्यति । उद्धारेतुकलाशून्येऽवश्यापाकरणीयत्वलक्ष

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

णयोगाद्दूर्गीणांप्रत्प्रयोगः । अवश्यापाकरणीयस्त्र
गुणत्वं जायमानोह्वैब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान्जायते ।
इतिन्यायचतुर्थाध्यायेव्यक्तम् । यस्यैवदानंतस्यैवतज्जा
तीयस्यैवग्रहणंविवक्षितमतोवाणिजार्थं गृहीतस्यापि
नर्णत्वमितिदिक् नारदः । धनस्त्रीहारिपुत्राणामृणभा
ग्योधनंहरेत् । पुत्रोऽसतोः स्त्रीधनिनोः स्त्रीहारीध
निपुत्रयोः । व्यसनग्रस्ते द्रविणार्हे पिपुत्रे सति धनहार्य्येव ऋ
णन्दाप्यइतिप्रथमखण्डार्थः । तदाहबृहस्पतिः । ऋणा
भाग्द्रव्यहारीतुयदि सोपद्रवःसुतः स्त्रीहारीतुतथैवस्या
द्भावेधनहारिणः ॥ कात्यायनोपि । ऋणन्तुदापये
त्पुत्रं यदिस्यान्निरुपद्रवः । द्रविणार्हस्वधूर्य्यस्त्रनान्यथादा
पयेत्सुतम् । तथाव्यसनाभिप्लुतेपुत्रे वालेवायमदृश्यते ।
द्रव्यहृद्दापयेत्त्वृतस्याभावेपुत्रस्त्रिहृत् । स्त्रीहारिणिध
नहारिणिचासतिव्यसनादियुक्तो पिपुत्रएवपितृणन्दाप्य
इतितृतीयचरणार्थः । यदाहमनुः । पितर्य्युपरतेपुत्राऋ
णंदद्युर्य्यथांशतः । धनहार्य्यभावेयोग्यपुत्रेचासतिस्त्री
हार्य्येवऋणन्दाप्यइतिचतुर्थचरणार्थः । तदुक्तंनारदेन ।
अन्तिमास्वैरिणीनांतुपुनर्भ्वांप्रथमातुया । ऋणान्तयोः
पतिकृतंदद्याद्यस्ते समश्नुते । कात्यायनोपि । द्रव्य
हृद्दापयेत्त्तु तस्याभावेपुत्रस्त्रिहृत् । बृहस्पतिरपि ।
ऋणभाग्द्रव्यहारीतुयदिसोपद्रवःसुतः स्त्रीहारीचतथैव

स्यात्तदभावेधनहारिणः एवञ्चधनहारिणि सति अयो
ग्यपुत्रस्यस्त्रीहारिणोऽन्नादेयम् ॥ याज्ञवल्क्यः । ऋक्थ
ग्राहीऋणंदाप्योयोषिद्ग्राहो तथैवच । पुत्रोऽनन्याश्रि
तधनःपुत्रहीनस्यऋक्थिनः । तथाच । योग्योपिपुत्रान्त
रासंक्रान्तधनएवऋणन्दाप्योऽतएवपितुरधिकारेयोऽभिषि
च्यतेतांधुरमुद्वहति । तस्यैवतदृणन्देयम् । नासंक्रान्त
पितृधनस्यपुत्रान्तरस्यापि । पुत्रोऽनन्याश्रितधनइतिश्रुतेः
तथाचधनहारिणिस्त्रीहारिणिचसत्रपितृ विणाहौऋण्यं
स्वपुत्रएवपितुरृणंदद्यात् । यदिसोपद्रवः सुतइतिविशेष
वणात्ततोऽनीदृशपुत्रसत्वेद्रव्यहारीदाप्योऽनीदृशपुत्रस्तुध
नहार्य्यभावेस्त्रीहारीतुतथैवस्यात्तदभावे धनहारिणइतिव
चनात् ॥ पुत्राणामन्यतमस्यधनहारित्वेऽयोग्योऽपिसए
वदाप्यः । पुत्रोऽनन्याश्रितधनस्तत्रादेरिति । कात्यायनः
यद्दत्तंद्यूतशेषंवादेयंपैतामहन्तुतत्सदोषं व्याहृतंपित्रा
नैवदेयमृणंक्वचित् । एतद्वचनबलान्नममैतद्देयमिति ।
पित्राव्याहृतमृणंपुत्रैर्न्नदेयमिति । केचित्तन्न । अनन्य
थासिद्धविप्रतिपत्तेरेवगमकत्वादन्यथातिप्रसंगात् । स्मृ
तेर्वैदामूलकतापत्तेश्च । कृत्स्नैवमनारम्भःस्यात् व्यवहा
राभावश्चैवफलता । इति विभक्ताश्चाविभक्ता वादायादाः
स्थावरेसमाः । एकोह्यनीशःसर्वत्रदानाधमनविक्रये । अ
नयथाश्रु तथाद्वचनाद्विभक्तस्था वरेष्वपिनैकस्य दानादाव

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धिकारद्दतिकेचित्तन्न । बहुतरवचनविरोधात् । किन्तु वि
भक्तानामपियत्रांशपरिच्छेदोनजात स्तन्मध्यकएवतिष्ठति
तेननचसाधारणत्वमेव । तत्रैकोनीशः । पृथग्भूतेषुसर्वेष्वेवद्र
व्येषुस्वतन्त्रकृतस्यैवसिद्धिरन्यथानिर्देशापत्तेरितिबृहस्प
तिःसामान्यपुत्रदाराधिसर्वस्वन्यासयाचितम् । प्रतिश्रुतन्त
थान्यस्मैनदेयन्त्वष्टधामतम् । अत्रचपुत्रदारविसतौसर्वस्वे
चान्वयेसतिवचनवलाद्दानासिद्धिरिति । वस्तुतस्तुभार्या
यांनस्वत्वम् । भार्यात्वेनैवप्राप्तेः । ननुकथंतर्हिहरिश्च
न्द्रस्तद्विक्रयमकरोत् । तेहिदेवकल्पास्तेननकिञ्चिदेत
त् । स्मृतिसारमतेतुसर्वस्वेसान्वयस्यापिदानंसिद्धत्ये
व । स्वतन्त्रस्वामिकृतत्वात् । दृष्टस्यस्वत्वस्यालुप्तकारण
स्यसत्वात् दातुःपरंप्रत्यवायोनिषिद्धाचरणादितितन्न ।
भवेदेवंयदिशास्त्रस्यनिषेधोनस्यात् । तथाचनारदः
अन्वाहितंयाचितकमाधिःसाधारणञ्चयत् । निक्षेपःपु
त्रदारञ्चसर्वस्वञ्चान्वयेसति । आपत्स्वपिहिकष्टासुव
र्तमानेनदेहिना । अदेयान्याहुराचार्य्यायच्चान्यस्मैप्र
तिश्रुतम् । सर्वस्वमन्वयानुमतावपिनदेयं तस्यत्वमात्र
एवदाननिषेधादितिकेचित् युक्तञ्चैतत् । प्रतिप्रसवाभा
वात् विक्रयञ्चैवदानञ्चनदेयास्युरनिच्छवः । इतरादि
कात्यायनेनभार्य्यापुत्रयोरेवसम्मतस्यादानविक्रययोःकथना
त् वसिष्ठः शुक्रशोणितसम्भवःपुत्रोमातापितृनिमित्तस्त

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वप्रदानविक्रयपरित्यागेषु माता पितरौ प्रभवतो नत्वेकं
पुत्रं दद्यात्प्रतिगृह्णीयाद्वा । सहि सन्तानाय पूर्वेषां नस्त्रीद
द्यात्प्रतिगृह्णीयाद्वाऽन्यत्रानुज्ञानाद्भर्त्तुः । नारदोऽपि । स्व
तन्त्राः सर्व एवैते परतन्त्रेष्वनित्यसः । अनुशिष्टो विसर्गे
वा विक्रये चेश्वरा मताः । एतच्च वचनद्वयं सुतस्य सुतदारा
णां वशित्वं त्वनुशासने । विक्रये चैव दाने च न वशित्वं सुते
पितुः । तथा विक्रयञ्चैव दानञ्च न देयाः स्युरनिच्छव इति
कात्यायनविरोधात् । पुत्रत्वेन दानविक्रयप्रतिपादनप
रमिति ऋजवः ॥ वस्तुतस्तु । कात्यायनवचनैकवाक्य
तया तेषामिच्छयैव संकोचात् । परं पुत्रत्वेन दासत्वेन
वोभयथैव दानविक्रयादिरन्यथा परस्परविरोधः स्यात्
कथं तर्हि हरिश्चन्द्रस्तद्विक्रयमकरोद्देवकल्पत्वादथवा पुत्र
दाराणामनुमत्यैव तच्च विक्रय इति । एकः पुत्रः स्वदानेऽनुम
तोऽपि न देयः । सहि सन्तानाय पूर्वेषामिति वचनस्वरसात्
भर्त्तुरनुज्ञानेऽपि स्त्रिया न ग्रहणाधिकारः । तदङ्गव्याहृ
तिहोमबाधात् । अतएव सिद्धान्तः । स्त्रीशूद्रतिरश्चां
यागेऽनधिकार इति । नन्वन्यत्रानुज्ञानाद्भर्त्तुरित्यविशेषे
णश्रवणात् भर्त्तुरनुज्ञया दानवद्ग्रहणेऽपि स्त्र्यधिकारस्त
दङ्गस्य विप्रयुक्तिरपि रथकारवदेव तस्याः कल्प्यत इति चे
त । सहत्वेन तस्या अधिकार इष्टिवन्न तु पृथक्त्वेन वा-
धसापेक्षविध्यापत्तेरिति ॥ नारदः । विक्रीणीते स्वतन्त्रः स्व

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

सामोनय्योनराधमः सजघन्यतमस्तेषांसोऽपिदास्यान्न
मुच्यते । मार्कण्डेयपुराणेहरिश्चन्द्रवाक्यम् । नस्वामि
नाविसृष्टोपिशुद्रोदास्यात्प्रमुच्यते । निसर्गजंहितत्तस्य
कस्तंतस्मात्तदपोहति । एवञ्चैतद्वचनवलाद्दासानां
दास्यमोक्षहूतिकेचित्तदयुक्तम् । तत्रपूर्वञ्चतुर्व्वर्गीदासत्वा
न्न विमुच्यते । प्रसादात्स्वामिनोऽन्यत्रदासत्वमेषांक्रमा
गतमितिनारदवचनैकवाक्यतयाविनाप्रसादादित्यस्यत
दर्थत्वात् हरिश्चन्द्रवचनंतुदासनिन्दापरमन्यथातस्यैवदा
सत्वमोक्षोनाभविष्यदितितत्त्वम् कात्यायनःदासेनोढात्वदा
सीयासाऽपिदासीत्वमाप्नुयात् । तस्माद्भर्त्ताप्रभुस्तस्याः
स्वाम्यधीनःपतिर्य्यतः । अत्रदासपदोपस्थापितप्रतियो
गिकमेवदासीत्वन्दासत्वञ्चपदन्यायादतोऽस्वामिका
न्यस्वामिकावापरिणीतासतीवरः स्वामिनः स्वीभवती
त्यर्थाद्दासोढत्वमेव । पूर्वस्वामिदास्यमोक्षहेतुरुक्तोत ए
वतत्प्रकरणेवाक्यमिदंलिखितमितिकेचित्तन्न । एवं
हिचेटिकापरिणये पूर्वस्वामिनः स्वत्वहान्यापत्तेः ।
स्मृतेर्वेदामूलकतापत्तेश्च । तस्मात्स्वाम्यनुमतिविषयएव
एतत्प्रमाणम् । अतएवतदनुमतिप्राप्त्यर्थमेव कन्याशु
ल्कमपिप्रयच्छन्ति । तथाचतद्विमतिविषयेतदपत्यान्य
पिपूर्वस्वामिनएव । स्वत्वप्रच्यवहेतोरभावात् । देव
लः । सर्वेष्वनौरसाएतेपुत्रादायहराः स्मृताः । औरसे

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तुसमुत्पन्ने ज्येष्ठ्यंतेषांनिवर्तते । तेषांसवर्णायेपुत्रास्तृतीयांशहरयभागिनः हीनास्तमुपजीवेयुर्ग्रासाच्छादनसंवृताः । वृहस्पतिः । एकएवौरसः पुत्रोधनेस्वामीप्रकीर्त्तितः तत्तुल्यापुत्रिकाप्रोक्ताभर्त्तव्यास्त्वपरेसुताः कात्यायनः । उत्पन्नेत्वौरसेपुत्रे तृतीयांशहराःस्मृताः सवर्णास्त्वसवर्णास्तुग्रासाच्छादनभागिनः । एवञ्चैतद्वचनपर्य्यालोचनेनौरससत्वे क्षेत्रजादीनांतृतीयांशहरत्वमिति केचित्तन्न । समग्रधनभोक्तास्यादौरसोपिजघन्यजः । त्रिभागंक्षेत्रजोभुंक्ते चतुर्थंपुत्रिकासुतः । इतिब्रह्मपुराणैकवाक्यतयाक्षेत्रजस्यैवतृतीयांशहरत्वसिद्धेः । सवर्णाश्चपिक्षेत्रजाएवोक्तयुक्तेः । बहुवचनंतुक्षेत्रजबहुत्वापेक्षया नारदः । पूर्वपूर्वः स्मृतोज्येष्ठोजघन्योयोयउत्तरः । क्रमादेतेप्रवर्त्तन्ते मृतेपितरितद्धने । मनुरप्याह । एकएवौरसःपुत्रः पित्र्यस्यवसुनःप्रभुः । शेषाणामानृशंस्यार्थंप्रदद्यात्तुप्रजीवनम् इति । वसुनस्तु । तस्मिन् सतिक्षेत्रजादयोपितृतीयांशहराएवबहुवचनानुरोधात् । शेषाणामित्यस्यासवर्णपरत्वात् । क्षेत्रजोभुंक्तेइत्यस्यव्यवच्छेदपरत्वेमानाभावात् । क्षेत्रजोऽपीत्यस्यतदर्थत्वादितितत्वम् । वृहस्पतिः । विभक्तोयः पुनः पित्राभ्रात्रावैकत्रसंस्थितः । पितृव्येनाथवाप्रीत्यासतत्संसृष्टउच्यते । अस्माकमेकतमस्यापिस्वंसर्वेषामस्माकंस्वमित्यभ्युपगमः संसर्गः स

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

चव्यवहारादिनानन्यथासिद्धव्यवहारादपिगम्यते। तेषांभ्रा
तॄविभवद्धनेष्वेकैकार्ज्जितेष्वपि सर्वेषांस्वत्वानिजाय
न्तेऽत्रपरिसंख्यानवलादेतैरेवधनमेलनमितिकेचित्तन्न ।
आवृत्तित्वाच्चपुनः परस्परसेनधनमेलनस्यैवलाघवात् सं
सर्गपदार्थत्वात् । तेनविभागप्रतियोगिनापितृव्यपुत्रादि
नासंसर्गोलभ्यते पित्रादिग्रहणन्तुप्रपञ्चनमात्रम्। अत
एवानाम्नायांवाकारइति । वस्तुतस्तु । पृथग्धनानांधन
मेलनमेवलाघवान्नतुप्राग्विभागेसतीतिगौरवात्। वाढमि
तिचेन्न । दृश्यन्तेतथासंसृष्टाअपीति । वालेतुभागिनि
माचाद्यनुमत्यैवविभागवत्संसर्गोपिव्यवहारवलात् । भ्रा
तॄणामथदम्पत्योः पितुःपुत्रस्यचैवहि । प्रातिभाव्यमृणंसा
क्ष्यमविभागेतुनस्मृतम्। परस्परविभागात्प्रागित्यर्थः । न
नुजायापत्योर्न्नविभागोविद्यतइत्यापस्तम्बसूत्रात्तद्विभागप्र
संगएवनास्तितत्कथमेवमितिचेन्न। आपस्तम्बवचनस्यवि
भागप्रकरणआम्नानात् । पाणिग्रहणाद्धिसहत्वंकर्मसु
तथापुण्यफलेषुचेतितद्वाक्यशेषादतएवजायापती अग्नीना
दधीयातामित्यादिनाग्न्याधानेसहाधिकारात्। तथामेख
लयायजमानंदीक्षयतियोक्त्रेणपत्नींतथापत्न्याज्यमवेक्षते
यजमानोवेदंवभातीत्यादिश्रवणात्तदाजन्याग्निसाध्यश्रौत
कर्म्मसुतथास्मार्तकर्म्मविवाहाग्नावित्यादिस्मरणाज्जायाप
त्युभयसाध्यविवाहाग्निसाध्येषुस्मार्तकर्म्म स्वावसथ्यादि

होमादुदम्पत्योःसहत्वमधिकारः।तदनयासहेत्यनुरोधा
त्।तथैवतत्सुण्यफलेष्वपितयोः साहित्यं तत्प्रकरणएवदि
विजप्रोतिरजरमारभेतामित्यादिगयाच्छायांत्तफलेवात
योर्न्न विभागोधनवित् धनविभागस्तु।यदिकुर्य्यात्समानं
शान्पत्न्यःकार्य्याःसमांशिकाइत्यादियाग्यवल्क्यवचनात्।
ननुपत्न्यधिकरणेपत्न्याअपिपतिधनेस्वत्वमुक्तम् । अन्या
स्वपितर्हिपत्यासहविभागोभवेद्यदिशाब्दस्तन्निषेधोनस्या
दितिचेन्न । अधनास्त्रयएवैतेभार्य्यादासस्तथासुतः । इ
त्यादिनाअधनत्वोक्तेः । पत्न्यधिकरणं त्विज्यामात्रे सह
त्वेनाधिकारसिद्ध्यैनत्वधिकरणत्वेनयोषिद्धनत्वबाधः ।
तस्यन्यायत्वेनवचनाबाधकत्वात् । अतएवान्यसाध्येष्वि
ष्टापूर्त्तेषुनसहत्वेनाधिकारस्तथाचभार्य्या विरहिणोऽपित
त्राधिकारएवानपवादात् । ननुयजमानः सपत्नीकः पुत्रपौ
त्रसमन्वितइत्येवात्रबाधकमितिचेन्न । पुत्राद्यभावेप्यधि
कारापत्तेः। अस्तुतर्हिद्वयोरप्यसमक्षं हिभवद्भूतमनर्थक
मित्येवबाधकम् । अस्ययोभयसाध्यकर्म्मपरत्वात् । अन्य
थास्त्रीमात्रस्यापितत्राधिकारापत्तेः । अनाश्रमित्वं गृ
हभंगकारणाद् तोगृहाणामसमुत्तमंद्विज । अनाश्र
मस्थैरपिवेदपारगैरहन्नगृह्णामिक्षतव्यंदर्शनमितिनर
सिंहपुराणवचनस्यप्रधानतस्तद्दर्शनपरत्वात् । व्यवहा
रोप्येवमेवेति ॥ * ॥ * ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथधनग्राहिणः॥तत्रगृहिणोधनंपुत्रोलभतेतदभावेपौत्रस्त
दभावेप्रपौत्रः । पुत्रः पौत्रः प्रपौत्रोवेत्यादिनाऽमीषांपाठ
क्रमेणैवस्वस्वाधिकारेसिद्धे तत्समानशीलस्यपत्रयग्रहण
स्यापितथैवाधिकारसिद्धेः । एवञ्चानपत्यस्यधनंपत्न्यभि
गामीतिविष्णुसूत्रेनपत्यस्यपुत्रपौत्रप्रपौत्रहीनस्येत्यर्थः ए
तेषामभावेसाध्वीपत्न्येवलभते। अपुत्राशयनंभर्त्तुः पालय
न्तीव्रतेस्थितापत्न्येवदद्यात्तत्पिण्डं कृत्स्नमर्थंलभेतचेतिव
चनात्इदंचविभक्तपतिधनपरम् । अविभागेतुभ्रातृभार्य्या
णांस्नुषाणाञ्चन्यायप्रवृत्तानामनपत्यानांपिण्डमात्रं गुरु
र्दद्यात् । जीर्णानिवासांस्यविक्षतानीतिशंखसूत्रादेव-
व्यवस्था ॥ पत्न्यभावेदुहिता । तदभावे दुहितृगामीति
विष्णुसूत्रात् । नारदोपि । पुत्राभावेतुदुहितातुल्य-
संतानकारणात् । पुत्रश्चदुहिताचोभौपितुःसन्तानकार
कौ। याज्ञवल्क्योपि। सदृशीसदृशेनोढ़ा
साध्वीशुश्रूषणेरताकृताऽकृतावाऽपुत्रस्यपितुर्धनहरीतुसा।
अपुत्रस्ततस्यब्रह्मस्वंगृह्णीयात् । तदभावेचेतिपराशरस्मृ
तेस्तथैवाक्रमः। बालरूपोप्येवम् । नचैतत्सर्वंपुत्रिकावि
षयमेव । तस्याः पुत्रसत्वेपिपुत्रिकायांकृतायांतुयदिपु
त्रोऽनुजायतेसमस्तत्रविभागः स्याज्ज्येष्ठता,नास्तिहि
स्त्रियाः । इत्यनेनतुल्यवदेवाधिकारसिद्धेः दुहितुरभावे
दौहित्रगामि । यथापितृधनेस्वाम्यंतस्याः सत्पु-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पितृबन्धुषु । तथैव तत्सुतोऽपीष्टे मातृमातामहे धन इति स्मृ-
तेः । न च दुहितुरभाव एव मातृगामि, तदभावे मातृगामी-
ति विष्णुसूत्रात् । भार्यासुतविहीनस्य तनयस्य मृतस्य च ।
माता रिक्थहरी ज्ञेया भ्राता वा तदनुज्ञयेति बृहस्पतिवच-
नाच्च तथैवानुक्रमसिद्धेरिति वाच्यम् । पत्नी दुहितरश्चैव पि-
तरौ भ्रातरस्तथेति याज्ञवल्क्यवचने चकारश्रुतेः । कि-
ञ्च लिखितवाक्येन दौहित्राधिकारस्य सर्वथैव वक्तव्यत्वेन त-
थैव तत्सुतोऽपीत्यनेन दुहितुरभाव एव तदधिकारप्रतीतेः ।
एवञ्च दौहित्राभावे मातृगामि, तदभावे मातृगामीति निर-
पवादविष्णुसूत्रात् । लिखितबृहस्पतिवचनाच्च । मातुर-
भावे पितृगामि, मातुरभावे पितृगामीति विष्णुसूत्रात् ।
पितुरभावे ज्येष्ठभ्रातृगामि । प्रेतानां धनं ज्येष्ठस्येति गौ-
तमवचनात् । तदभावे कनिष्ठभ्रातृगामि । पिता ह-
रेदपुत्रस्य धनं भ्रातर एव चेति विष्णुवचनात् । तदभावे-
भ्रातृपुत्रगामि, तत्सुतो गोत्रजो बन्धुरित्यादिवचनात् । वि-
भक्तसंस्थितद्रव्यं पुत्राभावे पिता हरेत् भ्राता वा जननी-
वापि माता वा तत्पितुः क्रमादिति कात्यायनविरोधान्नैव-
मिति चेन्न । पित्रर्जितं पिता गृह्णीयाद्भ्राताद्यार्जितं भ्रा-
तादिरिति विषयभेदेनैवोपपत्तेः ॥ पैठीनसिः । अपुत्र-
स्याभार्यस्य भ्रातृगामि द्रव्यं तदभावे मातापितरौ लभेता-
म् ॥ देवलः । ततो दायमपुत्रस्य विभजेरन् सहोदराः । तु-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

ल्यादुहितरोवापिभ्रियमाणाः पित्रापिवा ॥ सवर्णाभ्रात
रोमातामार्याचेतियथाक्रमम् । एषामभावेगृह्णीयुः (स
कुल्याःसहवासिनः । तुल्याः सहोदराएवंसवर्णाभ्रात
रोवैमात्रेयाः । अत्रचदेवलोक्तक्रमेणसहविष्णुयाज्ञवल्
क्योक्तक्रमयोर्विरोधमाशंक्ययथाक्रममितिपदंदेवलीयंया
ज्ञवल्क्योक्तक्रमानतिक्रमेणेतिहलायुधेनव्याख्यातम् । दे
वलवचनलेखनानन्तरंविष्णुयाज्ञवल्क्यवचनेलिखितव
तः कल्पतरुकारस्याप्येवमेवाशयः एतत्तु नमनोरम-
म् । नहिस्वोक्तक्रममुल्लंघ्यपरोक्तक्रमोयथाक्रममिति-
स्वोक्तस्यार्थोभवितुमर्हतिउपस्थितं विहायानुपस्थितपरि
ग्रहणे गौरवात् । एवमपिपैठीनसिवचनविरोधापरि
हाराच्च । तस्मात्पूर्वपुरुषार्जिते धनेविष्णुयाज्ञवल्क्यो
क्तः क्रमस्तदन्यधनेतु पैठीनस्याद्युक्तः क्रमइत्येवन्या
यसहमिति ॥ ॥ गौतमः नानृतवचनेदोषोस्तिजीव
नं चेत्तदधीनं नतुपापीयसो जीवनमिति ॥ पापीयस
श्चौरादेः ॥ मनुः ॥ नवृथा शपथंकुर्यात् स्वल्पेप्यर्थेन
रोबुधः । वृथाहि शपथं कुर्वन् प्रेत्यचेहचनश्यति ।
कामिनीषु विवाहेषु गवांभक्ष्ये तथेंधने । ब्राह्मणा
भ्युपपत्तौ चशपथे नास्तिपातकम् कामिनीष्विति र
हसिकामिनीसन्तोषार्थम् । वृथाशपथैरेव यच्चविवाह
सिद्धिस्तदर्थं गोग्रासार्थंब्राह्मणादिरक्षार्थञ्चनदोषइत्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

र्थः ॥ * ॥ * ॥ * * ॥

॥ अथाशौचम् ॥

दत्तानारी पितुर्गेहे सूयते म्रियतेऽथवा । स्वमशौचं चरेत्सम्यक् पृथक्स्थानेव्यवस्थिता ॥ तद्बन्धुवर्गः स्वकेनशुध्यतेजनकस्त्रिभिः ॥ दत्तानारी पृथक् स्थाने व्यवस्थितास्तु ताम्मृतावातद्वातत्पति सपिण्डः स्वकीयमेवाशौचञ्चरेत् । दत्तानांभर्त्तुरेवस्त्रीतिवचनैकवाक्यतावत्त्वादिति मध्यमखण्डार्थः । नचाध्याहारदोषः । प्रामाणिकत्वादन्यथाएषणित्यादिवैयर्थ्यापत्तेः । पित्रोस्तद्गेहएवतस्याः प्रसवेमरणेवात्र्यहमेवाशौचम् । गृहेस्थितासुकन्यासुदत्तासुचत्र्यहम् । निवासराजनि प्रेतेजातेदौहित्रिकेगृहे । इत्यसपिण्डाशौचप्रकरणस्थासंकुचितपक्षवचनात् । भ्रातृणांत्वेकाहमेव ज्ञातीचासपिण्डेषुचप्रत्तासुचस्त्रीषुदन्तजातेपरिजातेचैकाहमिति तत्प्रकरणस्थाश्वलायनसूत्रात् । परिशिष्टखण्डार्थ इति परमगुरवः । हारलताकृतस्तु अध्याहार दोषमनङ्गीकुर्वन्तः पितुः शयनभोजनाद्यसाधारणगृहेतस्याः प्रसवेमरणेवापितुः स्वजात्युक्तमशौचम् भ्रातृणांत्र्यहम् तद्भिन्नगेहेतस्याः प्रसवेमरणेत्रापितुस्त्र्यहम् । भ्रातृणामेकाहमिति ब्रुवते तपत स्यद्वृश्चिकभियापलायमानस्य तरक्षुमुखेनिपातमालोकयास्माभिः किञ्चिन्नोक्तमिति । यद्यपि स्वमशौचमि-

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्यत्र स्वशब्दस्य ज्ञातावपि शक्यातत्पते: सपिण्ड इति विवरणम् स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धन इत्यनुशासनविरोधादापाततः शुद्धौ चिन्त्यमेव तथापि स्वमित्याशौचविशेषणतया प्रकृत परतयैव नेयमिति द्रष्टव्यम् । अत्र सूयत इति श्रवणाद्दीजिनश्चतुर्थादि कन्याजननेऽप्यशौचमेव सपिण्डाप्रसवस्यैवतद्धेतुत्वात् न तु तज्जननस्याप्रयोजकत्वादत एव शिष्टाचारोऽप्येवमेवेति साम्प्रदायिकाः ॥ वस्तुतस्तु जननेऽप्येवमेवस्यादिति मनूक्तेः गृहीतास्वित्यादिशंखवचने जाते दौहित्रके तथेति स्मृतेः ॥ सपिण्डजननस्यैवतद्धेतुत्वात् ॥ तेन वीजितोऽष्टमजनने चतुर्थकन्याजनने वानाशौचमितितत्त्वम् । अत एव कन्यानां त्रिपूरुषी सपिण्डतेति ब्रह्मपुराणं इदमशौचादिपरमिति विवरणमपि संगच्छते । नचैवमाचारविरोधः॥ स्मृतिविरोधेन तस्य दुर्बलत्वात् ॥ वस्तुतस्तु वर्णानामानुलोम्येन स्त्रीणामेव यदापतिः ॥ दशाहषट्त्र्यहैकाहाः प्रसवे सूतकं भवेदिति स्मृतेः प्रसवस्यैवाशौचहेतुत्वात् ॥ इदमशौचादिपरमिति सपिण्डतामरणे कन्यामरणमात्रपरमितितत्त्वम् ॥ अपि दातृग्रहीत्रोरसूतके मृतके तथा ॥ अविज्ञाते न दोषः स्याच्छ्राद्धादिषु कथञ्चन ॥ विज्ञाते भोक्तुरेव स्यात् प्रायश्चित्तादिकं क्रमात् । भोजनार्हे तु संभुक्ते विप्रै

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दोषविपद्यते यदि कश्चित्तदुच्छिष्टं शेषं त्यक्त्वा समाहिताः ॥ अत्रचास्य परकीयेण जलेन शुचयो द्विजाः अत्राशौचस्य नैमित्तिकत्वाद्दाचनिकत्वाच्च दातुरशौचं भोक्तुरशौचं वा दातृभोक्त्रोर्यदा न ज्ञायते तदा श्राद्धादिषु भोजने तूभयोरपि दोषाभाव एव यदातु स्वीयमशौचं दाता जानाति भोक्तापि जानाति तदीयमशौचं तदा लोभाद् भुंजानस्य प्रायश्चित्तमशौचञ्चा विज्ञात इतिपदादेवं च दातुरशौचे दात्रा विज्ञाते पि भोक्तुर्दोषाभाव एव ॥ तथाभोक्तुरशौचे भोक्त्राचाविज्ञाते दातुर्दोषाभावएवेति तत्वम् । शिष्टानां शंकाशुकतया परं तत्र विगानमित्यवसेयम् ॥ अथ दशरात्राः । सन्निपतेयुराद्यं दशरात्रमशौचमानवमाद्दिवसादिति बौधायनसूत्रेऽशौचोपान्त्यदिनपर्य्यन्तं द्वितीयाशौचपाते पूर्वमेवाशौचमितिबौधायनमतेन तु सहोत्तराशौचबोधकानां आद्यं भागद्वयं यावदित्यादिवचनानां विरोधो बौधायनवचनं बहुवचनश्रवणाद्बह्वशौचपातपरमन्यानि तु वचनानि द्वितीयसन्निपातपराणि विषयभेदादविरोध इति प्रकाशकृतस्तन्मंदम् ॥ अशौचमात्रशंकरेव्यवस्थाया अपेक्षितत्वेनोद्देश्यगतत्वेन शंख्यायां तात्पर्य्याभावेन यस्योभयं हविरार्तिमाच्छेत् स ऐन्द्रं पञ्चशरावमोदनं निर्वपेदित्योभयत्वस्यैवात्र बहुत्वस्याविवक्षणात्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अतएवोद्देश्यगतसंख्यायालिङ्गस्यवाऽविवक्षैव किन्तु विधे
यगतस्यैवलिङ्गस्यसंख्यायाश्चविवक्षेतिसिद्धान्तः । कथं
तर्हि यस्योभावग्नी अभिम्लोचेयाताम् तस्यपुनराधानं
प्रायश्चित्तिरित्यत्रोभयत्वविवक्षेतिसुहृद्भावेन पृच्छामः ।
उच्यते एकसंस्कारावरुद्धेऽपरसंस्कारानुदयनियमेनानुप-
पत्त्या तत्रोभयत्वविवक्षायावज्रलेपायितत्वात् एवञ्चविवक्षा
यामाकांक्षाविरहस्यैवप्रयोजकत्वात् । भट्टमतेतुसंस्कार
स्यव्याप्यत्वादितिनकोपिविरोधइतिसर्वंसुस्थम् । अ-
शौचसंकरेतु द्वाभ्यामेकमेवाशौचंजन्यतइत्यत्रसम्भूयार
म्भकतायामानाभावात्फलानुरोधेनच कल्पनेपिमानाभाव
एव तेनक्वचित् प्रथमस्यैवाभिवृद्धिः । क्वचिदुत्तरस्यैवहा
निरित्येवसारम् । आद्यं भागद्वयंयावदितिब्रह्मपुराणा
त् । अतएवयद्वेतिपरमगुरवोपिलिखन्तीति । देवलः ॥
अघानांयौगपद्येतुज्ञेयाशुद्धिर्गरीयसा । मरणोत्पत्तियो
गेतुगरीयोमरणंभवेत् । मरणस्यमरणत्वेनैवगरीयस्त्वं
नत्वधिकदिनव्यापकत्वेन । तथा । लघीयसापिसद्यःशौचे
नहि नगरीयोपिदशरात्रादिव्यापकंजननाशौचमत्येती ।
तदर्थः । अल्पदिनव्यापकंलघुबहुदिनव्यापकंगुरु । तयोःसं-
करेगुरुणात्यतीतेनशुद्धिः । जननाशौचेप्येवम् समानदिन
व्यापकयोर्मरणयोर्जननयोः । प्रथमार्द्धेद्वितीयसमानजा
तीयसम्पूर्णाशौचोपनिपातेप्रथमापगमेनैवशुद्धिः । द्वि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तोयाद्वैतच्छाव्यदिनपर्य्यन्तं तादृशद्वितीयाशौचपाते द्विती
यापगमेनैवशुद्धिः । आद्यं भागद्वयं यावत्सूतकस्यतुसूत
केद्वितीयेपतितेचाद्यात्सूतकाच्छुद्धिरिष्यते । अतऊर्द्ध्वं
द्वितीयात्तुसूतकान्ताच्छुचिः स्मृतः एवमेवविचार्य्यं स्यान्
मृतकेसूतकान्तरे इतिब्रह्मपुराणात् अन्तिमदिनेतुद्वितीय
स्यसजातीयस्य सम्पूर्णाशौचस्यप्राचीप्रकाशपूर्वसमये पाते
। एतद्दशाहाधिकदिनद्वयेनशुद्धिः । प्राचीप्रकाशसम
ये त्वेतादृशद्वितीयस्यपाते एतद्दशाहाधिकेनदिनत्रयेणाव्य
तीतेनशुद्धिः ॥ अहश्शेषेद्वाभ्यांप्रभातेदिनत्रयेणेतिशंख
लिखितवाक्यात् । नत्वशौचान्तदिनमादायद्विचिगणना
। विध्यनुत्रादवैषम्यापत्तेः । अशौचान्तदिनएवतुलघीयसः
पातेगरीयसाप्रथमेनैवशुद्धिः । ज्ञेयाशुद्धिर्गरीसेतिवचना
त् । वर्द्धितेपिदिनद्वये दिनत्रयेवालघीयसः पाते । एवंत
योरेवसजातीयसम्पूर्णाशौचान्तरपातेवापूर्वोक्त व्यवस्थाप
कवचनैः सम्पूर्णाशौचविषयकैरनालिङ्गनात् । अथद्वाव
शौचन्तुपश्चिमेनसमापयेदित्यादिवचने नसामान्यमुख
प्रवृत्तेनान्तरव्यपगमादेवशुद्धिरेषितव्या । त्र्यहाशौचेपि
सजातीयत्र्यहाशौचान्तरपाते । एवमितिसर्व्वंसमम् ।
अत्रयदिसम्भूयारब्धानां गुरुत्वं तदा खण्डाशौचपातवत्स
म्पूर्णाशौचपातेप्येवंप्रसङ्गः । प्रातिस्विकाशौचविवक्षा
यांगुरुत्वस्यैवासिद्धेः खण्डाशौचेपिव्यवस्थानुपपत्तेः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

किञ्च यहाशौचेऽपि त्र्यहाशौचान्तरपाते उत्तर व्यपग
मादेवशुद्धिरिति स्वलेखनविरोध इति चेत् । अत्रोच्य
ते । सम्पूर्याख्यानामेवगुरुत्वं तेनखण्डाशौचे नानुप
पत्तिः । इत्युक्ताशौचपातेषु तस्यैवनाश्यत्वकल्पनादे
काहपातेऽनयोः समानोदकयोश्चेति बौधायनवचनादेवव्य
वस्थेति विषमादिने आद्यंभागद्वयमिति ब्रह्मपुराणोक्तैवव्य
वस्था । अन्तिमदिने शङ्खलिखितोक्तैवव्यवस्था । तथा
त्पूर्वोक्तव्यवस्थाबोधकवचनैः सम्पूर्णाशौचबोधकैरनालि
ङ्गनात् अवशिष्टाशौचं तु पक्षिणीमेनसमापयेदिति सामा
न्यप्रवृत्तस्यादेवव्यवस्थेत्युक्तम् । अत एव संकरस्तु । जन
नयोर्वा जननमरणयोर्वा मरणयोर्वा तत्राद्यतृतीययोर्न्यू
नाधिकययोर्वेति विकल्पः संगच्छत इति । अपि दाहग्रही
षोऽश्वस्तके सति चान्तरा । अविज्ञाते न दोषः स्याच्छ्राद्धा
दिषु कथंचनेत्यनेन स्वरूपसतोऽशौचस्याकिञ्चित्करत्वेन
ज्ञातस्यैवतद्धेतुत्वादशौचस्य नैमित्तिकत्वाच्च ॥ भिन्नेषु
होतीत्यादौ नैमित्तिकहोमे तथा सिद्धान्तनादिति ॥ नच
सम्वत्सरस्य चैवमपि चरेत्कृच्छ्रं समाहितः । अज्ञातभुक्त
शुद्ध्यर्थं ज्ञातस्य च विशेषत इति मनुवचनेनाज्ञाते प्रायश्चि
त्तोपदेशाद्व्यभिचार इति वाच्यम् । विशेषवचनानालिङ्गि
तत्वे सति नैमित्तिकत्वस्य विवक्षितत्वात् । ज्ञातस्यापि
गाढमरणादेरशौचहेतुत्वे एकस्मिन्सपिण्डे मृते ज्ञातिचतद

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शौचाभ्यन्तरे सपिण्डमरणेऽप्येतन्मतं तस्य न संक
रः। अशौचयोरेककालोपनिपाताभावात्। एवञ्च प्र
थमाशौचापगमानन्तरं द्वितीयश्रवणेऽपि न संकरः। प्रथ
माशौचस्यातीतत्वात् द्वितीयाशौचस्य यावानवशिष्टः
कालस्तावदेवाशौचम्। तावदेवाशुचिर्भवेदिति निरप
वादवचनबलात्। अशौचयोर्यौगपद्याभावेनोभयथापि
बाध्यबाधकत्वानुपपत्तेः। अत एव वक्ष्यतो दशमाहपति-
ते संपूर्णाशौचान्तरेऽप्येकाहद्व्याहादौ ज्ञाते नाहःशेषे द्व्या
मित्यादिबोधितापकर्षमानाभावादिति। अचेतनेष्वशु
चिस्वामिकेष्वन्नादिषु चाशुचिस्वामिकत्वादेव कर्मानर्ह
त्वम्। न त्वन्नादिनिष्ठशुद्ध्यशुद्धीतयोरदृष्टरूपत्वात्। किं
चैतत्तरम्भाचास्वाशौचे ज्ञाते ऽन्नानामशुद्धत्वे भ्रमान्तरेण
कृतं कर्म्म तैरेवान्नैरशुचिद्रव्यकृतत्वाद्वैयर्थ्यं स्यात्। न स्या
च्चाक्रीतत्वात्कुर्व्वतां कर्म्मसिद्धिः। क्रयस्याशौचापलापकत्वा
श्रवणात्। तस्मादशुचेरन्नादीन्यशुचीन्येव। किं त्वशुचि
ना स्वामिना विनियोजितानि फलाजनकानि। शुचिना तु भ्रा
न्त्यन्तरेण वा प्राप्यमाणानि फलजननसमर्थान्येवेति तत्त्वम्।
काश्यपः। रात्रावेव समुत्पन्ने मृते रजसि सूतके। पूर्वमेव
दिनं ग्राह्यं यावन्नैवोदितो रविः। उदिते तु यदा सूर्य्ये ना
रीणां दृश्यते रजः। जननं वा विपत्तिर्वा यस्याहस्तस्य शर्व
री॥ इत्यनेनानुशासनेन पश्चिमयामे चेदाशौचज्ञाते श्रवण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कालादारभ्यद्वादशाहमगम्यगमनाशुद्धिरिति गौडानांभ्रमो निरस्तः । अशौचेपिचाण्डालादिस्पर्शनिमित्तकं स्नानंतत्क्षणमेवकार्य्यम् । नचमुहूर्तमप्यप्रयतः स्यादितिवचनस्यप्रयत्नापनेयाशौचपरत्वात् । नचशौचस्याधिकारिविशेषणस्याभावात्प्रवृत्त्यनुपपत्तिः । अननिषेधशास्त्रे शौचस्यानङ्गत्वान्नागम्यांगच्छेदितिवत् ॥ सूतिकासर्ववर्णानांदशरात्रेणशुद्ध्यति । ऋतौचनपृथक्शौचंसर्ववर्णेष्वयंविधिरितिचतुर्व्वर्णानामपिस्त्रीणामृतौत्र्यहमेवाशौचम् । तथाचमदेनरोगेण वाचतुर्थादिदिनेष्वपिरजोनुवृत्तौयथोक्तमृज्जलाभ्यामेवमलान्तरवत्क्षालनाचमनेनैवशुद्धिर्नतुतदनुवृत्तिपर्य्यन्तमशुचित्वमेव चतूरात्रेणस्नातांसर्वकर्माणिकारयेदितिपैठीनसिसूत्रस्यतृतीये रजकीप्रोक्ताचतुर्थेहनिशुद्ध्यतिदैवेकर्म्मणि पित्र्येचपञ्चमेहनि शुद्ध्यतीति मनुवचनस्यचनिरपवादस्मृतत्वादित्यवसेयम् ॥ एवंचरजस्युपरतेसाध्वीस्नानेनस्त्रीरजस्वलेतियत्श्रुतवचनमपास्तम् ॥ पैठीनसिः । सूतिकांपुत्रजननींविंशतिरात्रेणसर्व्वकर्म्माणिकारयेत् । मासेनस्त्रीजननीम् । सर्वकर्म्माणिपाकादिलौकिककर्माणि स्नातामितिवचनात् । विंशाहत्रिंशदहानन्तरंपुनस्तासांस्नानं पाकाद्यनुष्ठानार्थमित्यायाति वैधकर्मप्रतिबन्धकमशौचम मनूक्तम् । दशद्वादशाहादिरूपंचतुर्वर्णानामपिस्त्रीणांजननेप्येवमेवस्यान्निपुणांशुद्धि

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मिच्छतामितितद्वचनात् । रत्नाकरादयोप्येवम् नचब्रा
ह्मणीक्षत्रियावैश्याप्रसूतादशभिर्दिनैः गतैः शूद्राचसंस्पृ
श्याचयोदशभिरेवचेतिब्रह्मपुराणवाक्ये तथाजातेपुत्रेपितुः
स्नानंसचैलस्यविधीयते । माताशुद्ध्येद्दशाहेनस्नानात्तुस्पर्श
नंपितुरितिसम्वर्त्तवाक्ये । तथासूतिकासर्ववर्णानांदश
रात्रेणशुद्ध्यति । ऋतौचनपृथक्स्त्रीणांसर्ववर्णेष्वयंवि-
धिरितिप्रचेतोवाक्ये कंठतोर्थतोवाऽस्पृश्यत्वलक्षणाशौच
व्यपगमस्योक्तत्वान्नैवमितिवाच्यम् ॥ वचनबलादैकदै
वोभयनाशेप्यविरोधात् । अपिचरजःस्वलायेचतुराहे
णस्नातांसर्वकर्माणिकारयेदितिपैठीनसिवाक्यएवसर्वक
र्मपदस्यलौकिककर्मपरत्वादत्रापितत्परतैवतच्छुद्धेर्दैवक
र्माणिपित्र्ये चेतिमनुवचना दस्तुतया प्रकृतेसामान्यपर-
तायांबाधकाभावान्नतथा । भातोसि । मनुवचनस्याचा
पितुल्यत्वात् । किञ्चसर्वकर्मपदस्यदृष्टादृष्टार्थककर्मपर
त्वेशूद्रायापुत्रजननेविंशतिदिनोत्तरंदानाद्यधिकारोदुर्वा
रः स्यात् । तथाचपरत्वस्यानुक्ताशौचव्यपगमेभार्यायाःपैठी
नस्युक्ताशौचव्यपगमेवैदिककर्माधिकारइतिसहृदैषम्य
म् । नचैवमित्रास्तु यत्नाद्विरोधदयज्ज्वलेपायमानत्वा
दतएवसंकोचेमानाभावात्सर्व कर्मपदस्य दृष्टादृष्टोभय-
कर्मपरत्वमितिपरिशेषात्मतमपास्तम् । ततःसर्वमभिसन्धा
यैवरत्नाकरकृताकिंचिदित्याहुरितिवदता दृष्टादृष्टोभयक

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

र्मपरत्वंसर्वकर्मपदस्यप्रत्यादिष्टं एवञ्चपैठीनस्युक्ताशौचा
भ्यं तरेविंशाहेपि यदह्नार्व्वागेवास्त्रियापत्युः श्राद्धं का-
र्य्यमेव मरणोत्पत्तियोगेतुगरीयोमरणम्भवेत् इत्यनेनता
वन्नाद्विहितकर्म्मानधिकारितावच्छेदकरूपजननसम्बन्धेन
शौचस्यैवनाश्यत्वावगतेः। ननुतर्हिदशाहाद्वार्गपिपति
मरणाशौचान्तेतच्छ्राद्धापत्तिः। प्रसवाद्यधिकदशाहव्यापका
त्वलक्षणाशौचस्यमरणः सम्बन्धजन्यत्वेनरजस्वलाशौचवद
पवादकैरप्यनपवादात् एकचनिर्णीतइतिन्यायात् ॥ य
त्तुस्त्रीणांप्रातिस्विकरूपेणाशौचंमरणाशौचेननाश्यते ।
तेनान्तरापतिमरणे विंशाहाभ्यन्तरमेवतच्चापिपत्युः स्याद्
मितिकेषांचिन्मतम् पैठीनसिसूत्रंचैवर्णिकविषयकमेवे
तिप्राच्या स्तदुभयमपिमन्दमुभयत्रसंकोचापत्तेः ब्राह्मणी
क्षत्रियावैश्याप्रसूतादशभिर्दिनैः गतैः शूद्राचसंस्पृश्यात्र
योदशभिरेव चेत्यत्रमशूद्राविषयं ॥ सच्छूद्राचदशाहेनैव
स्पृश्याभवति । सूतिकासर्ववर्णानांदशरात्रेणशुद्ध्य
तीति । सूतौचनपृथक् शौचंसर्ववर्णेष्वयं विधिरि
तिवचनात् । नचसर्ववर्णपदएव सङ्कोचोऽस्तुविनिग
मनाविरहात् सूतकाशौचस्यचकारोपष्टब्धसर्ववर्णानुरोधेन
प्रथमसर्वपदासंकोचस्यान्याय्यत्वात् ॥ अहं मरणावधिक
षष्ठदिनादौस्त्रियापत्यनुमरणेकृतेपि प्रथमाशौचव्यपगमे
नैवशुद्धिः। सांकर्य्यस्यैवाभावादितिसुव्यक्तमेव। तुल्येवय

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिस्तेषामतिक्रान्तेतथैवच। उपनीतेतुविषमंतस्मिन्नेवा तिकालजम् तस्मिन्नेवेति विशेषविशेषविधेरेकाहाद्यति क्रमे नपुनः किंचिदशौचम् किन्तुस्नानमात्रमेवेत्यर्थः॥ कन्यावालयोर्गोत्रगदयाशौचकालितोते म स्नानमप्यनविधा नात्। शिरोषस्याशौचेतुनैवमिति। जननेप्येवमेव स्यान्नि पुणांशुद्धिमिच्छतामिति मनुवचनाज्जननमशौच निमित्तंतेनजायमानस्यापेक्षयाष्टमस्यन सपिंडत्वप्रयुक्ता- शौचमितिद्रष्टव्यम्॥ इहमनुः॥ वाचोयपवि- भिद्यन्तेगिरिर्वाव्यवधायकः महानद्यन्तरंयत्र हेशा- न्तरमुच्यते॥ वाकारोऽवसमुच्चये। वास्याद्विकल्पो पमयोरेवार्थेचसमुच्चये। इति विश्वकोषात्। नतुविक ल्पेशाक्यभेदापत्तेः। तेनचितयविशिष्टस्य देशान्तरत्व म्। आहितःपूत आहवनीयोभवतीतिवत्॥ तथा देशनामनदीभेदान्निकटोपिभवेद्यदि। तत्तु देशा- न्तरंप्रोक्तं स्वयमेवस्वयम्भुवा॥ देशनामित्युपलक्ष- णम्। तेनचितयवैशिष्ट्यमत्रविवक्षितम्। इहस्प- तिः। देशान्तरंवदंत्येकेषष्टियोजनमायतम्। चत्वा- रिंशद्वदंत्येकेत्रिंशदेकेतथैवचेति इदमपाकृतम्॥ त्रि- तयवैशिष्ट्ये त्रिंशद्योजनाभ्यन्तरे द्वितयवैशिष्ट्ये त्रिंशद्यो जनोपरि एकवैशिष्ट्ये चत्वारिंशद्योजनोपरि वाणीगिरि महानदीभेदाभावेपिषष्टियोजनान्तरालेवैदेशमपिवक्त-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्यसद्यः शौचम् । तथाचपैठीनसिः । देशान्तरस्मृत-स्यसद्यःशौचं वैवस्वतआह । पारिभाषिकदेशएव मरणज्ञानंसद्यः शौचहेतुस्तेनकीरलेस्मृतस्य मिथिलायां सद्यःशौचम् । अतएवमिथिलास्थतदानीम्मिथिला-स्थस्यापिकीरलएवश्रवणेसद्यः शौचमेव मिथिलास्थस्या पि कीरलस्मृतस्य कीरलएवश्रवणेतुनसद्यः शौचम् ॥ देशान्तरत्वस्यानुगततया सर्व्वथैवावध्यपेक्षायां मरण श्रवणाधिकरणीभूतदेशस्यैवावधित्वेनवक्तव्यत्वादिति । अत्रविशेषानभिधानान्मातापित्रोरपि मरणे इयमेवव्यव स्थेति यत्तुपितरौचेन्मृतौस्यातांदूरस्थोपिहिपुत्रकः॥ श्रु त्वातद्दिनमारभ्य दशाहंसूतकीभवेदिति पैठीनसिवचनं पितृपत्न्यामपेतायां मातृवर्ज्जं द्विजातयः संवत्सरेव्यतीते तुत्रिरात्रम शुचिर्भवेदिति । स्मृतिवचनञ्चविरुध्यतइति तन्न एतयोरनाकरत्वात् मनुःअतिक्रान्ते दशाहेतुत्रिरा त्रमशुचिर्भवेत् संवत्सरेव्यतीतेतुस्पृष्ट्वैवापोविशुध्यति । गोतमः इष्ट्वाचोर्द्ध्वंदशम्याः पक्षिणी ॥ पक्षिणीचदिनद्वयस हितारात्रिः आगामिवर्त्तमानाहर्य्युक्तायांनिशिपक्षिणीत्य भियुक्तस्मृतेः रात्रिमरणश्रवणपक्षेपितथैव पूर्व्वमेवदिनं ग्राह्यमितिवचनात् । देवलःअशौचाहेव्यतीतेतुबन्धुश्चेच्छ्रू यतेमृतः तत्रत्रिरात्रमाशुच्यंभवेत्संवत्सरान्तरेऊर्द्ध्वंसंवत्स रार्धान्तुश्रूयतेचेन्मृतःस्त्रकैः भवेदेकाहमेवाचतच्चसंन्यासि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नान्तु॥ अत्र वर्षं द्विधा विभज्य क्रमेण भागद्वये त्र्यहपक्षिण्ये
काहा वत्रत्यायाः समं स्यादस्तु तत्त्वा इति केचित् तन्न ।
देवलवचनेनाद्यषट्के त्र्यहस्यास्य तत्त्वात्समं स्यादिति न्याय
स्यानवतारादिति किन्तु प्रथमासंपावत् त्र्यहम् देवलेनो
त्तरार्द्धेऽन्यथाविधानात् सप्तमाष्टमनवममासेषु पक्षिणीऊ
र्ध्वं दशमत्वादित्यविशेषस्मृतेः दशमैकादशद्वादशेषु मासेषु
एकाहं ऊर्ध्वं संवत्सराद्वीदिति स्मृतेः समं स्यादस्तु तत्त्वादि
त्यधाचितन्याय। इति संवत्सरान्तरं तु श्रवणे स्नानमात्रं
संवत्सरान्तस्त्वेकरात्रेण ततः परं स्नानमात्रेणेति विष्णुव
चनात् मनुः निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च सवा
सा जलमाप्लुत्य पूतो भवति मानवः अत्र त्र्यहाशौचादं ज्ञातिम
रणस्य दशाहाभ्यन्तरे चतुर्थदिनादार्वाक् प्रत्र्यणे त्र्यहमेवाशौ
चं निर्दशमित्यभिधानात् दशाहादूर्ध्वं तु श्रवणे स्नानमात्र
मिति परमगुरुचरणाः युक्तञ्चैतत् अत एव रत्नाकरे अति
क्रान्ते दशाहे वै त्रिरात्रमशुचिर्भवेदित्यत्र्यहं सम्पूर्णाशौ
चाधिकारिणि सपिण्डे द्रष्टव्यम् स्वे स्वे इत्यभिधानान्निर्द
शमित्यादिनाविशेषाभिधानाच्चेत्युक्तम्। अन्यथा तद्विरो
धः स्यात् वस्तुतस्तु सपिण्डासपिण्डोभयपरं तेन सपिण्डम
रणे संवत्सरान्तरमेकवाक्यतयाऽसपिण्डमरणे च त्र्यहैका
हानन्तरं स्नानमात्रेणाशुद्धिरित्येवं सर्वाविरोधेन रमणीय
म्। अन्यथा तस्मिन्नेवातिकालजमिति वचनविरोधः स्यादि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

ति। ननु सद्यः शौचस्याहश्शौचव्यापकत्वं सद्यःपरुत्परार्य्यै-
षमः इति पाणिनीयनिपातनबलात्। न च सद्यःशौचं तथैवाह
इत्यादि परिसंख्याविरोध इति वाच्यम् एकाहपदस्या-
होरात्रपरत्वादि। तच्चेन्नैवम्, एवं हि संवत्सरे व्यतीते तु स्पृष्ट्वै-
वापो विशुध्यतीत्यादिबोधितस्नानव्यापकाशौचस्याहःशौ-
चभिन्नत्वे सद्यःशौचं तथैकाहस्त्र्यहश्चतुरहस्तथा षड्दश-
द्वादशाहश्च पक्षो मासः षण्मासाश्चैव च मरणान्तं तथा चान्यद्दशप-
क्षास्तु सूतक इति दक्षवाक्ये कथं विभागः स्यात्। तथा-
ऽकृते सद्यःपक्षस्याभावात्। अवयवत्वमेव सद्यः समर्पितत्व-
मागिस्त्यधियुक्तास्मृते निपातस्तनस्य दक्षविरोधे नान्यप-
तात्पर्य्यात्। परिशिष्टयशौचेत्वगत्या विभागभंग इति सुवचनमे-
वेति॥ * ॥

अथ सापिण्ड्यम्। शंखः। सपिण्डता तु सर्व्वेषां-
गोत्रतः साप्तपौरुषी। पिण्डश्चोदकदानञ्च शौचाशौचं तदा-
नुगम्। गोत्रत इति गोत्रं सन्ततिः तेन बीजिनमारभ्य सप्तम-
पुरुषमभिव्याप्य सर्व्वेषां सन्तानिनां सन्ताननाञ्च सापिण्ड्य-
म्। एवं सत्यपि सप्तपुरुषाधिकत्वे तेन समं सप्तमान्तर्गतस्यापि
पिण्डं निवर्त्तते संयोगवद्भयनिष्ठत्वात् पिण्ड इह शरीरम्।
तेन समानमेकं शरीरं येषान्ते सपिण्डाः। एतच्च स्तुजनकश-
रीरानुबन्धात् तदुक्तं गर्गोपनिषदि अस्थिस्नायुमज्जानः पि-
तृतः त्वङ्मांसरुधिराणि मातृत इति। पत्नीनान्तु पत्या सम-

स्त्रिभिरश्नीतीत्यादि श्रुतिवशात् तत्सपिण्डैश्चतुर्था दैव एवं साक्षात्परम्परासाधारणमिदं सापिण्ड्यं नामसप्तमपुरुषम् । एवञ्च सतिपैतृष्वस्त्रेयादेरशौचत्र्यहवचनवशात् । मिताक्षराप्येवम् । नन्वसपिण्डपदस्तन्त्ररीत्यायौगिकं । योगश्चातिप्रसक्तो ऽष्टमादेरपिपरम्परयैकशरीरान्वयसम्भवात् । अत्राहुः वीजिनमारभ्यसप्तान्यतमत्वस्याप्रयोगोपाधिरूपस्यसम्भवात् । पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथासपिण्डतानिवर्त्तेतसर्व्ववर्णेष्वयंविधिः सपिण्डपदस्ययोगाश्चात्युपाधिसंवलितयोस्तन्त्ररीत्या सप्तमान्यतमत्वावच्छिन्ने नियमितेऽर्थेऽर्थादष्टमादिसापिण्ड्यनिषेधसिद्धेरूर्ध्वं निवर्त्ततइत्यनुवादः यथाएवंकृत्वोक्तेयमित्यत एव मन्त्रस्यान्यथापाठे निषिद्धे नगिरागिरेति ब्रूयादित्यनुवादः । मातुलादिषूक्तसापिण्ड्यसत्वेऽप्यशौचादिभेदोवचनवशादिति । यद्वा तत्प्रथं खण्डवचने लेपभागिनमादाय सप्तान्यतमत्वम् अतएव लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः पिण्डदस्सप्तमस्तेषांसापिण्ड्यं साप्तपौरुषमितिमत्स्यपुराणमपि संगच्छते इदन्तु सापिण्ड्यं निरूपणीयपितृपिण्डान्वयम युक्तं तदैव लेपभाजामन्वयात् । स्वपितृवंश्यातिरिक्तानां नसम्भवतीत्यतो न पूर्ववदत्रातिप्रसंगशंका । मनुः सपिण्डता तु पुरुषेसप्तमे विनिवर्त्तते समानोदकभावस्तु जन्मनाम्नोरवेदने सप्तमइति एतानांमध्ये सप्तमे तेन पिण्डदेऽष्टमे इत्यर्थः

यद्वा सप्तमे सति वीजितोऽष्टमे निवर्त्तत इत्यर्थः आद्यात्रे सर्व्वे-
षामेव वर्णानां विज्ञेया सप्तमी पौरुषी सपिण्डता ततः पश्चात्स
मानोदकधर्म्मता। ततःकालवशान्नवस्मृतेस्तद्गोत्रनाम
भिःसमानोदकसंज्ञा ततावन्मात्रापि नश्यति ॥ एतच्च वी-
जितस्सप्ताद्यतमाःसपिण्डास्तएवसम्पूर्णाशौचभाजः तदुक्तं
वृहस्पतिना दशाहेनसपिण्डास्तुशुध्यन्ति प्रेतसूतके त्रिरा-
त्रेणसकुल्यास्तुस्नानमात्रेणगोत्रजाः दशाहेनेतिस्वस्व
जात्युक्ताशौचोपलक्षणम्। अष्टमपुरुषादारभ्य दशमप
र्य्यन्तं जन्मनाम्नोरविज्ञानेऽपिसमानोदकास्तएवत्र्यहाशौच
भाजः त्रिरात्रेणसकुल्यास्तुस्नानमात्रेणगोत्रजा इति वृहस्प
तिवचनात्। शुद्ध्येदसपिण्डेत्रिरात्रमित्याश्वलायनवचना
च्च। असपिण्डेसकुल्य इति तद्विवरणात्। सर्व्वेषामेववर्णा
नांविज्ञेयासप्तमीपौरुषीसपिण्डताततः पश्चात्समानोदक
धर्म्मेतीति। कल्पतरुप्रभृत्यतिपादनात् सुमन्तुः आद्याया
नामेकपिण्डस्वधानामादशमाद्धर्म्म विच्छित्तिर्भवत्यास-
प्तमादृक् अविच्छित्तिर्भवत्यातृतीयात्स्वधाविच्छित्तिर्भ-
वत्यन्यथा पिण्डाशौचक्रियाविच्छेदाद्वन्नामसत्त्वयोर्भवति
एकपिण्डस्वधानामिति निरूपणीयैक पिण्डस्य सान्व-
यिनाम् धर्म्मोऽशौचादिः आदशमात् परतः अप्यदशमप
र्य्यन्तमेकपिण्डान्वयो नेत्याशंक्य यत्तयकार्त् त्रयःपुरुषाः।
जीवन्तितस्यैवपिण्डान्वय इति रत्नाकरउक्तम्। आसप्तमा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

दितिचिरविदेशस्थपत्रादागतदायादविषयम् । मातृती यादितिस्वधापिण्डः अन्यथा तच्चतुर्थादर्वाक्पिण्डस्या ष्टमादर्वाक्पुरुषस्य एकादशादर्वागशौचस्य निवृत्तौ पापी यान् भवतीत्यर्थः हन्त्वैवं दशमपुरुषपर्य्यन्तमुक्तविशेषणव तां ब्राह्मणानां पिण्डं सम्पूर्णाशौचं च स्यादुक्तवचनवला दितिचेत् । एवं समानोदकानां क्रियाहीनां सप्तमास्यन्तरम- कथं विच्छित्तिरुक्ताभेदिति तन्निश्चयाभिधानस्य स्यात् । नचै- तद्विशेषणानां धर्म्मविच्छित्तिमात्रपरत्वम् अग्निमयोरपि सम्बन्धा कांक्षायामितरान्वयस्यापरिहार्य्यत्वात् । अथ सप्तमाभ्यन्त रेदायनिवृत्तौ वाक्यान्तरविरोधः स्यादिति चेन्न तस्य सम्य गपि सप्तमोत्तरं सपिण्डतानिवृत्तौ उक्ततरवचनविरोध इति तत्त्वाद्दूरव्याख्यानात् मितिएकपिण्डत्वमानमितिद्वयमपि पञ्चमीसप्तम्यनुवादः तेन दशमपुरुषपर्य्यन्तमशौचं परन्तु वाक्यैकवाक्यतया सप्तमपर्य्यन्तं पूर्णाशौचं ततश्चादशमं त्र्यहम् तच्चैव जन्मनाम्नोरवेदने पक्षिणाशौचम् एकाह- स्तु सपिण्ड इति हारीतवचनात् ततः कालवशान्नस्मृती तद्गोत्रनामभिः समानोदकसंज्ञा तुलाब्धाचापिनश्यती तिस्फुटमुपदर्शनात् ततः स्वपूर्वत्वेनज्ञायमानागोत्रजा- स्तेचस्नानमात्रापनेयाशौचभाजः स्नानमात्रं गोत्रजा इति हि हस्पतिवचनात् । तदतिक्रम एव पापोपदेश इत्येव सर्व्वाविरो धेन रमणीयम् । येतु पश्चिमोत्त्वसपिण्डयोनिसम्बन्ध इत्यविवे

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चितगौतमसूत्रात्समानोदके गोत्रजे वा पक्षिण्यथ वा चान्त-
न्ते तेतु बृहस्पतिहारीतयोर्व्विरोधेनभ्रान्ताः । सूत्रेच
सामानाधिकरण्येनान्वयो मातुलपक्षिणीत्याद्यैकवाक्यता
बलात् । रत्नाकरादयोऽप्येवम् । मात्स्ये सप्तमाद्यभिधायावि
भक्तधनास्त्वेते सपिण्डाः परिकीर्त्तिताः इदन्तु धनग्रहणोचि
तसापिण्ड्यमेव । यतोऽविभक्तधनैः सपिण्डधनं ग्राह्यमिति
भावः । मात्स्ये सपिण्डता तु कन्यानां सवर्णानां त्रिपूरुषी इद-
शौचादिपरम् ॥ अतएव सप्तमीपर्य्यन्तं मातृसपिण्डा सा-
चाविवाह्येति व्यवस्था । अन्यथा पितृसम्बन्धात्सप्तमादविवा
ह्येति सुमन्तुविरोधः स्यात् । नचैवम् । मातृतः पञ्चमीं हित्वाइ
त्यादिविरोधः स्यात् । तस्मान्मातृसपिण्डातिरिक्तविषयक
त्वादिति ॥ मनुः दिवाकीर्त्तिमुदक्याञ्च सूतिकां पतितन्त
था शवं तत्स्पृष्टिनञ्चैव स्पृष्ट्वा स्नानेन शुध्यति ॥ तत्स्पृष्टिन
मित्यत्र दिवाकीर्त्त्यादयः परामृश्यन्ते । चाण्डालादिस्पृष्ट-
नस्पर्शने स्नानं । तदाह गौतमः । पतितचाण्डालसूतिकोद
क्याशवस्पृष्टितत्स्पृष्ट्युपस्पर्शने सचैलमुदकोपस्पर्शनाद्धि
शुध्यति उपस्पर्शनात् स्नानात् सचैलमिति श्रवणात् । देवलः
उपस्पृश्याशुचिस्पृष्टं तृतीयं वापि मानवः । हस्तौ पादौ च तोये
न प्रक्षाल्याचम्य शुध्यति । उपस्पृश्येति श्वपाकादिस्पृष्टं नस्पृ
ष्टं स्पृष्ट्वा हस्तादिक्षालनाचमनाभ्यामेव शुध्यतीत्यर्थः । इद
ञ्चाबुद्धिपूर्व्वकविषयमतो न गौतमविरोधः । बुद्धिपूर्व्वक

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

स्पर्शे तु गौतमोक्तैव व्यवस्था । चतुर्थकर्मकरणे पर्व आचम-
नमपि नाशौचस्यादिति ॥ पितुरसवर्णस्यापि तत्पर्यायं शू-
द्रापुत्रेण कार्यमि ब्राह्मणेन कर्त्तव्यं शूद्रस्य त्वौर्द्ध्वदैहिकं शू-
द्रेण वा ब्राह्मणस्य विना पारशवात्क्वचिदिति वचनात् । औ-
र्द्ध्वदैहिकमित्यस्य मरणोत्तरकर्मपरत्वात् । सवर्णेभ्यो
जलं देयं नासवर्णे कदाचनेत्यादिनिषेधस्य तदितरपरत्वा-
दिति ॥ * ॥ * ॥

तर्पणे तिलाश्च नावश्यकाद्दर्भाश्चावश्यकाः । सर्वे-
षामन्वारब्धचैवर्षिकानां नियता एव तिलानामप्यलाभे-
तु सुवर्णरजतान्वितं तदलाभे निषिञ्चेत्तु दर्भैर्मन्त्रेण वा-
प्यथेति मरीचिवचनात् ॥ प्रेताधिकारे आश्वलायनः । नै-
तस्यां रात्रावन्नं पचेयुरित्येवमक्षारलवणाशिनश्च स्युर्द्वाद-
शरात्रं महागुरुषु ॥ न पचेयुरिति पाकनिषेध एव । न तूपवा-
सविधिरपि प्रथमेऽह्नि द्वितीये च सप्तमे नवमे तथा । ज्ञातिभिस्
सह भोक्तव्यमेतत्प्रेतेषु दुर्लभमिति मरीचिवचनेन सकलकु-
लस्यैव तदानीं भोजनविधानादिति केचित् तन्न अघवत्स-
रे त्र्यहमनश्नन्त आसीरन् क्रीतोत्पन्नेन वा वर्त्तेरन्निति वशि-
ष्ठवचनेन भक्तस्य त्र्यहोपवासविधानात् तदन्ताद्युपवासापक-
क्षेः अत्यन्ताभक्तस्य प्रथमदिनेऽपि पाकाभावो नियतः प-
रन्तु याचित्वा लब्धस्य क्रीतस्य वा फलमूलादेर्भोजनम् त-
न्नैवमरीचिकथितबन्धुसाहित्यमिति तत्त्वम् । अघवत्स-

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्तैवेह जलकृते श्मशानारभ्य तत्तल्लवणाभ्येति विशे-
षणसमासो लाघवान्न त्वितरेतरयोगः प्रतिपत्तिगौरवा
त् लाक्षणिकत्वात्लाक्षणिकत्वेनाकारभेदापत्तेरत एवचो-
भयनिष्ठत्तीमत्याप्यायां विवाहनियमेऽस्याश्रवणाधिनी
स्यातामित्याश्वलायनएवनद्वयं पठति तस्यएवञ्चा श्वार-
णपाश्रयैवनिष्ठत्तिर्न्न तस्यैवघवादेरपीति रत्नाकरादयोप्येव
म् पिण्डदानेब्रह्मपुराणम् अन्नमयं भाण्डमादायनवं स्नातः
सुसंयतः लगुडं सर्व्वशेषञ्च गृहीत्वातोयमानयेत्॥ अथषष्ठ
यवं यदुद्धृतं जलं कलशादिनासमादायेति यद्विवरणं त
च्चिंत्यम् ग्रहणमात्रस्य विहितत्वात् प्रत्युतपादेन पाणिना-
वापियश्चायसत्वेणचोदकंनहन्यान्नापिवदेन्नयञ्चोभयेद्बुधः
इतियाज्ञवल्क्येन तद्धननस्यनिषेधात् ॥ विशेषस्तुचिमपुत्र
दैवात्सगोत्रे यावदाह्निकतेकृत्विमपुत्रेण पञ्चमदिने सपिण्ड-
नेकृतेपि सगोत्रेण यावदशौचं प्रेतपदेन पिण्डादेयाः प्र-
थमेऽह्नियो दद्यात्सदशाहं समापयेदित्यादि स्तत्र प्रेतत्व-
स्याप्रयोजकत्वात् प्रेतन्तुनामगोत्राभ्यामुत्सृजेदुपतिष्ठ-
तामित्यनेनप्रथमक्रियायां तदुल्लेखावश्यकत्वादिति के-
चित् तन्न व्याघ्रपादवचने जात्युक्ताशावाशौचान्तदती-
याहलक्षणायां पञ्चमदिनस्यैव सपिण्डनकालत्वाभि-
धेः प्रकृतविचारस्यैवारण्यकदितत्वादिति वस्तुतस्तु प-
ञ्चमदिनेपि सपिण्डनेतत्प्रकाशनासामर्थ्येन तदुल्लेख-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्थानावश्यकत्वात् ॥ सपिण्डनोत्तरमुदकुम्भदानवदि-
ति हेमाद्रिः अन्तरितस्य द्वादशपञ्चदशवर्षाण्यज्ञातसत्वासत्वस्य
पुत्रादिनासतिसम्भवे कृष्णैकादश्यां पर्णनरदाहः का-
र्य्यः पर्णनरदाहदिनादारभ्य त्र्यहमशौचम् एवंपर्ण-
नरं दग्ध्वा त्रिरात्रमशुचिर्भवेदितिवचनात् । तच्चतुर्थ-
दिने श्राद्धं पञ्चमदिने सपिण्डनम् । पर्णनरदाह-
तिथौ सांवत्सरिकम् तदाहशतानन्दरत्नमालायां यमः
गतस्यन भवेद्वार्त्ता यस्य द्वादशवार्षिकी प्रेतावधारणं तस्य
कर्त्तव्यं सुतबान्धवैः हेमाद्रिनिबन्धे जातूकर्ण्यः पितरि-
प्रोषिते यस्य वार्त्ता न गृहमागता ऊर्ध्वं पञ्चदशाद्वर्षात् कृत्वा
तत्प्रतिरूपकम् कुर्य्यात्तस्य च संस्कारं यथोक्तविधिना पु-
नः अत्र च देशापेक्षया विकल्पः केनापि प्रकारेण मृतानां
सजातीयविजातीयानां शवानां विशीर्णावयवानां सन्नि-
पातेऽधिकारिणा न सर्वेषां दाहः कार्य्यो मानाभावान्ना-
पि पितुरेव परिचायकाभावात् । अतएव तदवस्थायाम-
पि पितुः पर्णनरदाह एव । अस्थ्नामलाभे पर्णानि सक-
लान्युत्तमया हृता । दाहयेदस्थिसंख्याभिस्ततः प्रभृति-
सूतकमितितयदशान्ततेरितिदिक् अमावास्यायां पितृस्यो-
दद्यादिति गोतमसूत्रे स्वतन्त्रविधित्वाद्भाव पश्चाद्दे-
प्राप्ते राशौ श्राद्धं न कुर्वीतेति मानवो निषेधः प्रसज्यप्र-
तिषेध एव । अन्यथा न कुर्वीतेति विधिवैयर्थ्यापत्तेः-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पर्य्युदासापत्तेश्चेतिगौडास्तन्मन्दम् । वहुभेदवैय-र्थ्यीभावात् ॥ नञः प्रसज्यप्रतिषेधार्थकत्वेवाक्यभे-दापत्तेश्च किञ्च ऊर्द्ध्वं मुहूर्तात्कुतपाद्यन्मुहूर्तचतुष्टय-मित्यादिवचनानांतथा पर्य्युदासावोधकानां गौतम-सूत्राणाञ्चसर्वेषामेकवाक्यतास्यादन्यथा त्वदुक्तरी-त्याभिन्नभिन्नार्थकत्वे वाक्यभेदःस्यादिति । प्रथमा-दिनानवमदिनानन्तरं पितृमरणे ज्ञातेऽन्तिमदिने एवसकलपिण्डादेयाः । अंतिमपिण्डानुरोधात् । नतुप्रागेवपिण्डानां दानंमानाभावात् । दैवादग्येन-दाहेकृतेपश्चादधिकारिणिचागतेपि दाहकर्त्रीपिण्डादे-याएव ॥ असगोत्रःसगोत्रोवायदिस्त्रीयदिवापुमान् प्र-थमेऽहनियोदद्यात् । सदद्यांद्दंसमापयेदित्यादिनातस्य विहितत्वात् तथाधिकारिणापिण्डादेयाएव । अ-कृतवाप्रेतकार्य्याणि प्रेतस्यधनहारकः वर्णानांयदुक्तं-प्रोक्तंतद्व्रतंनियतश्चरेदितिस्मृतेः ॥ पितुः पुत्रेणकर्त्त-व्यापिण्डदानोदकक्रिया । इत्यादिस्मृतेरसंकुचि-तस्यवणाच्च । नचशरीरद्वयोत्पत्तिः । द्वितीयस्या-पिप्रथमारब्धशरीरपूरकत्वात् । भवतुवाद्वयंकिंतावते-ति ॥ रात्रौमरणेजातेज्ञातेवा निषिद्धकालेपिण्डानदे-याइतिस्मृतिसारमतं तन्नमनोरमम् राहुदर्शनसंक्रा-तिविवाहात्ययवृद्धिषुस्नानदानादिकंकुर्य्यान्निशिकाम्यव्र-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

तेषु चेति जाबालेन तदानीमपि तद्दानाभ्यनुज्ञानात् । मै-
थिलास्तु पक्षस्तु न तथा तद्दानं तदानीन्न कारयन्तीत्यन्यदे-
तत् एवञ्च कृतभोजनेनापि पित्रादिमरणे पिण्डा देया एव
यथाशौचवद्भोजनजन्याशौचस्य तथाप्रतिबंधकत्वात् ।
अशौचमुपक्रम्यैव प्रवृत्तेराचाराच्च । स्त्रियास्तु रजोयो-
गे पिण्डा न देयाः । अशौचापवादकैः संकल्पादिभि-
रपि रजसोऽनपवादात् । अंतरा तु रजोयोगे पूजाम-
न्येन कारयेदिति मत्स्यपुराणे पूजापदस्यन्यायतौल्ये-
न प्रवृत्तिरूपकसंपरत्वात् । नैवं मेधमुपागा इति वि-
शिष्य निषेधाच्च । न च कर्तुः स्नातकालिकोऽशुद्धिरशुद्धः
पुनरेत्य सेति वचनात् तस्यास्तदानीमधिकार इति वाच्यं
तस्य प्रकृताशौचाप्रतिबंधकत्वे कृतत्वात् भर्तुः पिण्डप्रदा-
ने तु साध्वी चेद्रजस्वला वस्त्रं त्यक्त्वा पुनः स्नात्वा सैव दद्याच्चपू-
रकमिति शांता तपनाख्यापठितं वचनमनाकरत्वादप्रमाण-
मिति ॥ ॥ अनग्नयो गृहिणः पूर्णिमासु मुण्डन-
माचरन्ति तच्च किंप्रमाणमिति चेदुच्यते न सीदेत्स्नातको वि-
प्रः क्षुधा युक्तः कथञ्चन ॥ न जीर्णमलवद्वासा भवेच्च वि-
भवे सति ॥ राजतो धनमन्विच्छेत्संसीदन्स्नातकः क्षु-
धायाज्यान्तेवासिनो वापि न त्वन्यत इति स्थितिः क्लृप्तकेशन-
खश्मश्रुर्दान्तः शुक्लाम्बरः शुचिः स्वाध्याये चैव युक्तः स्यान्नि-
त्यमात्महितेषु च वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुम् ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यज्ञोपवीतं वेदञ्च उभे रौक्मे च कुण्डले नेच्छेतोद्यन्तमादि
त्यमस्तं यान्तं कदाचन ॥ नोपरक्तं न वारिस्थं न मध्यं नभ
सो गतम् इत्यादि मनुवचनमेव प्रमाणम् न चैतद्वचनं सा-
ग्निपरं मानाभावात् । अत एव ब्रह्मचारिकाण्डे अव्रतेभि-
भाषणमथ कल्पे व्रतक्रिया ब्रह्मचर्य्यं चर्य्या च त्रिविधं दम्भ-
लक्षणम् ॥ अत एवापस्तम्बोपि पौर्णमास्यां वैरमणे मात
रि पितरि चाचार्य्ये च स्नानं तावन्तं कालमनुभाविनाञ्च-
परिवापनं न समावृत्ता वपेरन्नन्यत्र विहारादित्येके अथा-
पि ब्राह्मणो रिक्तो वा एष अनपिहितस्तस्यैतत्पिधानं यच्छिखे-
ति ॥ वैरमण इति मातरि पितर्य्याचार्य्ये च वैरमणो विर
मणासम्बन्धिनि मरणभाजि सति पुत्रस्य शिष्यस्य च तावन्तं-
कालं दशाहं व्याप्य स्नानं मज्जनमाचं अशौचान्ते शिरोमुंडनं
च एवं पौर्णमास्यामपि गृहस्थानां शिरोमुंडनमिति त-
दर्थात् न समावृत्ता इति एके त्वाचार्य्या मन्यन्ते समावृत्ताः
कृतसमावर्त्तनाः पुरुषाः मातापित्राचार्य्यमरणे न शिरो-
मुंडनं कारयेयुरित्यर्थः अत्र हेतुमाह एष वा ब्राह्मणः शिखाऽ
पाच्छादनशून्यः सन् रिक्तो भवति तस्य ब्राह्मणस्य यच्छिखा
स्ति तदेवाच्छादनमिति तेन केशानां वपनं मातापितृमरणे-
आचार्य्यमरणे च गृहस्थानां नास्तीत्येके आचार्य्या मन्यन्ते
त एवाचार्य्या विहारो दर्शपूर्णमासाद्यागस्तत्र वपनं प्रति
प्रसुवतीऽन्यत्र विहारादिति तदिदमेकेषां मतमयुक्तं प्रथा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

गेतीर्थयात्रायामित्यादि विशेषवचनबोधितवपनस्य सर्वत-
न्त्रसिद्धत्वात् ॥ किञ्चापस्तम्बे नैकोल्लितिवद्दर्शपौर्णमा-
स्यादिवपनस्य सर्व्वाचार्य्यसिद्धत्वं सूचितम् ॥ अकाले-
ष्वथवाकालेतीर्थश्राद्धं तथा नरैः प्राप्तैरेव सदाकार्य्यं कर्त्त-
व्यं पितृतर्पणम् ॥ अकालेऽमावास्यादिभिन्नकाले न-
नु रात्र्यादौ बाधसापेक्षतापत्तेः यत्तु अकालइतिनिषेधो
पिरात्रः कापि तिथिर्व्वा नश्राद्धकालः सर्व्वेषेव श्राद्धविधाना
दिति तस्यादकालत्वे न रात्र्यादिकमेव प्रतिप्रसूय विधीय-
त इति भ्रान्ताः तन्न सर्व्ववारतिथीनां श्राद्धकालत्वेप्यावश्य
कश्राद्धकालत्वाभावात् इदन्तु तीर्थश्राद्धमावश्यकम्
तेनायमर्थः यस्मिन्नपि काले प्रतिपदादौ श्राद्धमनावश्यक-
म् तदापि तीर्थप्राप्तिपक्षे श्राद्धमावश्यकमिति अपके चिदा-
हुः यत्तु दैवगत्या सायाह्नादौ तीर्थलाभस्तथ्यतत्प्राप्तिनि-
मित्तश्राद्धबाध एव तद्दिने विहितमुहूर्त्ताभावात् उत्तर-
दिने च प्राप्तिनिमित्तत्वाभावादिति । वस्तुतस्तु तथाप्य
स्तद्दिने विरोहितमुहूर्त्तं इयानन्तरं श्राद्धमुचितमेव प्रा-
प्त्युत्तरविहितमुहूर्त्त एव श्राद्धविधानादिति न । यदिल-
स्वोद्देशायस्वयमकरणात् । नचैवं प्राप्त्यनुपदं कृतेऽका-
लेतदन्तेपि तदापत्तिः प्राप्त्यनन्तरविहितमुहूर्त्तस्य प्राप्तैरेव
कर्त्तव्यमित्यनेन श्राद्धाधिकरणत्वेन विहितस्य व्यतिक्रमादि
ति ॥ पिण्डदानं ततः शस्तं पितॄणामतिदुर्लभम् । अव-

श्राद्धाङ्गत्वेनपिण्डदानेप्राप्तेपियत्पृथक् पिण्डदानंविहितंत
त्पिण्डदानमात्रंकार्य्यमित्येवम्परंद्रष्टव्यम् । एकस्यां
यात्रायामेकस्मिंस्तीर्थप्राप्तिनिमित्तकमेकमेवश्राद्धंयात्राभेदे
तीर्थभेदेचावर्त्ततेप्राप्तिनिमित्तकत्वात् । अतएवगयाया
मेकस्मिन्दिनेनानातीर्थप्राप्तौतन्निमित्तकनानाश्राद्धानी-
ति । तीर्थेत्र्यहोपवासःफलार्थोनत्वावश्यकःतीर्थमभि-
गम्यव्रतोपवासनियमयुक्तस्त्र्यहमवगाहमानस्त्रिरात्रमुषि
त्वासर्व्वपापेभ्योविमुच्यतेस्वस्तिमांश्चभवतीति देवलवच-
नात् । एवञ्चत्रिरात्रोपवासत्र्यहतत्तीर्थस्नानानांसर्व्वपा
पविमुक्तिःस्वस्तिमत्वञ्चफलम् । आहितःपूतआहवनी-
योभवतीतिवत्एकवाक्यतार्थविस्पष्टान्वयात् । नतुप्रत्ये
कमन्वयोवाक्यभेदापत्तेः । प्रयागेतुप्राप्तिदिवसेमुण्डन-
मुपवासश्चावश्यकः । मुण्डनञ्चोपवासश्चेतिवचनात् ।
केचित्तु सर्व्वत्रतीर्थप्राप्तिदिनेमुण्डनमुपवासञ्चेच्छन्ति
मुण्डनञ्चोपवासश्चसर्व्वतीर्थेष्वयंविधिः । वर्ज्जयित्वाग
याङ्गङ्गांत्रिशालांविरजान्तथेतिस्कान्दपुराणीयवचनेसर्व्वपद
स्वरसात् ॥ गयादिविशेषवचनाच्चेत्याहुःतन्नसर्व्वपद-
स्यासंकोचेऽतिप्रसङ्गात् तथाहिभौमानामपितीर्थानां पु
ण्यत्वेकारणंशृणु । यथाशरीरस्योद्देशाःकेचित्पुण्य-
तमामताःतथापृथिव्यामुद्देशाःकेचित्पुण्यतमाःस्मृताः ।
प्रभावाद्भुताद्भूमेःसलिलस्यचतेजसेतिमहाभारतेती-

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

योहि शोभीष्मवाक्ये सातिशयफलजनकस्य स्थलस्य तीर्थत्वा-
भिधानात् । नचेष्टापत्तिः स्वदेशान्तर्गतप्रस्रवणादावपि वप
नोपवासयोः सर्व्वदेशीयाचारविरोधात् । नच सर्व्वतीर्थ
पदं विदेशतीर्थपरम् । मध्यदेशीयानां सकलशिष्टानुम-
तस्य प्रयागवपनस्य विरोधापत्तेः । नच येष्वेव महातीर्थे
ष्वविशेषतो मुण्डनं विहितं तत्परं सर्व्वतीर्थपदमिति वाच्य-
म् । प्रयागादन्यत्र तद्विधानाश्रवणात् अथ गङ्गां संप्राप्य-
यो धीमान्मुण्डनं नैव कारयेत् क्रियातस्याः कृताः सर्व्वा
तीर्थद्रोही भवेन्नरः गङ्गायां भास्करक्षेत्रे मुण्डनं यो न कार
येत् स कोटिकुलसंयुक्तः आकल्पं रौरवं वसेत् । गंगांप्रा
प्य सरिच्छ्रेष्ठां कम्पन्ते पापसंचयाः केशानाश्रित्य तिष्ठन्ति
तस्मात्तान्परिवापयेत् । यावन्ति नखलोमानि गंगातोये प
तन्ति वै । तावद्वर्षसहस्राणि स्वर्गलोके महीयते । इत्या
दिवचनानां गङ्गायां प्रयागव्यतिरेकेणापि मुण्डन विधाय-
कत्वमिति चेत् अस्तु तावदेवं तथापि वहूनां वचनानामनुपप
त्तेः प्रयागगङ्गयोरेव मुण्डनविधानात् विशेषनिषेधानु
पपत्तेश्च नर्म्मदादौ पुरुषोत्तमादौ च मुण्डनस्यासाधनात् ।
नचैतद्विशेषवचनादेषु तेषु मुण्डनं व्यवहारविरोधस्योक्तत्वा
त् । वस्तुतस्तु गङ्गामुण्डनविधायकानाममीषां कल्प
तरुकारादिभिस्सर्व्वैरेवालिखनेन निर्मूलतैव । अथ
गंगायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृतेः । आधाने सो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मपानेचमुण्डनंसप्तसु स्मृतम् । भास्करक्षेत्रं प्रयागमवड
लमितिस्मृतिसमुच्चयलिखितवचनात् गङ्गायांमुण्ड-
नमितिकेचित् । तन्नमुण्डनंचोपवासश्चसर्वतीर्थेष्वयं
विधिः । वर्जयित्वागयांगंगांविशालांविरजांतथेतिस्क-
न्दपुराणीयवचनेन गयागंगाविशालाविरजाव्यतिरिक्तेव-
पनंविदधतागंगायामर्थतोवपननिषेधात् तर्हिषोडशिग्रह
णाग्रहणवद्विकल्पोऽस्त्विति चेत् । भवेदेवंयदिविषयभेदेना
विरोधोनस्यात् नत्वेवं । तथाहियावन्तिनखलोमा
निगङ्गायांपतितानिवै । पतन्तिजाह्नवीतोयेनराणां-
पुण्यकर्मणाम् १ । तावद्वर्षसहस्राणिस्वर्गलोकेम
हीयते । इत्यादिवचनानांगंगायांसकलमुण्डनविधाय-
कानामविगीतशिष्टाचारोपष्टम्भेनप्रयागावच्छिन्न गंगापर
त्वं निषेधवचनस्यचतदनवच्छिन्नगंगापरत्वमितिनिश्चया
त्कथंतर्हिसर्वतीर्थेष्वितिवहुवचनम् । सर्वतीर्थपदस्य
वहुव्रीहिणाप्रयागपरत्वेवहुवचनार्थवहुत्वस्याविवक्षित-
त्वात् । ग्रहंसम्मार्ष्टीतिवत् । कथंतर्हिगयादिविशेष-
निषेधः । इत्थंमौञ्जस्कन्धेभवतीतिविशेषविधिनानिषेध-
सिद्धेपुनरयज्ञियावैमाषाइतिमाषनिषेधवचनं यथाप्रति-
निधिविषयापिमाषाऽत्यन्तायज्ञियेत्येवंपरं तथागयादि
वपननिषेधोऽप्यत्यन्तायासस्यपरइतिसर्वतीर्थपदस्यप्रया
गपरत्वेकिम्मानमितिचेत् । एवंकुरुष्वकौन्तेयसर्वती-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्थाभिषेचनं यावज्जीविकृतं पापं तत्क्षणा ईवनश्यतीतिप्र-
याागप्रकरणस्थं मत्स्यपुराणवचनमेव । यत्तु व्यहसंक-
ल्पकोडीकृतेपिमाघशुक्लमीप्रातः स्नानादावसाधारणासंक
ल्पेनपुनस्तदैवप्रातः स्नानाचरणमितितदयुक्तम । त-
दासकृतस्नानाचरणस्यैव विहितत्वात् । अन्यथा
त्र्यहफलकामनायां तदानन्त्यापत्तेः कथंतर्हिदिवानाना-
तीर्थलाभे आवृत्तिरस्तुतद्विशेषवचनबलादेवेति । त्र्यहसं
कल्पस्तुप्रातस्नानमात्रविषयइतिशिष्टाः ॥ अथप्रातः
स्नानमरुणोदयवेलायाम् प्रातः स्नात्यरुणाकिरणग्रस्त-
प्राचीमवलोक्यस्नायादितिविष्णुवचनात् । यत्तु माकरं
भास्करोदयइतिप्रभृतिवचनश्रवणात् सूर्य्योदयकालेम-
याघेप्रातः स्नानमितितन्नतस्यफलमात्रविधायकत्वेनका
लाविधायकत्वात् । समीपलक्षणयैकवाक्यत्वेसम्भवति
वाक्यभेदस्यान्याय्यत्वात् । मकरस्थे रवौमाघेनस्ना-
त्यनुदितेतुयः कथंपापैः प्रमुच्येत् कथंवात्रिदिवंव्रजेद
त्यादिष्वनुदितश्रवणाच्च । मध्याह्ने स्नानन्तुकाम्यंभ
स्मद्वयाभ्यन्तरएवमध्याह्ने एवकुर्वीतेतिवचनात् ॥ अथप्रया
गेमुण्डनंकुर्य्यात्गंगायांपिण्डपातनंदानंदद्यात्कुरुक्षेत्रे वा
राणस्यान्ततनुं त्यजेत् ॥ किंगयापिण्डदानेनकिंकाश्यांमर
णेनवाकिंकुरुक्षेत्रदानेनप्रयागेमुण्डनंयदि ।१ अत्रप्रयागेमु
ण्डनंकुर्य्यादितिविधिः । तत्फलाकांक्षायांराचिसमन्या

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

येनार्थवादिकमेवफलमुन्नीयते । तस्मिंश्च गयापिण्डदानेनेत्यादिश्रवणाद्गयापिण्डदानजन्यफलसमफलकामो मरणजन्यफलसमफलकुरुक्षेत्रजन्यफलसमफलकामोऽत्राधिकारी । इदन्तु चिन्त्यते यद्यपि मुण्डनस्य परिवपनरूपतया तत्रार्थवादेन फलनिर्देशान्न विहितवापने फलान्वयः प्रतिभाति वपनवापनयोर्भेदात् तथापि विहितं कर्म्मानुष्ठार्थवादस्य तत्फलमात्रसमर्पकतया विधेः प्राप्तान्याद्विहितएवात्र फलसंबंधः । नन्वेवं मुरेव फलं स्यान्नवापयितुरिति चेन्न विधेरपि वापनपरत्वात् तेन कारयेदित्यत्र कुर्य्यादिति णिचो लोपेन निर्देशः नन्वेवं णिजर्गर्भितमेवार्थं स्फुटीकृतयथोक्तफलकामः प्रयागे वपनमहं कारयिष्य इत्यभिलापः कार्य्य इति चेत्सत्यम् । प्रकृतिवद्विकृतिरितिन्यायेन प्रकृत्यनुसारेण करिष्य इति शब्दाभिलापो नोचितः । अतएव यमर्त्विग्द्वारापीज्यानिर्वाह्यते तत्रापि यजेत्यादि विध्यनुरोधाद्यजमानो यक्ष्ये इत्यभिलपति न तु याजयिष्य इति केचित् । अत्रोच्यते प्रकृतिवद्विकृतिरितिन्यायेन विकृतियागे प्रकृतिधर्म्मातिदेशो न तु लौकिकवाक्ये आर्षवाक्यस्य शब्दनियमविधिर्वक्तृषु व्यभिचारात् । न च यथाश्रुतवीहारइति श्रवणाद्येव पदं श्रुतं तदेवाज्यमितिवाच्यं देवतापरशब्दस्याष्टोपयुक्तशब्दस्वरूपतयात्वात् । अयंत्वर्थपरः शब्दः अर्थस्यैव त्रोपमस्याबदेषित

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

त्वात् नन्वस्तु तथा तथापि लुप्तपिण्डेन निर्दिश्यतां कुर्यादि
त्यपि वान्वयः स्यादिति चेत्। हन्तैवं परिभाषणस्य देशित
त्वेन स्वायत्तेः इष्टवद् प्रयोगे किमित्यशाचकमयोद्यमस्या
तिन्यायात् कारयिष्य इत्येवास्तु यच्च्य इत्येवं प्रयोगस्तु नदृ
ष्टान्तो वैषम्यात्। तत्र हि देवतोद्देशेन हविस्त्यागो यागः स
च यजमानकर्तृक एव संविभागपूर्वकस्तु त्यागानुवादस्य तादृ
व्यसत्प्रपत्त्युपफलको होमः स एवर्त्विक्कर्तृकोऽत एवर्त्विजो
याजकानन्तु यष्टारोऽत एव विश्वामित्रस्त्रिशङ्कुं याजयामासेति
टीकापीति दिक् एवं प्रयागावच्छिन्नगंगायामपि मुण्डनं के
शानां यावती संख्ये त्याद्युक्तवचनात् यावंति नखलोमानि-
वायुनेत्यादिवचनात्तत्रापि मुण्डनविधानात्। ननु प्रयागे मु
ण्डनञ्चोपवासश्चे तिस्मृत्या मुण्डनोपवासयोरेककालीन-
त्वं प्राप्यते। उपवासश्च तत्र प्राप्तिदिने कर्तव्य इति मुण्डनम-
पि तथास्त्विति चेत्सत्यं। उपवासमुण्डनयोर्द्वयोरपि तत्प्रा
प्तिनिमित्तकत्वात्। तस्य च प्रयागमुण्डनस्य गङ्गामुण्डनेनै
व काम्येन प्रसंगतो निर्वाहादिति। तच्च यत्तु काम्यं मुण्डनन्त
दनियतमतो दिनान्तरे प्रयागमण्डलाभ्यन्तरे तदनुष्ठानं। न
न्विदं मुण्डनं केवलं काम्यञ्चेत् स्नानवत् प्रतिदिनमापद्ये
त्। प्राप्तिनिमित्तकमिति चेत् प्रथमाह्न एव क्रियेत निमित्त
काम्यनयोस्तद्दहरेव सन्निपातात्। समर्थस्य च प्रयोगात्
यत्किञ्चित् सम्वत्सरं द्विमासोनं पुनस्तीर्थं व्रजेद्यदि। मुण्ड

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

नद्योपवासंचनैवकुर्य्यात्प्रयत्नतइतिवचनादेकोपाधिप्रयु-
क्तमुण्डनंद्विमासाभ्यन्तरेपुनस्तीर्थेनकर्त्तव्यम् । नचैवंप्र
यागीयंप्रथममुण्डनमपिनस्यात्तस्यापितद्वच्छिन्न गंगा
मुण्डनापेक्षयाद्वितीयत्वादितिवाच्यंतस्यप्रयागविहितस्य
प्रयागमुण्डनेनभिन्नाधिकारेण प्रसक्तस्तन्त्रतोवानिष्पत्ते
रितिपृथगनुष्ठानस्यतवान्याय्यत्वादित्याहुस्तन्नतद्वचन
स्यामूलकत्वात् समूलकत्वेपिप्राप्तिनिमित्तकमुण्डनपर
त्वात् तन्निमित्तोपवाससाहचर्य्यात् । प्रजेदित्यभिधाना
च्चेति ०॥ अथस्त्रीणांप्रयागेप्राप्तानांमुण्डनेप्राप्तेसर्वान्केशान्
समुद्धृत्यछेदयेदङ्गुलिद्वयम् । एवमेवतुनारीणांमुण्डमुण्डन
मादिशेदित्यादेः प्रायश्चित्तप्रकरणोक्तस्याकांक्षातौल्ये-
नाचाप्यन्वयात् । प्रयागेतासांद्व्यङ्गुलकेशाग्रछेदनमात्रं
मुण्डनमितिवदन्तितन्नकेशमूलान्युपोष्यसर्वपापानि-
देहिनांतिष्ठन्तितीर्थस्नानेन तस्मात्ताँस्तुवापयेदित्या
दिनातीर्थेकेशमूलवपनस्यैवविधिष्वविहितत्वादितिपर-
मगुरुचरणाः ॥ प्रयागेतुतीर्थोपवासेविश्वजिन्न्यायेनमुख्य
फलमितिसांप्रदायिकाः । ब्रह्मलोकावाप्तिः फलमस्येत्य
न्ये । वस्तुतस्तुनैमित्तिकतयैवोपवासानुष्ठानसंभवेविश्वजि
न्न्यायेनफलकल्पने गौरवादयमुपवासोनिष्फलएवदेशना
वलादितितत्वम् ॥ काम्येप्रयागमरणेसर्ववर्णानामधि-
कारः । तदुक्तं नवेदवचनाद्राजन्नलोकवचनादपिमतिरु-

त्क्रमणीयाते प्रयागे स्वं मरणं प्रति । अस्य सर्वथा प्रयाग-
मरणेनर्थशंकानकार्य्येत्यर्थः यद्यपि कल्पतरुकृता-
प्रयागेमुण्डनन्नलिखितंनवाप्रमाणमुपदर्शितम् । त-
थापिसकलदेशीयाचारोपदेशात् । गंगांप्राप्यसरिच्छ्रेष्ठां
कंपन्तेपापसञ्चयाः । केशानाश्रित्यतिष्ठन्तितस्मात्तांस्तत्रवा
पयेदित्यादिवचनादैकंप्रयागावच्छिन्नगंगायांप्राप्तिनिमित्त
कम् । द्वितीयन्तुकेशानांयावतीसंख्याच्छिन्नानांजाह्नवीज
लेतावद्वर्षसहस्राणिस्वर्गलोकेमहीयते । यावन्तिनखलो
मानितावन्तीत्युक्तवचनात् प्रयागावच्छिन्नगंगायामेवस्वर्ग-
फलकंकाम्यं । तृतीयन्तुमुण्डनंचोपवासश्चसर्वतीर्थेष्व-
यंविधिरितिवचनात् प्रयागएवप्राप्तिनिमित्तकम्
चतुर्थन्तुकिंगयापिण्डदानेनेतिवचनात् प्रयागएवमोक्षफ
लकम् । गंगायांभास्करक्षेत्रे च मुण्डनंयोनकारयेत् सको-
टिकुलसंयुक्तोह्याकल्पंरौरवंवसेदित्यकरणेनिन्दाश्रवणा
न्नित्यमपीतिप्रयागमुण्डनंनित्यकाम्यम् । अत्रचप्रथमो-
ह एवस्वर्गफलकेक्रियमाणेनैमित्तिकयोरपिप्रसंगादेवसि-
द्धिः । प्रसंगविरोधिनोविरहात् । मोक्षफलकन्तुयदृच्छया
दिनान्तरेपिक्रियतइतिपरमगुरुचरणाः । विद्यापतिचर
णास्तुप्रसंगादेवनैमित्तिकयोः काम्ययोस्तुतन्त्रेणैव । तेनस्व
र्गफलकेनैवचतुर्णां प्रथमाहएवनिर्वाहइत्याहुस्तन्नकाम-
नयोर्भिन्नाभावरूपत्वेनयुगपदसम्भवात् । पृथगधिकारस्यै

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वन्यायसहत्वात् प्रयागसुण्डनस्यापि स्वर्गफलकत्वेमानाभावात्। काश्यांत्वामरणेनकिमितिस्मृतेः। हन्ततथापिमोक्षफलकत्वेनैवनैमित्तिकयोः प्रथमाद्देशसिद्धिरस्तुस्वर्गफलकमेवयदृच्छयाक्रियतामितिचेन्न भावरूपतयालघूपस्थितिकत्वात् मोक्षएवप्रथमतः कामनोदयेप्रथमाधिकारइष्टएवेति। येतुवर्षसहस्राणीतिवहुवचनानुरोधात् प्रयागेवहुपदमिच्छन्ति। तेभ्रान्तास्तथाह्निकेयानांयावतीसंख्येत्यादिसमभिव्याहारेण विभक्तीनामपितावत्संख्यायकत्वेनवहुपदायोगात्। अतएवाश्वमेधसहस्राणांसहस्रमित्यादिवाक्यप्रयोगेदशलक्षाश्वमेधजन्यफलसमफलप्राप्तिकाम इतिसिद्धवल्लिखितमिति॥ येतुराजभिर्धृतदण्डास्तुकृत्वापापानिमानवाः निर्मलाः स्वर्गमायान्तिसन्तः सुकृतिनोयथेतियथाश्रुतवचनानुरोधात् धृतदण्डस्यनप्रायश्चित्ताधिकारोनवा परलोकहानिरितिवदन्तितेभ्रान्ताः प्रकृतवचनस्यप्रकरणात् प्रायश्चित्तरूपदण्डपरत्वात् अतएवकल्पतरौस्वर्णस्तेयमुसलाघात प्रकरणएववाक्यमिदंलिखितम्। कण्ठतोप्याहनारदः। अगम्यागामिनःशास्तिदण्डोराज्ञः प्रकीर्तितः। प्रायश्चित्तविधानन्तुतदपिस्यात्द्विशोधनम्। आपस्तम्बः। एषुचोदकपानन्तावन्तंकालमनुभाविनाञ्चपरिवापनम् अनुपश्चाद्भवन्तीत्यनुभाविनः कनिष्ठाः। तेनप्रेतकनिष्ठानांसपिण्डपुरुषाणांवपनमित्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनुवदन्ति गंगायांभास्करक्षेत्रेमातापित्रोर्गुरोर्मृतौ।आधा
नेसोमपानेचमुण्डनंसप्तसुस्मृतमितिपरिसंख्यानस्मृते: पु
त्राणांमेवाशौचान्तेवपनन्तुकनिष्ठस्यपिण्डानामपीतितन्न
ट्यमेहन्यस्त्वयंगत्वाहतश्मश्रुकर्माणि इतिहारीतेना
त्रयांनिवृत्याशौचान्तेहतश्मश्रुकर्माणइति विष्णुनाचा
संकुचितवक्तृविधवचन स्वरसेनकनिष्ठस्यपिण्डमात्रस्यैत-
द्विधानात्। परिसंख्यानस्यात्युपलक्षणत्वात् । नचश्मश्रु
कर्माणइति श्रवणात्तावन्मात्रपरतैवास्तुयद्ययस्यचवर्ण
स्य यद्यत्स्यात्पश्चिमं त्वह:सतत्रवस्तुशुद्धिं चगृह्णशुद्धिंकरो
त्यपिकेशश्मश्रुनखादीनामत्वाश्यंतज्जहात्यपीत्येकवाक्य
तयानुभाविनां च्चवपनमितिस्मरणाच्चतस्योपलक्षणत्वा-
त् परदेशीयास्तुगंगायामित्यसंकुचितश्रवणाद्यवकुत्रापि
गंगायांवपनमिच्छन्तिरटन्तिच । गंगांसंप्राप्ययोभीमा-
न्मुण्डनंनैवकारयेत्॥ क्रियातस्याऽक्रियासर्वातीर्थंक्रोधी
भवेन्नर:। गंगायांभास्करक्षेत्रे मुण्डनंयोनकारयेत्।सकोटि
कुलसंयुक्त:ह्याकल्पंरौरवंवसेत्। गंगांप्राप्यसरिच्छ्रेष्ठांकं
पन्तेपापसंचया: केशानाश्रित्यतिष्ठन्तितस्मात्तांस्तत्रवापये
त्यावन्तिनखलोमानिवायुनाप्रेरितानिवैपतन्तिजाह्नवी
तोयेनराणांपुण्यकर्मणांतावद्वर्षसहस्राणिस्वर्गलोकेमहो
यते।तस्मादकरणेऽनिष्टस्मृते:करणेफलस्मृतेश्चगंगायामेव
पनमितिवदन्तितन्नएतेषांनिर्मूलत्वात्।समूलत्वेपिसंको

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

चात् तथाहिमुण्डनञ्चोपवासश्चसर्वतीर्थेष्वयंविधिः ॥ व
र्जयित्वागयांगंगांविशालांविरजांतथेति स्कन्दपुराणीयव
चनेनगंगासाचेवपननिषेधात् । नचवपनविधिनिषेधयो
र्विकल्पः । अनिष्टस्तुतौप्रवृत्तिनिवृत्त्योर्विकल्पासम्भवात् ।
तस्मात्तीर्थराजएवगंगायांवपनमिति । नचसर्वतीर्थेष्वयं
विधिरित्यत्रकर्मधारयोलाघवात् । स्वदेशीयप्रस्रवणादाव
पिवपनोपवासयोः प्रसंगापत्तेः । तस्मात्सप्तमीबहुव्रीहि-
णाप्रयागएवमुण्डनंविधीयतेनचसर्वपदस्यप्रयागमात्रपर-
त्वेबहुवचनविरोधः ॥ उद्देश्यगतत्वेनसंख्यायाअविवक्षि
तत्वात् । अहंसंमार्ष्टीतिवद्बहुवचनंप्रयोगसाधुतामात्रं ।
नचसर्वतीर्थपदस्यप्रयागपरतायांमानाभावः शक्तिग्राह-
काभावादितिवाच्यं । एवंकुरुष्वकौन्तेयसर्वतीर्थाभिषे-
चनंयावज्जीवकृतंपापंतत्क्षणादेवनश्यतीति प्रयोगेप्रकर
णस्थमत्स्यपुराणवचनद्वयसत्वात् । हन्तैवं विशेष-
निषेधानुपपत्तिः । अत्यन्तनिषेधतात्पर्य्यात् अयज्ञि
यावैमाषाहुतिवत् । नचैवमवच्छेदवैपरीत्यमेवास्तु । वि
निगमनाविरहात् । भ्रांतोऽसि । सकलशिष्टाचारविरो
धात् । गंगायांभास्करक्षेत्रेपित्रोश्चमरणंविना । इत्या-
छिनत्तियः केशांस्तमाहुर्ब्रह्मघातिनम् । इतिरूपनारायण
धृतकालिकापुराणवचनाच्च । तस्मात्सकलपर्य्यालोचन-
यागंगावपनविधायकानिवचनानिप्रयागावच्छिन्नगंगापरा

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यथेव तदपत्राद्वकवचनानिर्गंगामाचपराणीतिसारम् । नचैकेनभूयसांकथंसङ्कोच इतिवाच्यंशतमप्येषानांनपश्य-तीतिन्यायादेकेनापिबहूनांप्रतिरोधाच्च । अतएवस्मृतिसमुच्चये विष्णुः । प्रयागेतीर्थयात्रायांपितृमातृवियोगतः कचानांवपनंकुर्य्याद्वृथानविकचोभवेत् । तीर्थयात्रायां-कार्प्पटीकवेषेणगयादिगमने चिकीर्षितआदौवपनमित्यर्थः । पितृमात्रितिज्येष्ठसपिण्डोपलक्षणमुक्तयुक्तेः । प्र-यागेत्वित्यधिकरणसप्तमी उपपदविभक्तेः कारक-विभक्तिर्बलीयसीतिन्यायात् । अतएवावच्छेदेषिनिगम-नाविरहोपिपरास्तइति दिक् ॥ प्रोक्षणमुत्तानपाणिना-वोक्षणंतिर्य्यक्पाणिनाऽभ्युक्षणमधःपाणिनासर्वचकार्य्य-म् । उत्तानेनतुहस्तेनप्रोक्षणंसमुदाहृतंतिरश्चावोक्षणंप्रोक्तंन्यञ्चताभ्युक्षणंमतमितिवचनात् एतत्त्रयंसक्तदेवकार्य्यमावृत्तौवीजाभावात् ॥ ० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्रताह्निपूर्व्वं संध्यायांवारिदोयदि गर्ज्जति त-
द्दिनं स्यादनाध्यायोव्रतं तत्रनकारयेदिति हारीतवच
नाद्दुपनयनपूर्वदिने सायंसंध्यायां गर्जउपनयनदिन-
मनाध्यायं करोति। इत्यस्मत्पितामहचरणपवित्री-
कृतः पन्थाः ॥ अत्रवदन्ति पूर्वसंध्यापदेन प्रातः सं-
ध्योच्यते । अत एव विष्णुपुराणे ततोऽखिलजगत्प-
द्मवोधायाच्युतभानुनादेवकीपूर्वसंध्यायामाविर्भूतं
महात्मनेत्यत्रपूर्वसंध्यापदेन　प्रातःसंध्यैवाभिधी-
यते　किञ्चरत्नसारशतकेऽपि पयोधरैश्छन्नतरं खम-
ण्डलं दिवानिशंत्राव्रतवन्धवासरे प्रभातसंध्यासम-
येचगर्जितं तदाह्यनाध्यायमुशन्तिशूरयः। इत्यत्र व्र-
तवन्धदिनसंध्यागर्जनस्यैवानाध्यायहेतुत्वमुक्तंतत्र
चसंध्यागर्जस्य सामान्यतएवानाध्यायहेतुत्वे हारी-
तस्यानुवादकत्वापत्तिरत्यन्तनिषेधेतात्पर्य्यात् अ-
यज्ञीयावैमाषा इतिवत् ॥ अन्यथाधिकरणसप्तम्यर्थ
वाधापत्तेरिति तन्न　।　अत्यन्तनिषेधोह्येकवक्तृ-
केवैयर्थ्यात्　। अत एव　मौद्गश्चरूर्भवतीत्यनेनमा-
षादिनिषेधे सिद्धे पुनरयज्ञीयावै　माषा इति यदु-
पादानं तदत्यन्तनिषेध परमिति सिद्धान्तो भिन्नव-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्तृकेतुविधिनिषेधयोरनुवादकत्वमेव । प्रातः स्नातः सहाम्बर इति वत् । रत्नसारलिखितंत्वनार्थ्यमेवेतिनकिञ्चिदेतत् । प्रातः सन्ध्यावाक्यस्यतत्रोक्तसूर्य्योदयाधारत्वानुरोधेन प्रातः सन्ध्यातात्पर्य्यकत्वम् । अनन्यलभ्यस्यशब्दार्थत्वात् । पूर्वां संध्यांजपंस्तिष्ठेदित्यादिशङ्खविरोधापत्तेः । किञ्च प्रातः संध्यागर्जनस्यानाध्यायहेतुत्वे प्रतिपाद्येव्रताह्नि संध्यायामित्येवहारीतोब्रूयात् सायं संध्यागर्जनानन्तरमुपनयनाप्रसक्तेः । अतोविद्वः पूर्वं संध्यावाक्यस्य व्रतपूर्वदिनसायं संध्यावाचकत्वमेव षष्ठीसप्तम्योरभेदमादाय षष्ठीस्थानएवसप्तमीप्रयोगात् तत्रचबाधेन विशेषणतायाः कवलनादगत्यैवोपलक्षणताया आश्रयणादिति पैःषादि चतुरोमासान्ज्ञेयावृष्टिरकालजा ॥ व्रत यात्रादिकं कर्म्म वर्ज्जयेत् सप्तवासारान् ॥ अत्रापिविशेषमाह एकेनैकदिनंत्याज्यम् द्वितीयेनदिनत्रयम् तृतीयेनतुसप्ताहंत्यजेदाकालवर्षणे ॥ वृत्तेप्यकालवर्षेनाशुद्धिर्निर्द्दिष्टासावत् यावन्नभवति यानेनरपशुचरणांकितावसुधा ॥ अत्रापिशुक्लादिश्रा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्द्रोमासः शिष्टाचारादौत्सर्गिकत्वाच्च । तेनपौषा-
दिचान्द्रमासचतुष्टये एकेन एकदिनस्पृशावृष्ट्या ए-
कदिनं तदुत्तरदिनंत्याज्यमित्यर्थः तथाद्वितीयेन
दिनत्रयम् अव्यवहितदिन द्वयस्पृशावृष्ट्यातदुत्तरं
त्र्यहः । तथातृतीयेनसप्ताहम् अव्यवहितदिनत्रय
स्पृशावृष्ट्यातदुत्तरंसप्ताहम् सौरवैशाखान्तर्गतोप्य-
शुद्धः करणत्वानुरोधात् उत्तरत्वं चवक्तव्यमेव त-
थाचवृष्टिदिनमेवाशुद्धंनस्यादिति चेन्न नाशुद्धिर्लि-
ङ्गिंशेत्तावदित्यादिनायावत्तावत्पदसमभिव्याहृतेन-
वृष्ट्यधिकरणदिनस्याप्यशुद्धत्वप्रतिपादनात् हन्तैव-
मेतादृशवृष्ट्यधिकरणदिनस्यैवकरणत्वमस्तुलाघवा-
त् भ्रान्तोसि । सामानाधिकरण्यएवलाघवात् तादृ-
शवृष्टेरेवोभयत्रहेतुत्वात् । यदाम्बुवृष्टिः कुलिशं-
पतत्यधोधराप्रकम्पयोऽसुरकेतुदर्शनम् तदाविवाह-
व्रतवन्ध्यनेषुविसर्जयेत् सप्तदिनानिशास्त्रतः इ-
त्यत्राम्बुवृष्टिः पततीतिवर्त्तमानताश्रुतेश्च अत्रवृ-
ष्टिदिनमेवादाय द्वितसप्ताहगणनेतिचेन्न तृतीया-
र्थकरणत्वानुपपत्तेर्विध्यनुवादवैषम्यापत्तेश्च किंच
दिनत्रयमित्यत्रदिनैकमित्येवब्रूयात् एवंतृतीयेन-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सप्ताहमित्यत्रचतुरहारित्येवब्रूयादिति ॥ येतुमासा-
न् मार्गप्रभृतिमुनयोव्यासवाल्मीकिगर्गाः । चैत्रं
यावद्वर्षणविधौनेतिकालंवदन्ति ॥ नाडीजङ्घः
सुरगुरुमुनिर्वक्तिवृष्टेरकालं मासावेतावशुभजनकौ
पौषमाघावशेषाविति पठित्वा पौषादिचतुरोमासा-
न् इतयत्र पक्षावैंमासा इतिवदन्ति । येपिमार्ग-
स्यपौर्णमास्यादावष्टकान्तामकालजाम् वृष्टिंकेचि-
दिहप्राहुर्न माघेनापिफाल्गुने ॥ इति पठित्वाव्य-
वस्थामिच्छन्ति तेवहुविधविरोधाभिधायिनः॥ सकल
शिष्टाचारविरोधात्केचिदितिश्रुतेश्चास्माभिरुपेक्षिता
इति एकरात्रं परित्यज्य कुर्य्यात्पाणि ग्रहं ग्रहे ॥
यात्रायांसप्तरात्रन्तु त्रिरात्रं व्रतवन्धने ॥ दिग्दाहे
दिनमेकं चग्रहे सप्तदिनानिच । भूमिकम्मे समु
त्पन्ने त्रिरात्रं परिवर्जयेत् दृश्यते सिंहिकासूनुरुदि-
तोगगनेयदि यात्रादौमंगलेकार्य्यं सप्तरात्रं विवर्जये-
त् अरिष्टे त्रिविधोत्पाते सिंहिकासूनुदर्शने सप्तरात्रं
नकुर्वीतयात्रोद्वाहादिमंगलं ॥ दर्शनादर्शनाद्राहोः
केतोः सप्तदिनंत्यजेत यावत्केतूदयस्तावदशुद्धः स-
मयोभवेत् ॥ धूमकेतौसमुत्पन्ने ग्रहणे चन्द्रसूर्ययोः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रहाणां संगरेचैवनकुर्य्यान्मंगलक्रियाम्.तदेषांवचनानां समुदायार्थः ॥ चन्द्रसूर्य्योपरागेमोक्षानन्तरमत्यन्तप्रौढ़कन्यायाः रजः सम्भावनायां तदहरेवाशुद्धः समयः ॥ अन्यत्रतद्दिमारभ्यसप्ताहमशुद्धः समयः ॥ ग्रहणकालेशुद्धएवादर्शनाभावादिति ॥ अथोपनयनम् ॥ गृहेरवीन्द्वोरवनिप्रकम्पेकेतूदयोल्कापतनादिदोषे । व्रतेदशाहानिवदन्तिप्रज्ञाःत्रयोदशाहानिवदन्तिकेचित् ॥ यदाम्बुवृष्टिः कुलिशमितिचअत्रचवाक्ये सप्ताहान्वयः । तादृग्वृष्ट्यसुरकेतुदर्शनयोरेवसंवादात् । एकरात्रं परित्यज्यकुर्य्यात्याणिगृहं ग्रहे यात्रायांदिनमेकंतुत्रिरात्रं व्रतबन्धनेनाकालवर्षविद्युत्स्तनितेष्विषिंकथंचिदपियानं । आसप्ताहाद्ग्राद्व्यांतरिक्षभौमेतथोत्पाते । अत्रेदंरहस्यं ग्रहणकालेभूकंपोल्कापातकरकावज्रपातादिसमाहारे व्रतबंधेत्रयोदशाहमशुद्धम् । किंचिदूनतत्समाहारे दशाहंग्रहणमात्रेसप्ताहं । तदाविवाहव्रतबंधनेषुविवर्ज्जयेत्सप्तदिनानिशास्त्रवित इति प्रागुक्तवचनात् । निर्णयेतुसप्ताहालिखनमन्यतः प्राप्तत्वादेवनतुसप्ताहाशुद्धिबोधकवचनाभावादिति । यत्तु-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यात्रायांसप्तरात्रं तुत्रिरात्रं व्रतवंधन इति तदने-
कवचन पर्य्यालोचनयातिप्रौढमाणवकविषयमेवे-
ति । नचसप्तदिनानीत्यत्रैव व्रतवंधातिरिक्त विष-
य तास्तु । विनिगमकाभावादितिवाच्यम् एवंवहु-
वाधापत्तेः श्रुतवाधापत्तेश्च नापिसकलसमाहारेत्र-
योदशाहंकिंचिदूनसमाहारे दशाहं समाहारमात्रे
सप्ताहं ग्रहणाद्वेकैकोदयेत्र्यहं अश्रुतत्वाच्छ्रुतवाधाप
त्तेश्च तत्रैव प्रौढमाणवकविषयकत्वस्पवक्तव्यत्वा-
दिति दिक् यज्ञोद्वाहोपनयनादौ मंगल्यमात्रेत्वा-
ह दाहेदिशाञ्चैवधराप्रकम्पे वज्रप्रपाते कुविदारणे
च धूमेतथा पांशुकरप्रपातेन कारये न्मंगलकारि-
कार्य्यम ॥ उल्कापातेचनिर्घातितथैवाकालवर्षणे-
च्छि द्रे सूर्य्येचसंदृष्टेन कुर्यान्मंगलक्रियाम् द्विसू-
र्यं रात्रिसूर्य्यम्वा दृष्ट्वागगन मण्डलं रात्रौशक्र
धनुश्चैव मंगलानिविवर्जयेत् ॥ उल्कापातेत्र्ययंधू-
मेसप्तदिनानि चवज्रपातेदिनैकं ञ्चवर्जयेत्सर्वकर्म-
सु ॥ दिग्दाहेदिनमेकन्तु ग्रहेसप्तदिनानि च क्ष्मि-
कम्पेसमुत्पन्ने त्र्यहानि परिवर्जयेत् एवं दि-
शां दाहेतदग्निमदिनमेकमशुद्धम्दिग्दाहेदिनमेकमि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्युक्तवचनेनिमित्तसप्तमीत्रलात् भूमिकम्पेतुतद्दि-
नादेवाशुद्धं भूमिकम्पेसमुत्पन्ने त्र्यहाणिपरिवर्जये-
दितिश्रुतेः ॥ उल्कापातेतद्दिनादेवाशुद्धम् उल्कापाते
दिनत्रयमितिश्रुतेः वज्रपाते तद्दिनमेववज्रपाते दि-
नमेकमितिवचनात् एवंचानुक्तकालिके धरादिविदा-
रणेपांशुवृष्टौनिर्घाते च सूर्यछिद्रे द्विसूर्येत्रिसूर्येवाग-
गने रात्रौशक्रधनुर्दर्शने ग्रहयुद्धे वारुधिरादिवर्षणे
दिव्यभौमान्तरिक्षत्रिविधोत्पातेऽरिष्टे सिंहिकासूनु
दर्शनेसप्तरात्रं नकुर्वीत यात्रोद्वाहादिमंगलम् ॥

तथा नाकालवर्षस्तनितेष्विष्टिंकथंचिदपि-
यानं आसप्ताहाद्दिव्यांतरिक्षभौमेतथोत्पात इत्ये
वान्वीयते उभयोरपिपरिभाषारूपत्वेन लघूपस्थि-
तिकत्वात् व्यवस्थान्तरेचानध्यवसायात् नचभू-
कम्पाद्यपेक्षयाविषमशिष्टता विधेर्दुर्लंघ्यत्वादि-
ति ॥०॥ गुरोर्महातीचारेतु ॥ अतीचारगतोजी-
वःपूर्वभंनेतिचेत्पुनः नष्टःसंवत्सरोज्ञेय स्सर्वकर्मसुग-
र्हितः कृत्वातिचारंयदि पूर्वराशिंनायातिमन्त्रीवि-
बुधाधिपानाम् । यानं विवाहं व्रतवन्धगेहं सर्वंतदा-
हंतिमतंमुनीनाम् ः पूर्वराशिंयदात्यक्त्वाअपूर्णे वत्सरे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गुरुः अपरंराशिमायातिलुप्तकालः सउच्यते अतीचारगतोजीवः पूर्वभंनैवगच्छतिनाचरेत्तत्रकर्माणितदातत्रैवसंस्थिते अत्रच। शुभंभवनमासाद्ययदातिक्रमतेगुरुः तत्रसंवर्द्धिताकन्यासुखंभर्त्रा प्रमोदते॥ अतीचारगतेजीवेवृषवृश्चिककुंभयोः तत्रचोद्वाहिताकन्यासंप्रणीयात् कुलद्वयम्। कन्यावृश्चिकमेषेषुमन्मथेचवृषेझषे अतीचारेपिकर्त्तव्यंविवाहादिवुधैः सदा॥ वक्रातिवक्रावथवातिचारंकरोतिजीवोजगतोहिताय यदातदाप्याहशुभेपिलग्नेशुभायपाणिग्रहणंवशिष्ठः॥ इत्यादीनिवचनान्यपवादकानिनिर्म्मूलान्येवेतिवज्रलेपायितमितिदिक् मकरस्थवृहस्पतौ देवागारतड़ागेषुप्रपोद्यानगृहेषुच सिंहसथंमकरस्थंच सर्वारम्भेगुरूंत्यजेत्॥ नीचस्थः सिंहगोवायदिभवतिगुरुः सूर्य्यरश्मौचलीनः सयुक्तोवायदासयाद्द शशतधृणिनाक्षीणरूपोथवालः यात्रांगेहंविवाहं व्रतममरगृहं यज्ञचूड़ादिसर्वं वापीमुद्यानकूपंनभवतिशुभदंयद्यदिष्टंचलोके॥ अत्रापिमकरस्थायदाजीवोवर्जयेत् पांचमाहि्नकम् शेषेषुचतथाह स्सुविवाहः शोभनोमतः इत्याद्यपवादकं-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वचनंचानिर्मूलमेवेतितत्वम् वापीकूपतड़ागयागभवनं क्षौरप्रतिष्ठाव्रतंविद्यामंदिरकर्णवेधनमहादानंवलंसेवनम् ॥ तीर्थस्नानविवाहदेवभवनं मंत्रादिदेवेक्षणं दूरादेववर्जितोविषुः परिहरे दस्तंगतेभार्गवे अनादिदेवतान्दृष्ट्वाशुचस्युर्न्नष्टभार्गवे ॥ मलिम्लुचेप्यनावृत्तं तीर्थस्नानमपित्यजेत् अस्तमितेभृगुतनये कन्याम्रियतेवरश्चवागीशे । स्यादुभयोरपिमरणं केतावुदितेकरग्रहणे ॥ उपनयनंगोदानं परिणयनगृहप्रवेशौच । अस्तमितेषुनकुर्य्यात्सुरगुरु भृगुचंद्रपुत्रेषु ॥ अस्तेशुक्रेधनुर्म्मीनेसिंहादित्येतथागुरौ । चूड़ोद्वाहप्रतिष्ठाश्चव्रतादीन्नैवकारयेत् ॥ अस्तंगतेभृगुसुतेसमस्तदिग्देवतायत्र वेश्मक्रियाप्रवेशः क्षौरोद्वाहौपरीक्षाच ॥ प्रतिष्ठांचपरीक्षांचव्रतोद्वाहादिकर्म्म च । नष्टे वृद्धे तथावालेनकुर्य्याद्भृगुनन्दने ॥ गुर्वादित्येगुरौसिंहेशुक्रे चास्तमुपागते । नाधिष्ठानवतींपश्येद्देवतामादितोनरः ॥ वालेशुक्रेवृद्धशुक्रेजीवेवालेवृद्धजीवे जीवेनष्टे जीवसिंहेसिंहादित्ये गुर्वादित्ये ॥ वालोदशाहाभ्युदितः परेणपूर्वेणवालोदिवसत्रयेण । वृद्धस्तुपूर्वेणसपक्षमेकंपश्चात्-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्थितः पंचदिनानिशुक्रः प्रागुद्गतः शिशुरह-
स्त्रितयंसितः स्यात्पश्चाद्दशाहमिहपंचदि, नानिवृ
द्धः प्राक्पक्षमेवगदितोत्रिवसिष्ठमुख्यैर्जीवस्तुपक्षम-
पिवृद्धशिशुर्विवर्ज्यः ॥ पश्चादभ्युदितोबालोदशा-
हंप्राग्दिनत्रयम् पक्षंवृद्धस्तुपूर्वस्यांदशाहंपश्चिमे-
स्थितः । अग्न्याधानंप्रतिष्ठाच यज्ञदानव्रतानिच ।
देवव्रतवृषोत्सर्गचूड़ाकरणमेखलाः । मंगल्यमभिषेकं-
च मलमासेविवर्जयेत् ॥ तथामलिम्लुचेमासि सु-
राचार्येतिचारणे वापीकूपतड़ागादिक्रियाः प्रागु
दितास्त्यजेत् अतीचारगतेजीवेव क्रेतलैवसिंहगे ।
वालेवृद्धेतथानष्टे विवाहो नप्रशस्यते ॥ अती-
चारगतेजीवे वक्रेचास्तमुपागते । व्रतोद्वाहौन कुर्वीत
जायतेमरणंध्रुवम् ॥ अतीचारगतेजीवेधक्रेचैववृह-
स्पतौ । कामिनी विधवाप्रोक्ता तस्मात्तौपरिवर्जये-
त् ॥ वक्रेचैवातिचारेचवर्जयेत्तदनंतरम् । व्रतयात्रादि-
कंकार्य्यमष्टाविंशतिवासरान् ॥ पक्षो १५ दशाहा-
नि १० तथात्रिपक्षं ४५ मासत्रिभागः १० खलुषट्च-
मासाः । एषोऽतिचारः कथितोग्रहाणांभौमादिकाना-
मितरस्तुचारः । पक्षो १५ दशाहानि १० तथैवसार्द्धं-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मासान् दशाहंखलुषट्चमासान् । भौमादिखेटा-
स्त्वतिचारवक्रेददुः फलंपूर्वगृहेयदुक्तम् ॥ वक्राति-
चारेसुरराजमंत्रीयदागतस्तत्रफलंददाति ॥ विवाह-
चूडाव्रतकर्णवेधसुरप्रतिष्ठार्थगृहप्रवेशाः । सुवर्णशं-
खाद्युप योगिविद्याः सिंहेसुरे ज्येनचशोभनाःस्युः ॥
सिंहगुरौ परिणीतास्त्रीपतिपुत्रादिकंहन्ति । क्रमशा-
स्त्रीन् पित्रादीन्वसिष्ठष्टगर्गादयः प्राहुः ॥ अस्तम्प्रया-
तेचभृगौगुरौवासूर्य्येहिमांशौचतथाप्रविष्टे । नकूप-
वाप्यादिकमन्दिरार्थं शुभंप्रदिष्टं धनकीर्तिनाशात् ॥
गुर्वादित्ये गुरौसिंहे न शुक्रे न मलिम्लुचे । याम्या-
यने हरौ सुप्ते सर्वकर्म्माणि वर्जयेत् । उदिते दश-
रात्रंतु क्षीणेचैवचतुर्द्दश । वर्जनीयं प्रयत्नेन गुरुशु-
क्रोदये तथा । भवेत्संध्यागतः पश्चादस्तमेष्यन् दिन-
त्रयम् । दिनानिपंचपूर्वेण तत्कृतंकर्म्म वर्जयेत् ।
बालभृगौपरिणीता युवतयस्साध्वीभवत्यवस्यमिद-
म् । वृद्धे तस्मिन्वंध्या अस्तेमृत्युंसमभ्येति ॥ बाले-
चदुर्भगानारी वृद्धे नष्टप्रजा भवेत् । नष्टे मृत्युम-
वाप्नोति सत्यमेतद्गुरावपि ॥ कर्णवेधन्तथाक्षौरं
विवाहं व्रतबंधनम् । गुर्वादित्येनकुर्वीत पुत्रदार

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धनक्षयात् ॥ गुर्वर्कयोगसमयं शोभनवाल्मीकिगोतमप्रमुखैः । व्रतयज्ञार्थाब्राह्मणशुभप्रदाकीर्त्तितामुनिभिः । गुर्वर्कयोगे युवतीविनाशो यद्येकऋक्षे यवनावदन्ति । अस्तंगते देवलवभ्रुवामा हारीतपूर्वाश्च तथा वदन्ति ॥ विवाहादिनकुर्वीत सिंहेयावद्गतोगुरुः ॥ वक्रातिचारे च गुरौ सिंहेचार्कयुते तथा । जातुतत्रनकुर्वीत यात्रोद्वाहव्रतानिच ॥ सिंहसंस्थं गुरुं शुक्रंसर्वारम्भे विवर्जयेत् । आरब्धंवानसिद्धं स्यमहद्भयकरंभवेत् । पुत्रभ्रातृकलत्राणि हन्याच्छीघ्रन्नसंशयः ॥ कारकीव्रजते नाशं सन्तानः क्षीयते ऽचिरात् ॥ यथा सिंहस्थितेजीवे तथैव मकरस्थिते । देवारामतडागानि प्रपोद्यान गृहाणि च ॥ विवाहादिमहाभाग महाभयकरं भवेत् ॥ सर्व्वत्रैवास्थितः श्रेष्ठो देवराजपुरोहितः ॥ नीचस्थोर्कगृस्थश्च सर्वकर्म्म विदूषकः । अतचानादिदेवतांदृष्ट्वा शुचः स्युर्न्नष्टभार्गवे ॥ मलिम्लुचेप्यनावृत्त तीर्थस्नानमपि त्यजेदित्यनेन प्रथमक्रियमाणस्य तीर्थस्नानस्य शोकजनकत्वं प्रतिपाद्यते तच्चनित्यनैमित्तिके कुर्य्यात्प्रयतः सन्मलिम्लुचे ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तीर्थस्नानं गजच्छायां प्रेतश्राद्धं तथैव च । इत्यनेन चाभ्यासापन्नं तीर्थस्नानं पर्य्युदस्यते। तथैव व्युत्पत्तेः ॥ किंचतस्यैव प्रक्रान्ततया लाघवेन तन्मात्रपर्य्युदासस्यैव वक्तव्यत्वात् नत्विष्टसाधनत्वस्य विध्यर्थत्वेन फलाजनक मपि पर्य्युदस्यते॥ दशानां फाल्गुनादीनां प्रायोमाघस्य च क्वचित् । नपुंसकत्वं भवति न तु पौषस्य कुत्रचिदित्याद्यसंकुचित विरोधात् । विधेरेवमप्यक्षतेः अत एव तत्तत्फलकामनयाम लमासे पि तीर्थस्नानं क्रियतएवेति भ्रमोहेय इति दिक् ॥ मार्कंडेयपुराणे ॥ उद्वहेत्पितृमात्रोस्तु सप्तमीपंचमीतुया ॥ विष्णुपुराणे ॥ पंचमीं मातृपक्षाच्च पितृपक्षाच्चसप्तमीम् । गृहस्थ उद्वहेत्कन्यां न्याय्येनविधिना नृप ॥ हारीतः ॥ तस्मात् कुललक्षणविज्ञानोपपन्नां वरयेत् । पचमीं मातृवन्धुभ्यः सप्तमींपितृवन्धुभ्यइति ऋजुसूत्रानुसारात् । पितृतः सप्तमीं मातृतः पंचमीं कन्यां वरयेदिति परलोकसून्यास्तन्मन्दम् ॥ तथाहि गोतमः असमानप्रवरैर्विवाह ऊर्द्धं सप्तमात्पितृवन्धुभ्यः मातृवन्धुभ्यः पंचमात् ॥ वीजिभ्यश्चे त्यत्रापि सप्तम

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वितियोज्यम् एषार्थ्यः सप्तमः पंचमोवाऽतऊर्द्धं-विवाहः समानप्रवरत्वं च संख्यासंज्ञयोस्तुल्य-त्वेन यथावत्ससावर्ण्ययो रौर्बादीनां च पंचतया संज्ञयारौर्बादिरूपतया ऽतएवपितृमातृपक्षोपि मा-तृपक्षएवेति परास्तम् ॥ पितृबंधुभ्य इति श्रुतेरु-त्तरवचनविरोधाच्च ॥ याज्ञवल्क्यः ॥ अरोगिणींभ्रा-तृमतीमसमानार्षगोत्रजाम् । पंचमात्सप्तमादूर्द्धं मा-तृतः पितृतस्तथा ॥ यथासंख्यमन्वयः भ्रातृमतीमि-ति पुत्रिकाशंकानिवृत्तये पैठीनसिः असमानार्षेयीं-कन्यां वरयेत् पंचमातृतःपरिहरेत् सप्तपितृत इति त्री न् मातृतः पंचपितृतइतिवा ॥ समानजातीयाविवाहे पंचमातृतः सप्तपितृतः । असमानजातीयाविवाहे त्रीनित्यादिव्यवस्थितोविकल्पः । अत्रचमातृसगो-त्रानिषेधो मातृसंबंधित्वेन जन्मपरंपरानाम्नोः प्र-त्यभिज्ञायांतदाहव्यासः ॥ सगोत्राम्मातुरप्येकेनेच्छ-न्त्यु द्वाहकर्म्मणि । जन्मनाम्नोरविज्ञाने उद्वहेताविशंकितः ॥ सुमन्तुः ॥ पितृमातृसंबंधा आसप्तमादवि-वाह्याः कन्याभवन्ति ॥ आपंचमादन्येषाम् । सर्वाः पितृपत्न्योमातरस्त द्भ्रातरोमातुलास्तद्दुहितरोभ-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गिन्यः तदपत्यानिभागिनेयानि ताःपरिणीताः संक-
रात्मकाधर्मकारिण्यः तथाध्यापयितुरेतदेव आसप्त-
मादिति मातृ सपिंडाविषयम् । मातुः सपिंडायत्नेन
वर्जनीया द्विजातिभिरिति व्यासवचनात् ॥ मनुरपि
असपिंडाचयामातु रसगोत्राचयापितुः । साप्रस-
स्ताद्विजातीनांदारकर्म्मणिमैथुने ॥ भ्रातरः सहोदरा-
एव भ्रातृपदस्य तत्रैवशक्तेः यत्तु तद्दौहित्री परिणे-
तुमर्हैवापवादकाभावात् नचतद्दुहितरोभगिन्यस्त-
दपतयानि भागिनेयानीत्येवापवादकमिति वाच्यम्
तानपरिणेतव्याः परिणीताः ॥ संकरकारिण्योभव-
न्तीत्यनेनतद्दुहितुरेव विवाह्यत्वनिषेधात् नहितद-
पत्यानि ताइत्यनेन प्रत्यवमर्ष्टुं शक्यन्ते ऽनुशासन-
विरोधात् किमर्थन्तर्हितदपत्यानि भागिनेयानीति-
चेत् तदपत्यनिन्दार्थमेव तथाच तद्दुहितरोनविवा-
ह्या इत्येवतुलार्थ इति तत्तुच्छम् नतदपत्यानिभागिने
यानीतिश्रुतेरिति एषामनन्तराभिहिताः कन्याः परि-
णीताः संकरात्मकाधर्म्मकारिण्योभवन्ति तथाध्याप
यितुस्तद्विवाहजनकमन्त्राध्यापयितु रेतदेव संकरका-
रित्वमेव तदेतेषां वचनानां पर्य्यालोचनया पुरा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णयोर्हारीतस्यच व्यवच्छेदपरत्वमेव नचाश्रुतत्वान्न-
व्यवच्छेदपरत्वमितिवाच्यम् गौतमादिवचनेव्यवच्छेद-
स्यकन्ठत एवोक्तत्वा द्वयोरेकमूलत्वानुरोधात् किंच-
विवाहस्य धनार्जनवद्राग प्राप्ततया विधेयत्वाभा-
वात् सर्वत्रवयवच्छेद एव वाक्यार्थः नचानयोर्विकल्पो
गौरवा द्वाधसापेक्षतापत्तेश्चे तिदिक्॥ पंचामाब्दादुगु-
णव द्वरायकन्यादानमविरुद्धमेव तदुक्तम् नवमाध्याये
मनुनाउत्कृष्टायाभिरूपायवराय सदृशायच अप्राप्ता-
मपितां कन्यांतस्मैदद्याद्यथाविधि ब्रह्मवर्चसकामस्य-
कार्य्यं विप्रस्यपंचमेइत्यनेनव्रते पंचमाब्दे प्राप्तेवैवा-
हिकोविधिस्त्रीणां औपनायनिकस्मृतः इत्येकवाक्य-
तया स्त्रीणामपिविवाहे तत्कालत्वसिद्धिः गौरींवाप्यु
द्वाहयेत्कन्या मित्यस्यगुणपरत्वात् यत्तु काममामर-
णात्तिष्ठेद्गृहेकन्यर्त्तुमत्यपि नचैवैनां प्रयच्छेत्तु गुणही-
नायकर्हिचित् इतियथा श्रुत मनुग्रन्थ्यानुरोधात् सं-
जातरजस्कामपिमैथिलातिरिक्ताः प्रयच्छन्तितदतिहे-
यम् ॥ पितृवेश्मनियानारीरजः पश्यत्यसंस्कृता । त-
स्यांमृतायां नाशौचंकदाचिदपिशाम्यतीतिशंखवच-
नपर्य्यालोचनयामनुवचनस्य वरंविषंभुंक्ष्वेतिवद-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्थात् अतएव कंठतोप्याहमनुः पित्रेनदद्याच्छुल्कन्तु कन्यामृतुमतींवहन्। साच स्वाम्यादतिक्रामेहतूनां प्रतिरोधनादिति ॥ ० ॥ अथनामद्वैतम् ॥ एकादशे द्वादशेवाहनिपितानामकुर्य्यादितिकात्यायनसूत्रेनामकर्म्मणः सकृत्कर्त्तव्यत्वेनोभयोरपिदिनयोरधिकरणत्वमनुपपन्नमतो विकल्पस्तत्रापि वाध्यत्ववाचकत्व वाध्यवाध्यत्व वाधकवाधकत्वदोषाणांचतुर्णामुभयोरपिदिनयोर्द्वि पर्य्यागतानामष्टदोषाणांग्रासादैछिकोविकेल्पः किन्त्वेकादशदिनासम्भवे द्वादशदिनविधिरितिविकल्पोव्यवस्थितो नचैवंव्रीहियवयोरप्यैछिकोविकल्पोनस्यात् भ्रान्तोऽसि तत्रहिसाधनताविशेषस्य श्रुतत्वेन विनिगमनाविरहादैछिकोविकल्प इति सर्वतन्त्रसिद्धान्तात् हन्तैवम् कालेप्येवमस्त्वतिचेन्न कालस्यानुपादेयत्वात् द्रव्यस्यचोपादेयत्वात्इतिकारणताग्राहकेचोभयोः शब्दतोन जर्थाप्रवेशोविकल्पस्तत्रापि युगपदुपादेयतायामैछिकोनुपादेयतायांव्यवस्थितः एवं अपरपक्षे पंचम्यादिविकल्पोपि व्यवस्थित विकल्प एव कंठतो त्राभावाप्रवेशात् यथोक्तवस्त्व संपत्तावित्यादौ तुन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विकल्पः किन्तु शब्दतएवाभावप्रवेशेन प्रतिनिधि त्वं पूतिकावत् अतएव मुख्याभावेतदुपादानंसंगच्छते विकल्पेतदभावापत्तेरितितत्वम् एवंचसर्वत्रैव हव्यकव्ये शर्म्मान्तन्नामप्रयोज्यमपवादकाभावादिति अत्रापवादकंपठंति तथाहि सपिण्डीकरणं यावत् प्रेतः प्रेतइतिस्मृतः । सपिंडीकरणादूर्द्ध्वं शर्म्मवर्म्मादिभाग्भवेदिति वचनस्यप्रामाण्यंमन्वानाः प्रेतश्राद्धेशर्म्मादिपदम्नेच्छन्ति तदयुक्तम् एतद्वचनस्याज्ञातमूलत्वेनसन्दिग्धमूलत्वेन निर्म्मूलत्वस्य न वा सर्वथैवाप्रमाणत्वात् प्रमाणत्वेवा सपिण्डीकरणंश्राद्धंदेवपूर्वन्निवेदयेत् पितॄनेवाशयेत्वाक्यनः प्रेतन्ननिर्दिशेदितिशातातपवचनैकवाक्यतांवाप्युतद्बहिर्भावमात्रेतात्पर्य्यादन्यथाप्रेतन्तुनाम गन्धामरभ्यामुत्सृजेदुपतिष्ठतामित्यस्यबाधापत्तेः नामापिपद शर्म्मपदाभ्यामेवनिर्म्मितम् अतएवोपनयने कोनामासीतिप्रश्ने ऽमुकशर्म्माहमित्युत्तरं कात्यायनसूत्रे संगच्छते किंच ब्रह्मचारि प्रश्ने श्रुतिरपि इन्द्रस्य ब्रह्मचार्य्यस्यग्निराचार्य्यस्तवाह माचार्य्यः श्रीअमुकशर्म्मन्निति दिक् ॥ ननुससंप्रदानको

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हित्यागोदानम् देवोद्देश्यकोहविस्त्यागोयागःसएवप्र-
क्षेपावच्छिन्नोहोमः एततूत्रितयभिन्नस्तुत्यागउत्सर्गः
तत्रापिब्राह्मणायेति कारकचतुर्थीप्रयोगःक्रियते सच-
कथंस्यात् संप्रदानस्य कारकविशेषत्वात् तत्र भवि-
ष्यद्द्रव्यप्रतिपत्तिभागिनः प्राक्स्वीकारणाविरहेण-
कारकत्वाभावेनचतुर्थ्यर्थान्वयायोगादितिचेत् अ-
कारकेपिकारकप्रयोगोभवत्येवेतिमतमाश्रित्य ब्राह्म-
णायेति कारकचतुर्थीप्रयोगकरणात् अतएव वह्निम-
सामिनोमीत्यत्राकारक एव वह्निमिति कारकद्वितीया-
दप्रयोगो नहिवह्नेरनुमितौ कारकत्वमनुमिते र्विषया-
त्वेस्यत्वादिति ॥ अप्रतिपत्तिकेदानेप्रतिपत्त्यनन्तर-
त्रदक्षिणादानानन्तरमेवदक्षिणादानावसरात् स-
हप्रतिपत्तिकेतुपरस्वत्वोत्पत्तेरनुपदसिद्धत्वादिति एव-
मत्विक्क्रेश्राद्धादौदक्षिणादानन्नकर्तव्यमृत्विगानति-
द्वारापरंपरातस्यप्रधानांगत्वादतः ऋत्विगभावेद्वार-
बाधा द्दक्षिणाबाधस्या प्युचितत्वादतएव कृष्ण-
लचरुंश्रपयेदित्यत्रतुषवाधेनप्रकृतिप्राप्तावघातवाधः
शास्त्रयोऽतएव सत्रेपिनदक्षिणेतिप्राभाकराः तन्न
नहिदक्षिणायाः परंपरया श्राद्धांगत्वं किन्तु हतम-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रोत्रियेदानं हतोयज्ञस्त्वदक्षिणः तस्मात्पणं काकिनीर्व्वा पत्रंपुष्पमथापिवा प्रदद्याद्दक्षिणांसर्व्वान्तस्मात्सफलोभवेदितिवचनात् सत्रेतुयष्टॄणामेव ऋत्क्त्वेनाभेदाद्देवताधिकरणविरोधेन दक्षिणादानस्य निरस्तत्वादिति ॥ वैश्वदेवहोमे कात्यायनीयस्वाहाकारैरितिविशेषोपदेशवलेनान्यत्र सर्व्वत्र इदमग्नये इत्यादित्यागानुवादः प्रामादिकएव तेनेदमग्नयइत्यादिऋत्विक्कर्तृकः प्रयोगोनिर्म्मूलइति निर्णयलिखनं बह्वृचादिपरतयैवनेयम् ॥

ऋग्वेदेतावदष्टौवारुणमन्त्रास्तत्रादौश्चतुभिश्चतुर्दशधाऽऽवृत्तैरन्त्यैश्चतुर्भिस्त्रयोदशधाऽऽवृत्तैरष्टोत्तरशत माहुतयो भवन्तिएवं पुनरावृत्तैरष्टोत्तरशतम् समिदाहुतयः सम्भवन्ति त्वदुक्तेचक्रमेषोडशाधिकानांशतद्वयानामाज्यसमिदाहुतीनामेकैकस्मिन्नेवमन्त्रेणाज्यसमिदाहुतीनां सप्तविंशतावाहुतिषु मन्त्राष्टकेविभागसिद्धावाज्यसमिधोः संख्यावैषम्यंस्यादिति नचत्वदुक्ताज्यसमिदाहुतिविभागवद स्माकमपि विभागोऽस्त्वितिवाच्यम् परेषांतादृशविभागाभ्युपगमेऽनिष्टापत्तेरितिरहस्यं ॥ एवमथर्ववेदे-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चतुर्म्मन्त्रकइत्युपसंहारइति ॥ मत्स्यपुराणं कनका-
लंकृतांकृत्वोजले गामवतारयेत् । सामगायचसादे-
याब्राह्मणायविशाम्पते ॥ नचात्रकनकालंकृतामिति
विशेषोपदेशाद्विशेषणान्तरत्यागः अस्यचवह्वृच गृ-
ह्योक्तसकलोपलक्षकत्वात् एकमूलकत्वेद्वयोः क-
ल्पनालाघवात् मूलान्तरकल्पनेच वैदिकमन्त्रस्या-
पि वाधापत्ते स्तथाचवह्वृचगृह्यपरिशिष्टम् सचेल-
णकंठांहेमश्रृंगीं रूप्यखुरांवृषप्रजांकांस्योपदोहां वि-
सायदद्यादितरा वाशन्तसादक्षिणेत्येवं चै. पौरु-
दश्दैवता तु भ्यंसामगाय मयादत्तेति प्रतिपत्तिरूप-
त्वा च्च नदक्षिणेति यद्धर्म्मकरलिखनं तदुभयमपिचि-
न्त्यम् श्रुतवाक्यभंगापत्तेः नचार्थवादाभावादुभय-
वाधोस्तु तदभावस्याकिं चित्करत्वात् कार्तिक्यां
वृषोत्सर्गात्प्राक् अपूपत्रयदानवत् नचविश्वजिन्नया-
यात् स्वर्गः फलं अधिकृताधिकारकत्वभंगापत्तेः त-
स्माद्गलेपादिकयापि कामनांविनैवतस्याः प्रतिग्र-
हत्वेन सामगायदानं दक्षिणादानंच तदित्थमत्रप्रयो-
गः ओंसोपकरणसवत्सगव्यैनमः इतित्रिः ओंब्राह्म-
णायनमइतित्रिः संपूज्य ओंइमांसोपकरणां सवत्सां-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गान्ददानीति द्विजकरेजलंदत्वा ओंददस्वेतितेनोक्ते गांसिक्त्वा कुशादिकमादाय ओंअद्यामुकमासीयामुकपक्षीया मुकतिथौ सचेलकंठां कांचनशृंगीं रूप्यखुरां कांस्योपदोहां कनकपट्टिका लंकृतांसवत्सां गांरुद्रदैवताममुकगोत्रायामुकशर्म्मणे ब्राह्मणाय सामगायतुभ्य महंसंप्रददेइतिदत्वादक्षिणांचदत्वास्वस्तिवाचयेत् कामस्तुतिंच गवांपुच्छंगृहीत्वातुसहिरण्येनपाणिनागृहस्थोवेदविद्विप्रोवाचयेत्तु प्रतिग्रहमितिदानकांडलिखितवचनात् ॥ ० ॥ वैकृतोहिविशेषोपदेशः प्राकृतंधर्म्मंक्वचिदन्यथयति यथासरमयंवर्हिर्भवतीत्यत्र क्वचिल्लुंपतियथापरिमुह्योपलिप्योल्लिख्येत्यादिनाप्राप्तसकलेतिकर्तव्यतास्थानेपर्य्युक्ष्य जुहुयादित्यत्रपर्य्युक्षणमात्रविधिः क्वचित्सकलस्थानेतदेवविधत्ते यथाऽऽघारमाघारयतिआज्यभा गौजुहोतीतिचासुम्मास्ये अष्टौपरिसमूहनादौ सत्येवहोमान्तरस्थानेप्याघाराज्यभागमात्रविधिवत् अतएवोदाहरणयोर्भेद इति एवंदिनानिहोतव्यंचत्वारिद्विजपुंगवैरिति मत्स्यपुराणवचनेकालाध्वनोरत्यंतसंयोग इत्यनुशासनासिद्धात्यन्तसंयोगद्वि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तीयावलात्त्यक्तद्रव्यापहारेपि प्रतिपत्तियागत्वे-
सत्यपि द्रव्यान्तरानुष्ठानेन चतुरहव्यापिहोमस-
मापनमन्यथा ऽत्यन्तासंयोगेतुमासस्यद्विरधीते
इति संवत्सरस्यद्विरधीते इति प्रत्युदाहरणंन्या-
सकारोप्याहेति ॥ देवीपुराणे ॥ होमोग्रहादि पू-
जायांशतमष्टाधिकंभवेत् अष्टाविंशतिरष्टौवायथा
शक्तिर्विधीयते अष्टोत्तरसहस्रंवातत्संख्यापरिकीर्त्ति
ताइयंचहोमसंख्याश क्त्यनुसारेणवैकल्पिकीद्रष्टव्या-
तेनमुख्यकल्पेशक्तस्यनानुकल्पेधिकारः प्रभुः प्रथम
कल्पस्ययो ऽनुकल्पेनवर्त्तते। नसाम्परायिकंतस्य दु-
र्म्मतेर्ज्जायतेफलमितिमनुविरोधात् यद्यपितड़ागेहोमे
ऽष्टोत्तरशतमष्टोत्तरसहस्रंवा संख्यानान्त्रेत्यसंभवात्त
थाहि नह्येकेनैकस्यामधिवास नरात्रौब्रह्मणापिताव
त्संख्यया होमः कर्त्तुं शक्यते तथाप्यष्टाविं शतिसंख्य
या ऽष्टसंख्ययावाशक्त्यनुसारेणहोमः कार्यः तेनसर्वथै-
ववारुणहोमादारभ्य विश्वकर्म्महोमपर्य्यंतमेकैवसं
ख्या ऽविशेषात् ननुजुहुयाद्वारुणैर्म्मन्त्रैराज्यानिसमि-
धस्तथैतिमत्स्यपुराणदर्शनादस्तुवावारुणस्यसंख्या
वैषम्यमितिचेन्नएतावतापितृतीययावहुवचनेनचक-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रणत्वंवहुत्वंचयुगपदेव खलेकपोतन्यायेनमंत्रस्य-बोध्यतेनतुसंख्यावैषम्यमप्यश्रुतत्वात् अत्राहुः तडा-गेवरुणस्यप्रधानत्वादन्येषांचाप्रधानत्वात्संख्यावैष-म्यस्य सर्व्वतंत्रसिद्धत्वादिति यद्यपितडागप्रकरणेग्र-हवेदिर्न्नश्रूयतेमहादानतड़ागयोश्च प्रकृतिविकृति-भावविरहात् तथाप्यन्तरंगत्वादेकत्वनिर्णीत इति न्यायात् सकलशिष्टाचाराच्च तड़ागेग्रहवेदिरितित-त्वं ॥०॥ यजुष्येवसकारादिपरतयाअनुस्वारे वि-कारस्तेन ऋग्वहिर्भूतस्वाहादिपरत्वेपिविशेषोनिषू-प्रत्यूहएववाधकाभावादतएव प्रणवस्यवहिर्भूतस्य सहस्त्रशीर्षेत्यादिपरतयापिनविशेषइतिसुव्यक्तमेवे-ति ॥०॥ शृणुराजन् महावाहोतडागादिषुयोविधिः । एवमेवपुराणेषुतड़ागविधिरूच्यते ॥ कूपवापीषुस-र्व्वासुतथापुष्करणीषुचेत्युपक्रमोपसंहारयोर्दर्शनात् ॥ शतधन्वन्तरंचैवतावत् पुष्करणीमता एतत्पंचगु-णः प्रोक्तस्तगड़ाग इति श्रवणाच्च द्वयोः पर्य्याय-त्वाभावा दजहत्स्वार्थायांचवीजाभावात् सर्बत्रपु-ष्करणीपदेन त्यागवाक्यंचिन्त्यमिति ॥ ०॥ ततो-वतीर्य्यगुरवेपूर्बमर्द्धं न्निवेदयेत् ऋत्विग्भ्यः परमर्द्धं-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चदद्यादुदकपूर्व्वकमित्यत्रऋत्विग्भ्यइतिश्रवणात् समुदायस्यैवोद्देश्यतातस्यचाज्ञतयासमुदायिनां स्वीकर्तृता तथाचोद्देश्यस्वीकर्त्रोर्भेदाद्दानासिद्धिर्य्यथाचैत्रायदत्तेमैत्रेणसंप्रतिपन्नेअतआहुःपरिषदिदत्तमदत्तमिति ननुयथाग्रहंसंम्मार्ष्टीत्यत्रग्रहत्वेनैकेनरूपेणोपस्थितायांसर्वस्यांव्यक्तौप्रत्येक मेवसम्मार्गान्वयोयथावागर्गाभोज्यन्तामित्यत्र गर्गत्वेनैकरूपेणोपस्थितायांसर्बस्यांगर्गव्यक्तौ प्रत्येकमेव-भोजनान्वयः तथाप्रकृतेपिऋत्विक्त्वेनैकरूपेणोपस्थितानांत्रयोदशानां प्रत्येकमेवदानान्वयोस्तुतथाच समुदायोहिनदानोद्देश्यःकिन्तुसमुदायीतथाचोद्देश्यस्वीकर्त्रोरभेदात् क्वदानासिद्धिरितिचेन्मैवम् धर्म्मिणांचैत्रादीना मुद्देश्यत्वेऋत्विग्भ्य इति द्वन्द्वश्रवणादितरेतरसमाहारद्वन्द्वविकल्पापत्तिरतएव यदग्नयेच प्रजापतयेच सायमग्निहोत्रंजुहोतीतिश्रुतावपि प्रत्येकंदेवतान्वये इतरेतरसमाहारविकल्पापत्याऽग्निप्रजापतिभ्यांस्वाहेतिसाहित्येनोभयानुगतेनरूपेणोभयोर्द्देवतात्व मितरेतरयोगस्योपगमात् हन्तैवम् प्रकृतेपिनतरेतरसमाहारविक-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्पावकाशस्तद्वदत्रापीतरेतरयोगस्यैव मयाभ्युपगमात् ऋत्विग्भ्य इति प्रकृतौश्रवणात् समाहाराभ्युपगमे पाणिपादमितिवदेकवद्भावानन्तरन्नपुंसकलिंगतापत्तिरत एवक्षौमेवसानावग्नीनादधीयातामित्यत्रापिवसानपदान्मिलितोपस्थितयोरेव यजमानदम्पत्योराधानान्वयोविधीयत इतिहन्त्तैवम् सर्वत्रेरेतरयोगे साहित्यस्यप्रधानतयोपस्थि तौ तत्रैवहोमान्वयआधानान्वयोवज्रलेपायितः स्यादिति अत्रोतच्यते यथाआधानेदम्पत्यारन्वयः साहित्येनतथात्विजामृत्युक्तनैकेनरूपेण त्यज्यमानमहादानान्वयोप्यस्तु नचसाहित्यमेवद्वन्द्वार्थस्तेनतदेवदेवतेतिवाच्यम् इतरेतरयोगेसाहित्यमुपसर्ज्जनम् समाहारेतत्प्रधानमतएवतयोर्भेदोऽन्यथोभयत्रापिसाहित्यस्यप्रधानतयोपस्थितौद्वयोर्भेदोनस्यादिति त्वत्सिद्धान्तादन्यथाक्षौमेवसानावग्नीनादधीयातामित्यत्रापिद्वन्द्वात् साहित्यस्यप्रधानतयोपस्थितौतत्राप्याधानान्वयोनस्यादचेतनस्यचैतन्यसाध्य आधानेयोग्यताविरहात् । तस्मात् गलेपादिक पापिसमाहारएवसाहित्यंप्रधानमितिसर्व्वंस्वस्थं हिरण्यगर्भेतु उ-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भयथाप्यतिशयरूपसंस्कारानुत्पत्तिस्तस्य जातत्वात्
अतएवयजमानसाखीयमन्त्रैरपितत्करणेविद्याप्रयु-
क्तिरधिकास्यादहृष्टोत्पत्तौचतच्छाखीयमन्त्रस्यापिक-
रणत्वमविरुद्धमेवेतिदिक् यद्यपिविद्यावतामृत्वि-
जाम्विद्याप्रयुक्तिर्न्नदोषस्तथापि॥अक्रियात्रिविधा-
प्रोक्ता विद्वद्भिः कर्म्मकारिणाअक्रियाचपरोक्ताचतृ-
तीया चायथाक्रियेतिकात्यायनोक्तंपरक्रिययाकर्म्मा
चरणमेवदोषः स्यादतएवगोभिलीयपारस्करीययोः
परस्परंपररुपरसाखयावानसंस्कारकत्वमिति ॥ हिर
ण्यगर्भं तुउपोषितइतिश्रुतेः । एकभुक्तादिनेऽकृतोपवा
सोभवेदन्यथातिदेशादेवप्राप्तत्वेनव्यर्थतापत्तेरितिके
चित् तन्नएवंहिऋत्युङ्गनुपेत्यादिकमपिव्यर्थमधिक
म्बाँस्यात्तस्मात्कण्ठरवोक्तातिरिक्तपरमादिपदंगोवृ-
षन्यायादेव तथाचाधिवासनदिने आरब्धोपवासोभ
वेदित्यर्थः आदिकर्म्मणिनिष्ठानुशासनात् । गर्भाधा-
नंपुंसवनंसीमंतोन्नयनंतथा कुर्य्युर्हिरण्यगर्भस्यतत-
स्तेद्विजपुंगवाः जातकर्म्मादिकाः कुर्य्यात्क्रियाः
षोडशचापराः । यद्यपिगुरुरुत्थापयेत्ततइतिवचना-
ज्जातकर्म्मादिकेगुरुरेवेदानींकर्त्ताप्रतीयतेतथाप्युपक्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मेसकलकर्तृकत्वदर्शनात् अत्रापिसकलकर्तृ-
कतैव क्रियाकरणंतुपाठमात्रमेव तदानींतत्करणासं-
भवात् तास्तुक्रियायजमानगृह्योक्ताएव तासामेव
तत्संस्कारकत्वेनोपस्थितत्वात् अतएवस्त्रीणांजात-
कर्मनामकरणनिष्क्रमणान्नप्राशनचूडाकरणविवाहा
इतिषडेव ॥ शूद्रस्यत्वेतेषट् ॥ पंचमहायज्ञाइ
त्येकादश तथाच षोडशक्रियाविरहिणोस्त्रीशूद्रयोर
त्रानधिकार इति चण्डेश्वरादयः वस्तुतस्तु सर्वएव
संस्काराऋत्विग्भिस्स्वमन्त्रेणैवकरणीयाअन्यथाविद्या
प्रयुक्तिरपिकल्पनापत्तेस्तत्रापि अक्रियाचपरोक्ता-
चतृतीयाचायथाक्रियेत्यादिकात्यायनविरोधोवीजंनच
तेनविनाकृतायजमाने संस्काराधायिकानुपदेशा
दितिवाच्यम् नहितायजमानेसंस्कारजनिकाः
पापद्धसरूपेसंस्कार ध्वंसायवानुदयनियमात् किमर्थं
तर्हितदातत्करणमदृष्टार्थ मतएवषोडशक्रियाविरहि
णोरपिस्त्रीशूद्रयोरधिकारस्तत्कर्तृकाभिस्तद्गृह्योक्त
षोडशक्रियाभिस्तत्राप्यदृष्टोदयाविरोधादिति नचदि
व्यदेहोभवाम्यहमित्यत्रपुल्लिङ्गनिर्देशात्पुं मात्राधि-
कारः । स्वर्गकामोगांदद्यादितिवत् लिंगस्यावि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वक्षितत्वात्किन्तुतद्वदेवस्त्रीपुंसाधिकारः ।
नापिप्रयोगालिंगाद्दः स्वर्गकामत्वेनतुल्यवदधिका-
रेप्रकृतिविकृतिभावाभावेनोहाभावात् नचासमवे-
तार्थतादिव्यदेहोभवामीत्यादेःपार्थिवशरीरवति वा-
धितत्वेनप्रकृतमन्त्रस्याद्दृष्टार्थत्वेनासमवेतार्थकत्वात्
एवञ्चमहापातकनाशनमिति स्मरणात्तन्नाशो
पिफलम् सचतावन्नविकल्पेनाष्टदोषग्रासापत्तेर्ज्यो
तिष्ठिनयभंगापत्तेः किन्तुसमुच्चयेनलाघवादेककार्य्य-
स्यैकनियोज्योकांक्षायांसकलार्थवादोपस्थितफलका
एवनियोज्यः स्वीक्रियते नचैवमुत्पन्नमहापातक-
नाशस्य तद्ध्वंसरूपफलवाधात् कामनाविरहाद्वा
नाधिकारःस्यात् नचतत्संशयेनतद्ध्वंसकामनास-
म्भवादधिकारी स्तु मंगलवदितिवाच्यं तत्रानुमित-
श्रुत्यातत्रैवाधिकारसिद्धेः पापध्वंसार्थिप्रवृत्तौ नि-
श्चितपापस्यैवाधिकारःप्रायश्चित्तवदितिवैषम्यादिति-
चेन्नअत्राप्युक्तयुक्त्यासमुच्चितफलत्वेसिद्धे नन्यथासि-
द्धानुवादकदर्शनसंदिग्धपापध्वंसस्यैवाधिकारोमंग-
लवत् अयंतुविशेषोयत्सतिजन्मान्तरीयमहा-
पातके तद्ध्वंसोपिजायते असतितु नेति प्र-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तियोगिरूप सहकारिविरहान्निर्विघ्नकृतमंगलवदेवेति । ब्रह्मलोकेमहीयत इत्यभिधाय कल्पकोटिशतय्यांवद्ब्रह्मलोकेमहीयत इति श्रुतेरुभाभ्यां कल्पकोटिशतावच्छिन्नतल्लोकमहितत्वमेव फलम् । नचैवंपूर्व्वप्रतीकानर्थक्य सोष्णीषाऋत्विजः प्रचरन्तीत्यभिधायरक्तोष्णीषाऋत्विजःप्रचरन्तीतिदुपबपत्तेः तस्मात्प्राप्त एवोष्णीषलौहित्यरूपगुण विधिस्तथात्रापि प्राप्त एव ब्रह्मलोकमहितत्वेऽग्रिमखण्डकालरूपविधिरेवान्यथात्रेवतत्रापिविशिष्ट विधानसम्भवे उष्णीषद्वयविधिःस्यात् तस्माद्विशिष्टविधिकल्पनेगौरवात्तत्र वात्रापि पश्चिमौगुणविधीइतिसमम् ब्रह्माण्ड विंशतिपलादूर्ध्व मित्तिश्रुतेः सर्वत्रैवतत्रकर्षादिनावृद्धिरितिवदन्ति तत्रचपलस्यैवोपस्थितत्वात्तेनैववृद्धिरत्रचस्वल्पेचदेय इति विशेषश्रुतेर्द्रव्यापकर्षान्मौद्गगश्चरुर्भवतीतिवत् । स्वल्पपदमत्रचतुर्थभागमात्रपरम् तत्रैवप्रयोगप्राचुर्य्यात् स्वशब्दोऽप्यतिशयवाची तेनाल्पापेक्षयाल्पत्वंब्रूते तथाच सर्वत्रप्रथमकल्पोपस्थितस्य पलस्य षोड़शभागपर्य्यन्तमेवैकाग्निकत्वं चतुरग्निकत्वमुभ-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यत्राप्यविशिष्ट मेवाविशेषात् यद्यप्येकाग्निक्यपि-
वेदिदक्षिणे यजुर्वेदिकुंडमायाति यजुर्विदोदक्षि-
णत इति वचनात् तथापि भुक्तौमुक्तौच पुष्टौघजी-
र्णोद्धारेतथैवच सदाहोमेतथाशान्तावेकं वरुणदिग्ग-
तमिति शिष्टपरिगृहीतवचनाद्वेदिपश्चिमेकुंडम् स-
र्वत्रचैकाग्निविधानेचतुरग्निकेवा वह्वृचादरपि गुरु-
त्वमविरुद्धमेवानिषेधात् किन्त्वेकाग्निके तेनापि स्व-
शाखयैवानुष्ठेयमन्यथा अक्रियाचपरोक्ताचतृतीया
चायथाक्रियेत्यादिपरिशिष्टविरोधापत्ते रेकाग्निके
तुब्रह्मवरणमग्न्युपसमाधानानुपदमेवहोतृकर्तृकम् द-
क्षिणतोब्रह्मासनमास्तीर्य्येत्यनेन तदानीमेवकृता-
कृतावेक्षकत्वेन तद्वरणस्यहोतृकर्तव्यत्वेनकात्या-
यनेनकथनात् चतुरग्निकेस्तु अथर्त्विजइत्यादि-
नाऋत्विक्त्वेन यजमानकर्त्तव्यताविधानादि ति ॥
कल्पपादपे स्वल्पेप्येकाग्निवदिति विशेषोपदेशा-
देकाग्निकत्वमपि गोसहस्रे तु चतरग्निकत्वमेव ऋ-
त्विग्भ्योधेनुमेकैकामितिविशेषोपदेशस्यनियमार्थ-
कत्वादिति कामधेनुदानेप्येकाग्निवदिति विशेषो-
पदेशादेव किन्तु वत्सोपि धेन्वर्थोपात्तहिरण्येनैव-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धेनुंवत्संचकारयेत् उत्तमाम्पलसहस्त्रैरित्युत्कर्षसी-
मप्रकरणेऽभिधानात् वत्सोपिधेनुचतुर्थांशेनैव चतु-
र्थांशेनवत्सः स्यादिति गुडधेनुप्रकरणेदृष्टत्वात् स्वे
च्छयैववत्सद्रव्यानियमनमिति पुनः सागरमतमनादे
यम् अप्रामाणिकत्वात् गुडधेनुदानेतुनैवम् उत्तमा-
गुडधेनुःस्यात् सदाभारचतुष्टयम् वत्संभारेणकुर्वी-
तेत्यनेन पृथक्द्रव्यकथनात् अतएव गुडधेनुवदेवपृ-
थक्द्रव्येणैवात्रापिवत्सकरणमिति भ्रमोहेयः सर्वका
मफलमिति महादानचतुष्टयेश्रुतानां फलानामन्य-
तमममहादानफलकामनैवाधिकारिविशेषणं नापिस-
मुच्चितम् नाप्यन्यदैच्छिकंफलम् सिद्धियोगन्यायात्
तथाहि एकैकस्मैफलायान्ये क्रतवोयआहृयन्तेसर्वे-
भ्योदर्शपौर्णमासावित्यत्र सर्वपदस्यप्रस्तुतवाचित-
या एकैकस्यैवयज्ञफलस्यप्रस्तुतत्वेनोपस्थितत्वात्
समुच्चितस्यानुपस्थितत्वादन्यथायागान्तरे प्रवृत्ति
रेवनस्यात् भूमादेरभावात् वैजात्यमात्रस्याप्रवर्त्त-
कत्वात् अतएवनाप्यदन्यदैच्छिकम् उपस्थापकाभा-
वात् अन्यथाहिरण्यंसर्वकामदमित्यत्रापि प्रारिप्सि-
तविघ्नध्वंसस्यफलत्वेनमंगलम् विनेत्यादिविरोधा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पत्तेः अतएवदानान्तरे श्रुतफलेष्ववान्यतमफलकामनातत्राप्यधिकारिविशेषणमितिरहस्यम् ॥ त्रिकृतौचात्रगुड़धेनुमन्त्रैरित्यनेनबहुत्वंश्रूयते तथापि इत्यामन्त्र्यततोदद्यादितिश्रुतौप्रकृतेरेकत्वमेव तेनैकमन्त्रतापन्नेन श्लोकपंचकेनेत्यर्थो मन्त्रसंबन्धस्यविधेयतयासंख्यायामतात्पर्य्यात् अत्रचवि प्रायेतिश्रुतेः संप्रदानैकत्वमेकाग्निपक्षएवेति भ्रमोहेयः नित्यवक्रुतत्वात् नैकांबहुभ्य इतिश्रुतेश्च नच ब्राह्मणमात्रविधिरयमति देशादेवतस्यप्राप्तत्वात् तस्मादेकस्यानेकस्यवाविकल्पेनार्त्विज्ये तथाभूतस्यैवविकल्पेनसंप्रदानत्वेप्राप्तेएकस्यैवसंप्रदानत्वं नियम्यते ॥ तेनचातुश्चरणेप्येक एवसंप्रदानमितिसिद्धयतियथाविकृतियागेऽतिदेशागतव्रीहियवयोः प्राप्तौवैकृतविशेषेव्रीहिश्रुतौ पाक्षिकस्या पियवस्य वाध स्तथेहापीति हिरण्याश्वेतुस्वल्पेचैकाग्निवदिति श्रुतेरेकाग्निकत्वमपि एवं चब्रह्मांडकल्पपादपकामधेनुहिरण्याश्वानामेकाग्निकत्वमितितत्वम् हिरण्याश्वरथेत्वनुक्ताग्निकेशुक्लमाल्यांवरधरोदद्यादिति श्रुतेः प्रकृतिवद्विकृतिरितिन्यायेनचतुरग्निकत्वमेव स्वल्पद्र-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्यकत्वेब्रह्माण्डवदत्राप्येकाग्निकत्वमितिवहवः त-
न्न प्रकृतधर्म्ममपहायविकृत्यन्तरधर्म्मग्रहेहेत्वभावा
त् कल्पपादपादौ विशेषोपदेशानर्थक्यापत्तेश्च ॥ न-
नु ब्रह्माण्डोक्त मेकाग्निकत्व मत्रान्वीयतामितिनब्रू-
मः किन्तु स्वल्पवित्तकत्वेयदेकाग्निकत्वं ब्रह्मांडउ
क्तन्तेनविद्योयत्संभवल्लघुगुरुकल्पानां महादाना-
नांधनाल्पत्वेपिदानाधिकारोस्तिकिन्त्वेकाग्निवि-
धिना तद्वीजन्तु ब्रह्मांड वदत्रापि समानमेवतेनतद्व-
दत्रापि स्वल्पधनस्य युक्तमेकाग्निकत्वं नचैवमुक्त-
न्यायादेवकल्पपादपादीनांत्रयाणामेकाग्निकत्वेवि-
शेषोपदेशोव्यर्थःस्यादितिवाच्यम् प्रतिपत्तिलाघ-
वाय कृतस्योपदेशस्यापर्य्यनुयोज्यत्वादभिप्रायस्वा-
तन्त्र्यादुपायस्योपायान्तरादूषकत्वाच्च अतएववी-
जसाम्या दुर्गाभिलोक्तगायत्रीजपस्य शुष्कवास-
स्काधिकारिकत्वं जलसन्ध्यावन्दनपक्षेवाजसनेयि-
नामप्यन्वेति तथाद्रव्याल्पत्वे गजरथपृथिवीक-
ल्पलतापंचलांगलविश्वचक्रसप्तसागरहिरण्याश्वरथ-
महाभूतघटानामेकाग्निकत्वमपीति चेन्न विकृतौ-
विशेषोपदेशेनैवप्राकृतधर्म्मवाधो नत्वन्यथावीज-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

साम्यस्याप्रयोजकत्वात् गजरथेतु अस्थानप-
देनरूढ्यावाणपुष्प मेवोच्यतेरथकारआदधीतेत्यत्र-
जातिविशेषवत् नतुयोगेनस्थानेतरवत् योगार्थस्य-
चरमोपस्थितत्वात् क्वचिच्चरमोपस्थितस्यापिप्रकर-
णादिसाहित्येनयोगार्थस्यान्वयप्रतियोगित्वमेवोऽन-
न्यगतिकत्वात् अत्रचब्राह्मणेभ्य इतिविशेषोपदे-
शेन तदेवनियम्यते सिद्धेसत्यारम्भस्यनियमार्थ-
त्वात् यथाप्रकृतौ यवप्राप्तौ तद्धर्म्मातिदेशाद्विकृता-
वपितल्लाभसंभवेतत्रपुनर्य्यवोपदेशेनयवनियमोव्री-
ह्युपदेशेन व्रीहिनियमइति सिद्धान्तः अन्यथोप-
देशानर्थक्यापत्तेः नचप्रकृतयागे विकल्पेनोभयत्र
प्राप्तौविकृतौविशेषोपदेशस्य भवतु प्रकृतिप्राप्तक-
ल्पान्तरवाधकत्व मत्रतुनतथा प्रकृतावेकाग्नप्राप्तेः
नहिप्रकृत्यतिदेशप्राप्तमेवनिषिध्यतइति व्रूमःकिन्तु
लाघवात् प्राप्तमात्रम् प्राप्तिश्चप्रकृतियागेविकृ-
तिधर्म्मातिदेशात् अत्रचस्वल्पधनकत्वब्रह्मांड-
वत् तस्माद्गजरथपंचलांगलपृथिवीकल्पलता-
नांचतस्तृणामप्युक्तचतुरग्निकानांवजलेपायितंचतु-
रग्निकत्वमिति हन्त तथाप्यनुक्ताग्निके द्रव्या-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पकर्षेऽग्नत्रपकर्षोऽस्तुनियमाभावात् न प्राकृतधर्म्मत्यागे बीजाभावात् पंचलांगलकमित्यत्रबहुब्रीहिरेव भूमिदानं नरोदद्यात्पचलांगलकान्वितमिति स्मरणात् नचगोभूमिलांगलधुरन्धर संप्रदानादिति स्मरणात्तुल्यवदन्वयोस्तु तत्रापि भूमेर्दानं विधेयमित्युपसंहारात् भूमेरेवप्राधान्यप्रतीतेः अथसर्वंनिवेदये दत्रसपत्नीकस्यगुरोः सन्निहितत्वात् सएवसंप्रदान मन्येवरणादिभाज इति अत्रच गुरुर्य्यस्मैनिवेदयेदित्यनेनतिलादिहोमेनाहोतृकत्वेन चातुर्थ्यरणेशब्दसिद्ध्यात्रापि चतुरग्निकत्वनियम एव प्राप्तत्वेन पुनरुपदेशस्य नियमार्थत्वादन्यथा वैयर्थ्यापत्तेः अतएवनिरग्निकत्वमितितत्त्वम् अत्रैवपर्जन्यादित्यरुद्रेभ्यःपायसंनिर्वपेच्चरुमितिस्मरणान्मिलितदेवतात्वमैन्द्रवायव्यंग्रहंगृह्णातीतिवदितिकेचित्तन्न द्वन्द्वान्तरमनुशिष्टेनाण् प्रत्ययेनदृष्टान्तेमिलितेदेवतान्वयोबोध्यत इति तत्रमिलितदेवताभिधायकोणप्रत्यय एवास्ति प्रकृतेतुमिलितदेवताभिधायकाभावात् नचपर्जन्यादित्यरुद्रेभ्य इति बहुवचनश्रवणात् सहितानामेवहोमान्वयोऽस्त्वि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिथाचयम् ग्रहेभ्योलोकपालेभ्यो जुहुयादित्यत्रा पिलथात्वापत्तेः तस्मादत्रमिलितदेवतात्वेपमाणं तत्रैवमिलितहोमान्वयोऽत्रतु गर्गाभोज्यन्तामितिवदभिधानक्रियायामेवसाहित्यान्वयः क्रियायास्तु प्रत्येकमेवेति धेनुदानेतु एवमुच्चार्य्य ताम् धेनुं ब्राह्मणेभ्योनिवेदयेदिति विशेषोपदेशाच्चतुरग्निकत्वलाभोद्रव्यापकर्षेऽग्न्यपकर्ष इति भ्रमोहेय इति इत्यामन्त्र्यततोदद्याद्विश्वचक्रमित्यत्रापिप्रकृतिवदितिन्यायेन चतुरग्निकत्वमेव द्रव्यापकर्षेणाग्न्यपकर्षः परास्त एव विश्वचक्रदानेद्वितीयावरणपूर्वादिप्रदक्षिणक्रमकनेम्यन्तरालस्थजलशाय्यत्रिभृगुवशिष्ठब्रह्मकश्यपमत्स्यकूर्म्मवराहनरसिंहवामनरामरामरामवुद्धकल्कीत्यादिकं दानवाक्यं तत्रनवीना एकशेषमिच्छन्ति तन्नद्वितीयावरणेततपूर्वतोजलशायिनामित्युपक्रम्य रामोरामश्चरामश्चवुद्धः कल्कीतिच क्रमादित्यनेन प्रतिकोष्ठकंन्याशाविशेषानिर्द्देशयोरावश्यकत्वेनतदभावात् अत एवतृतीयावरणे गौरीमातृभिर्वसुभिर्वृत्तेत्यत्रवसवः प्रत्यूषादित्वेनमातरोब्राह्म्यादित्वेनन्यस्यन्ते निर्दिश्यन्ते च तेषांगणदेवता-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वं संनिहितप्रोषितत्वात् । कल्पलतादानेतु मध्य मेद्वेतुगुरवेऋत्विग्भ्योन्यस्तथैवचेतिविशेषोपदेशाच्च तुरग्निकत्वनियम एव नैवारंचरुर्भवतीतिवदेव । अतएव प्राकृत्तोविभागः परास्तो-ग्न्यपकर्षोपिनि-रस्त इति ॥ इति ददातिरसामरसंयुतामितिसप्रसा-गरे चतुरग्निकत्वमेव प्रकृतिवदितिन्याया द्बीजसा-म्याद्विशेषोपदेशविरहाच्च वित्तालपत्वेत्वेकाग्निक-त्वमितिवदन्ति तत्रचोक्तमेव वैकृतविशेषोपदेशम-न्तरेणप्राकृतधर्म्मस्यत्यागायोगात्बीजसाम्यस्या-प्रयोजकत्वादिति ॥ ऋत्विग्भ्योदक्षिणान्ददादि-तिविशेषोपदेशादेव रत्नधेनुदानेचतुरग्निकत्वमे-वइत्युच्चार्य्यमहाभूतघटंयोविनिवेदयेदित्यत्रविशेषो पदेशविरहाद्बीजसाम्याच्च वित्तालयत्वेत्वेकाग्निक-त्वमपिवदन्ति ॥ तत्रोक्तमेवात्रचषोड़शैतानियः कु-र्य्यान्महादानानिमानवः । नतस्यपुनरावृत्तिरिहलो केविजायतइत्यत्रषोड़शपदप्रयोगस्यानेकसाध्यत्वे-ननैकप्रयोगविषयत्वमतोऽपुनरावृत्तेर्म्मिलितषोडश-महादानसाध्यत्वाभावेनास्यस्तावकत्वमितरवसेय-मितिदिक् ॥ ० ॥ मत्स्यपुराणे ० कृष्णाजिनप्रदानस्य-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विधिङ्कालंममानघ। ब्राह्मणंचसमाचक्ष्चतत्रमेसंशयोमहान्॥ वैशाखीपौर्णमासीचग्रहणंचन्द्रसूर्य्ययोः। पौर्णमासीचयामाघे आखाटीकार्त्तिकीतथा॥ उत्तरायणेचद्वादश्यांतत्सर्वाद्दत्तम्महाफलम्॥ अत्रच प्रकृतदानंद्वादश्यंगकमेव तत्स्याद्दत्तंमहाफलमिति-उपसंहारादितिभ्रान्ताःतन्मन्दम् अथचैत्र्यां। वृषोत्सर्गः कार्त्तिक्यांवाप्रयत्नतः इतिवदत्रापिविशेषप्रतीलःतेः॥ नचादिवसस्याष्टमेभागेयदामन्दायतेरविः। कालःसकुतुपोनामतत्रदत्तमथाक्षयमितिवत् प्रकृतेपिगुणपरतैव तत्रहि पूर्वाह्णे मातृकंश्राद्धं अपराह्णेतुपैतृकं। एकोद्दिष्टन्तुमध्याह्ने प्रातर्वृद्धिनिमित्तकमितिवचनादन्यतः प्राप्तत्वेनगुणविधिरेत्र यथा चमसेनापः प्रणयीत गोदोहेनपशुकामस्येत्यत्र यथावासोष्णीषाऋत्विजःप्रचरन्ति लोहितोष्णीषा ऋत्युजः प्रचरन्तीत्यत्रयथावागृहे प्राकृतीसन्ध्यागोष्ठेदशगुणाः स्मृताः। नदीषुशतसाहस्री अनन्ताशिवसन्निधौइत्यत्रसर्वत्रकालस्योष्णीषसंवंधस्यदेशस्यवान्यतः प्राप्तत्वात् ननुमहाफलमितिश्रुतेरत्रापिकालान्तरविधिरस्तु वाक्यार्थत्वेनपदार्थत्वेनवातदभावात् तात्पर्य्यगौरवाप-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्तेश्च अतएव गयायां द्वादशदैवतश्राद्धस्याप्राप्तत्वेना-
गतया विशिष्टविधिरेवं च सामान्यतो दशमुहूर्तान्वि-
धायापरपक्षस्यापराह्णः श्रेयानिति कालविधौ तथा सा-
मान्यतः श्राद्धं विधाय श्राद्धस्य पूजितो देशो गया गं-
गा सरस्वती इति देशरूपगुणविधावुदाहरणं कर्म्ममी-
मांसकानामिति स्तुतिरेवेति दिक् ॥ ० ॥ सर्वत्र दाने महा
दाने वा प्राग्ग्रीवमुदक्पादमधः स्थितरोमकमेव सशृं-
गं सखुरं कृष्णाजिनमास्तरणीयं ततः सशृङ्गं सखुरमा-
स्तरेत् कृष्णमार्गकमिति मत्स्यपुराणात् चर्म्माप्युत्तर-
रोमाणि प्राग्ग्रीवाणीति कात्यायनवचनाच्चेति ॥ भू-
मिदानप्रयोगे प्रियदत्तेति विशेषणीयम् तथैव सर्वत्र-
प्रयोगात् तत्र यद्यप्यापाततो न प्रमाणं दृष्टमस्ति तथा-
पि तदन्वेषणीयमिति दिक् जप्यानि सूक्तानि तथैव ते-
षामनुक्रमेणैव यथानुरूपमित्यत्र सूक्तं मन्त्रस्तत्संघो
वा तेन पूजितदेवतानां यथासंभवं मन्त्रो मन्त्रसंघो वा ज
पनीय इत्यर्थः॥ यत्तु सूक्तं मन्त्रसंघ एव तेन यस्या एव दे-
वतायाः सूक्तमस्ति तस्या एव सूक्तजपो न तु सर्वस्या इ
ति सागरः। तन्न अनुवाकादिपदवत् सूक्तपदस्य मन्त्रसं
घे शक्तत्वाभावात् व्यवहारविरोधादत एव ब्रह्माच्युते

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शार्कवनस्पतीनांसुमन्त्रतोहोमचतुष्टयंस्यादित्यत्रा-
च्युतहोमेसहस्त्रशीर्षेत्यादिसूक्तजपोवज्रलेपायित ए
वेत्यस्मत्पितामहचरणाः ॥ यदप्यपिमत्स्यपुराणे गं-
गाद्याइति श्लोकार्द्धम्मन्त्रभिन्नत्वेनन्यसनीयप्रकरणे
श्रूयते तेनतसयनकरणत्वं किन्तुसर्वेसमुद्राइत्यादेरेव
तथापिवृद्धाअविशेषेणलिखन्तीति ॥ ० ॥ कुंडमाम-
हेश्वरसंवादे हस्तमात्रमधः खातंचतुरस्त्रैकहस्तकम् ।
वेदिपश्चिमतः कुंडंकुर्य्याद्दद्याच्चमेखलाम् ॥ पुः करि-
ण्याम् परीक्षासुत्रिमेखलमुदाहृतम् मेखलाप्रथमाका
र्य्याद्यंगुलोच्छ्रायविस्तरा । हुताशनांगुलाकार्य्या द्विती-
याकुंडवेदिभिः । चतुरंगुलन्ततः कुर्य्यात् तृतीयामुन्न-
तामथउच्छ्रायसमविस्ताराः सर्वाः कार्य्याश्चमेखलाः ॥
मत्स्यपुराणे वेद्याश्चपरितोगर्त्तारत्निमात्रास्त्रिमेख-
लाः । पंचरात्रेएताहस्तमिते कुंडेवेदाग्निनयनांगुलाः ।
पंचरात्रशैवागमयोः । तद्वहिर्म्मेखलास्तिस्रोवेदव-
ह्नियमांगुलैः । कालोत्तरेमेखलात्रितयंकार्य्यं कोण-
रामयमागुलैः । वशिष्ठोक्तग्रहयज्ञे । चतुस्त्रिद्व्यंगु-
लावापितिस्रः सर्वत्रशोभनाः । लक्षणसंग्रहेप्रथमा-
द्यंगुलाव्यासादुन्नतामानवांगुलैः । मध्यात्तुत्र्यंगु-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लावाह्ये तृतीयातुयमांगुला । तेनसर्वदिक्षुखाता द्व-
हिरेकांगुलम् कंठन्त्यक्त्वा कंठसन्निहिताप्रकृतभूमि-
तोनवांगुलोन्नतावहिर्द्वितीयामेखला चतुरंगुलोन्न-
ताप्रथमामेखलाकार्य्या । आद्यावेदोशविस्ताराउन्न
तासानवांगुलैरिति विश्वकर्मवचनात् एकानवांगुलो-
च्छ्रायाद्वितीया पंचकोच्छ्रिता । तृतीता द्यं गुलोच्छ्रा
या कीर्त्तितोयं समुच्छ्रयः इतिलिंगपुराणात् ॥ या-
यातुमेखलापूर्वासाभूमिःपरिकीर्त्तितेतिश्रवणाच्च द्वि-
तीयातुवहिस्तत्सल्लग्नाप्रकृतभूमितःपंचांगुलोच्छ्राया
तृतीयामेखला।तस्त्र्यंगुलोच्छ्रिताद्व्यंगुलविस्तारामे-
खलाकार्य्यालिखितहेतो स्तत्संल्लँग्ना प्रकृतभूमि-
तोद्व्यंगुलोच्छ्रिताद्व्यंगुलविस्तारातृतीयामेखलाकार्य्ये-
ति परमगुरवः अतएवक्रमेणद्वित्रिचतुरंगुलोच्छ्र।य-
मेखलात्रययुतंकुंडंकार्य्यमितिकर्म्मकरलिखनम् त-
थाचतुस्त्रिपक्षांगुलोच्छ्रायचतुस्त्रिद्व्यंगुलविस्तृतमेखा
लात्रययुतानिकुंडानीति रूपनारायणलिखनमपिसं-
गच्छते ॥ येतुप्रकृतभूम्यवधिकमेवचतुरंगुलत्वं त्र्यंगु-
लत्वं द्यंगुलत्वम्मेखलानांतेनखातसन्निहितप्रकृतभू-
मितश्चतुरंगुला । तद्वहिः प्रकृतभूमितस्त्र्यंगुला तद्व-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हिः प्रकृतभूमितोद्व्यंगुलाकार्य्येत्याहुः तेभ्रान्ताः । विश्वकर्म्मादिवचनविरोधादितिएताश्चमेखलाः खातादूहिरेकांगुलंकंठंत्यक्त्वाकार्य्याः । खातादेकांगुलंत्यक्त्वामेखलानां विधिर्भवेदितिपिंगलानां मतसंवादात् महादानेतु खाताद्बहिरेकांगुलंत्यक्त्वा द्व्यंगुलोच्छ्रिता तावद्विस्तारा एकैवमेखलाकार्य्या मेखलैकाथवातिस्त्रोभूतसंख्याथवाप्रियेइतिवचनात् । सुमेखलायोनीत्युत्पत्तौ विशेषश्रुतेर्योनिस्तुसर्वत्रतुल्यैव-एतत्सर्वेषुकुंडेषुयोनिलक्षणमुच्यत इतिवचनादिति वास्तुलेखनेचदशपूर्वायतारेखादशचैवोत्तरायतेतिवचनात् वास्तुमंडलवायव्यउपविश्यपूर्वाभिमुखोगुरुरुत्तरस्यामारभ्यदशरेखाः प्रांङ्मुखीर्य्यथादक्षिणं-कुर्य्यात् एवंनैर्ऋत्यामुपक्रम्योपविश्यपश्चिमादुत्तरायताःपूर्वापररेखा उत्तरोत्तरंकनकशलाकयाकार्य्याः प्रदक्षिणन्तुकर्त्तव्यंवास्तोःपदविलेखनमित्यसंकुचितश्रवणादिति परमगुरवः । भ्रान्तास्तुदशप्रागायतादक्षिणोपक्रमाउदगपवर्गा रेखाःकृत्वादशदक्षिणोत्तरायताःपश्चिमोपक्रमाःपूर्वापवर्गारेखाःकुर्य्यात् प्राच्युदीचकर्म्माणिसन्तिष्ठेरन्नितिकात्यायनवचनात् उ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दकसंस्थमेवरेखाकरणमिच्छन्तिअतएवमणिकेत्रीणिप र्य्यन्यायाद्भ्यःपृथिव्यैचेत्यत्रवलित्रयं प्राक्संस्थमुदक्संस्थंवेतिकाम्तएवशिष्टा आचरन्ति लिखन्तिच-अतएवजयमाधवनामनिग्रंथे एवमेवलिखितमिति-तन्नसूत्रस्योत्सर्गपरत्वात्वचनस्यविशेषपरत्वेनप्रक्कृतपरत्वादिति ॥ यद्यपितथेन्द्रायेश्वरायचेतिमत्स्यपुराणेश्रूयते तथापिशिवपदेननहोमोमन्त्राभिधानवलात् इति ॥ * कृष्णाष्टमीव्रतेतु यद्यप्युभयवेधेऽष्टमीनवमीमिश्रैवोपादेयाषण्मुन्योर्वसुरन्ध्रयोः । षष्ट्यष्टमी अमावास्याशुक्लाचैवचतुर्द्दशी । एताः परयुताः कार्य्याःपराः पूर्वेण संयुता इति वचनात्-अरुणोदयवेलायांनवम्यांचततस्त्रिय इतिवाक्यशेषाच्च तथापि तस्मात् तत्रैवसंपूज्य इतिविधिवलात्पूजैवप्रधान मुपवासोऽङ्ग मतः परदिने पूजायोग्य काललाभेसति युग्मविध्यादरोनतुतदयोग्ये अतएवोभयत्राविहितकाललाभेसति युग्मविध्यादर इति सिद्धन्तल्लिखितमिति ॥ ॥ एकादशीव्रतेतु यत्रदशमी विद्धैकादशीदिनान्तरेनवर्द्धते तत्रदशमीविद्धैवोपोष्या पक्षहानौस्थितेसोमेलंघयेद्दशमीयुताम् ॥ तथा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृद्धौपरातुकर्तव्याक्षयेपूर्वान्तुकारयेदित्यादि महाजन परिगृहीतवाक्यात् दशमीविद्धैकादशीनिन्दाप्रतिपादकवचनानितु परत्रैकादशीसम्भवविषयाणीत्युभयवेधेतु द्वादशी मिश्रैवोपोष्या एकादश्यष्टमी षष्ठीद्वितीयाचचतुर्द्दशी । अमावास्यात्रयोदश्यावुपोष्याःस्युः परान्विताः इतिवचनात्। यत्रतुपूर्वदिनेषष्ठिदंडावच्छिन्नैवाग्रिमदिने द्वादशी हानियुक्ता द्वादशीसाम्ययुक्तावावर्द्धतेतत्रोभयत्राग्रिमदिनएवोपासनीयाउपोष्याःस्युःपरान्विता इतिलिखितवचशात् नचतस्यप्रकरणा द्वैधविषयत्वेनाखण्डतिथ्यविषत्वमितिवाच्यम् संकोचापत्तेःकिंचैकादशी मुपवसेदित्यत्रान्तिमभागयुक्तैकाश्यहोरात्र मुपवसेदि त्यस्यावश्यवक्तव्यत्वात्। पूज्यविधिप्रवृते रतएव यत्रदशावेधीनास्त्यग्रिमदिनेचैकाशीवर्द्धते तत्रापिवर्द्धमानैकादश्युपोषणम् शास्त्रार्थइतिकृत्यमहार्णवेपरमगुरवः । नचद्वादश्यांपारणाऽलाभेपूर्वा मुपवसेद्गृहीसम्पूर्णैकादशीयत्रप्रभातेपुनरेवसातत्रोत्तरांयतिःकुर्य्यात्पूर्वामुपवसेद्गृहीतिवाक्यद्वयात्तस्यद्वादश्याधिक्यविषयकत्वमेव एतयोरनाकरत्वात् अतएवनि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्णयेलिखनमप्येतत्परतयैवनेयमेकवाक्यातानुरोधात् गौड़ास्तुद्वादशीक्षये लिखितवाक्यद्वयाद्यवस्थामिच्छन्तः पूर्वमेवोपवसन्ति किंच यत्रपूर्वदिनेदशमी विद्धाग्रिमदिनेद्वादशीयुतैवतृतीयदिनेद्वादशीनवर्द्धने तत्रदशमीवेधेनिन्दांपश्यन्तोद्वादशीमेवोपवसन्ति प्रधानकालानुरोधात् पारणादौअंगेद्वादशीवाधएवपठन्तिच एकादशीद्वादशीयुक्तापरतोनचवर्द्धते गृहिभिर्यतिभिश्चैवसैत्रोपोष्यासदातिथिरितितत्रचोक्तमेव यत्तुद्वादशीक्षयेतद्वृद्धौवासर्वत्रषष्ठिदण्डात्मिकैवोपवसनीयापूर्णाप्येकादशीत्याज्यापरतोयदिवर्द्धते इतिवाक्ये पूर्णापीत्यस्यपूर्णकल्पापीत्यर्थइति अन्यथापिशब्दानर्थक्यापत्तेस्तेनपूर्णाग्राह्यैवेतिवाक्यार्थःतथा चशब्दादेवतिथेरुदयास्तमनविशुद्धत्वात् कपालाधिकरणन्यायाच्चेतिपरेषांमतम् । तत्सर्वथैवायुक्तमप्रयोजकत्वात् पूर्णापीत्यस्यविषंभुङ्क्ष्वेतिवदर्थाच्चेति संपूर्णैकादशीयत्रप्रभातेपुनरेवसा । त्रयोदशीउषःकालेउपोष्यातत्रकाभवेत् । उपोष्येद्वेतिथीतत्रविष्णुप्रीणनतत्परैरित्येनन द्वादशीसाम्ययोगे शुद्धाधिकपक्ष-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वयेसर्वेषामुपवासविधानं । तच्चसंपूर्णैकादशोयत्र प्र-
भातेपुनरेवसा । उत्तरान्तुयतिः कुर्य्यात्पूर्वामुपवसेद्गृ-
ही तथानवम्यांस्या त्परेहनीत्येकवाक्यतयाश्रद्धा-
कृतविषममेवेदमितिद्रष्टव्यम् ॥ अथवागृहस्थ-
सन्यासिनोरुभयत्रापिविधानसामर्थ्यात् उपोष्ये-
द्वेतिथीइत्यत्रनानुपपत्तिः एकादश्यान्नभोक्तव्यंपक्ष-
योरुभयोरपिभुंजन् गोमांसभक्ष्यस्य पापमाप्नोति-
मानवः ॥ शुक्लावायदिवाकृष्णासमुपोष्यसुखीभ-
वेत् । भुंजन्सुरापानसमंपापमाप्नोतिमानवः । इ-
त्यत्रैकादश्यां नभुंजीतेतिश्रवणात् तथैकादशीमुप-
वसेदिति श्रवणाच्च एकादश्यामुपवासोविधीयतेस-
चाहोरात्रव्यापीभोजनाभावोदोषाभावविशिष्टः उ-
पावृत्तस्यदोषेभ्योयस्तुवासोगुणैः सह । उपवासः
सविज्ञेयः सर्वदोषविवर्जितः इत्यनेनपरिभाषि-
तः सचाकरणेनिन्दाश्रवणात् करणेफलश्रवणाच्च
संवलिताधिकारिकः । तत्रचसंक्रान्त्यामुपवासंच-
कृष्णैकादशिवासरे । चन्द्रसूर्य्यग्रहेचैवनकुर्य्यात् पु-
त्रवान्गृही ॥ इन्दुक्षये्यर्कसंक्रान्त्यां एकादश्यां-
शितेतरे । उपवासन्नकुर्व्वीतयदिच्छेत् सन्ततिं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ध्रुवाम् ॥ संक्रान्त्यामुपवासेनपारणेनयुधिष्ठिर । एकादश्यान्तुकृष्णायांज्येष्ठःपुत्रोविनश्यति । शयनीबोधनीमध्येयाकृष्णैकादशीभवेत् । सैवोपोष्यागृहस्थेननान्याकृष्णाकदाचनेत्यादिश्रवणात् पुत्रवतांगृहस्थानांकृष्णैकादश्यामुपवासोनिषिध्यते तथाशयनीबोधिनीत्यादिभविष्योत्तरवचनेनमार्गादिकृष्णपक्षीयानामष्टानामेकादशीनांगृहस्थमात्रंप्रतिनिषेधेसिद्धे हरिशयनालिंगितानामपिचतसृणांकृष्णानांपुत्रवत्सुगृहस्थेषुनिषेधआयाते शुक्लानित्यासमाख्याताकृष्णानैमित्तिकीस्मृतेतिविष्णुवचनेनगृहस्थानामपुत्राणान्ततफलकामनोदयेचतसृषुहरिशयनालिंगितासुकृष्णास्वधिकारः संक्रान्त्यामुपवासन्त्वित्यादिवचनपर्य्यालोचनयाच कृष्णैकादश्यांसंक्रान्तौचन्द्रसूर्य्यग्रहेऽमावास्यायांवाकामनोदयेचाधिकारएवेतिनिर्गलितम् अतएवएकादश्यान्नभुंजीत पक्षयोरुभयोरपि । वनस्थयतिधर्म्मोयंशुक्लामेवसदागृहीतिविष्णुधर्म्मवाक्याच्छुक्लैवगृहस्थानांनित्यातत्रैवचयानिकानिच पापानीत्यादयो वहवोनिन्दार्थवादाइति । मच्छयनेमदुत्थानेमत्पार्श्वपरिवर्त्तने-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पयोमूलफलाहारीहृदिशल्यंममार्प्पंतीति भगव-
द्वाक्यविशेषनिन्दाश्रवणादन्यासुफलमूलदुग्धाशन
मविरुद्धमेवेतिप्राच्याः । तन्मन्दम् वाधसापेक्षता-
पत्तेः तात्पर्य्यगौरवान्निषेधस्यात्यन्तपरत्वेनाप्युप-
पत्तेरिति ॥ एकादश्यान्निराहारोयोभुंक्तेद्वादशी-
दिने । शुक्लावायदिवाकृष्णातद्व्रतंवैष्णवंमहदिति
वराहपुराणात् पारणेद्वादशीनियमएव । पारणन्तु-
त्रयोदश्यांयः करोतिनराधमः । द्वादशद्वादशीर्हन्ति
नात्रकार्य्याविचारणेति भविष्यसामान्यनिषेधोपी-
तिगौड़ाः तन्मन्दम् महदितिवाक्यशेषादतएव यदा-
भवेद्दनीवाल्पा द्वादशीपारणादिने । प्रातरेवतदाकु-
र्य्यात् कर्म्ममध्याह्निकन्त्वपि । संकटेविषमेप्राप्ते-
पारणन्तुभवेत्कथम् अद्भिस्तुपारणंकुर्य्यात् पुनर्भु
क्तंनदोषकृत् कलाप्येकादशीयत्र परतोद्वादशीनचे-
त् । पुण्यंक्रतुशतस्योक्तंत्रयोदश्यान्तुपारणे इत्या-
दीनितत्परायवापेक्षितविधेरिति ॥ यन्मतेपिश्रा-
द्धशेषान्नप्रतिपत्तिरंगंतन्मतेप्येकादश्यादौतदाहारं-
विनैवतत्सिद्धिरनन्यगतिकत्वात् ईज्यायामावाह-
नवदितिसाम्प्रदायिकाः ॥ वस्तुतस्तु तदाशेषान्न-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्यघ्राणमात्रम् उपवासोयदानित्यः श्राद्धन्नैमित्ति-
कंभवेत् उपवासन्तदाकुर्य्यादाघ्रायपितृसेवितमि-
तिवराहपुराणात् तन्नैवप्राशितंनैवाप्राशितंभवती-
तिकालादर्शलिखितश्रुतेश्चेति ॥ केचित्तु रवि-
वारेपारणमुपोषणंवासंक्रान्तौच गृहिणांनेच्छन्ति-
संक्रान्तौरविवारेचग्रहणेचन्द्रसूर्य्ययोः पारणांचो-
पवासंचनकुर्यात् पुत्रवान्गृहीतिराजमार्तण्डलिखित
वाक्यात्तेहिभ्रान्ताः तथाहिराजमार्त्तण्डएवतदुत्तरम्
तन्निमित्तोपवासस्यनिषेधोयमुदाहृतः नानुषंगकृतो
दोषोयतोनित्यमुपोषणमितिवचनदर्शनादिति ॥ द्वा
दशीव्रतेतुद्वादश्यांविष्णुपूजनमेवप्रधानमुपवासोंग-
मितिद्वादश्यवृद्धौदशमीविद्धैवादत्तुमुचितेतियुक्तमेवे
ति ॥ ॥ संस्कारश्चपुत्रस्यप्रथमएवाद्यादेवसंस्का
रोदयसंभवेद्वितीयादेर्व्यर्थत्वात् किंच द्वितीयादयोन
संस्कारक्षमाः सजातीयव्यापारावरुद्धैःसजातीयव्या
पारान्तरानुदयानियमात् यद्यपिव्याप्यवृत्तिजातीय
एवायंनियमोऽत एवकर्म्म वतिकर्म्मानुत्पादस्तथापि
वैदिकैःकर्म्मभिःपुण्यैर्न्निषेकादिभिर्द्विजन्मनाम् ।का
र्य्यः शरीरसंस्कारः पावनः प्रेत्यचेहच ।गार्भैर्होमै

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जातकर्म्म चौड़मौंजीनिवंधनैः वैदिकैर्गार्भिणंचैनोद्विजानामपमृज्यतेइत्यादिमनुवचनेन प्रथमविवाहान्ते नैवतस्यजातत्वाद्द्वितीयस्य तदुत्पादकत्वेमानाभावइत्यत्रैवतात्पर्य्यादत एवद्वितीयादेव्यर्थत्वादितिनिर्णयेप्युक्तम् ॥ प्रमादतस्तुयन्नष्टं तावन्मात्रं नियोजयेत् । अन्यथास्तेयभागीस्याद्धिमन्यदत्ते विनाशिनिइदंतत्सृष्टाप्रतिपादितपरमितिचण्डेश्वरः । सांप्रदायिकास्तु सर्वत्रसंकोचात्प्रायश्चित्तमाचरन्तितदित्थमत्रप्रयोगः ॥ ओंअद्यममत्प्रमादनष्टहिरण्यतुल्यपरिमाणाहिरण्याप्रदानहेतुकहिरण्यस्तेय जन्यपापानुत्पादकामइदंप्रमादनष्टहिरण्यतुल्यपरिमाणंहिरण्यमग्निदैवतमित्यादि ॥ दक्षिणाचदेया । अत्रसुवर्णत्वजातेर्दधित्वदुग्धत्ववद्व्यणुकादारभ्य वृत्तेरत्रचसुवर्णत्वादीनां परमाणुवृत्तित्वेतदारब्धसकलकार्य्यस्यसुवर्णत्वापत्तिरितिवाढम् ॥ अभिव्यंजकाभावान्नोपलब्धिरितिचेत् न योग्यव्यक्तिवृत्तिजातीनामभिव्यंजकस्यापिनियतोपलभापत्तिरिति नचसुवर्णारम्भकतेजः परमाणुमात्रवृत्तिःस्यात् । तेजस्त्ववत्तेजोमात्रवृत्तित्वापत्तेरिति ॥ सुवर्णरजतैरित्यत्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वहुत्वस्यप्रत्येकमन्वयेवाक्यभेदःस्यादतएवधवखदि रौछिन्धीत्यत्रसाहित्यलक्षणांब्रूमइतिचेत् । गुरुमतमेतत्० अन्वयप्रयोजकरूपवत्वंयोग्यतेतिभट्टैरनुपगमात् तन्मतेवाधकविरहस्यैवयोग्यतात्वात् तथाचसाहित्यलक्षणांविनापि विनिगमनाविरहादुभयत्र वहुत्वान्वयेपिनानुपपत्तिः । नचवाक्यभेदःक्रियान्वयितावच्छेदकनानात्वेवाक्यभेदादत्रवहुत्वस्यैकस्योभयान्वयित्वादिति ॥ ० ॥

विवाहेयद्दानवाक्यं कन्यायास्तत्प्रपितामहपूर्वकम्। पैतापौत्रीमनुक्रमेदिति वचनात् अस्यार्थः पितृनिर्देशानन्तरंपुत्रनिर्देशःकार्य्यःतेनप्रपितामहपूर्वकवाक्यतयाप्रथमंप्रपितामहनिर्देशः ततस्तत्पुत्रनिर्देशः सिद्ध्यति। अत्रत्रैवार्षिकादिपदवदुभयपदवृद्ध्यापैतापौत्रीतिप्रयोगःकन्यादानन्त्वद्भिरवकार्य्यं ब्रतुतिलादेरपिप्रवेशःअद्भिरेवद्विजाग्र्याणांकन्यादानंप्रशस्यतइति मनुवचनात्। ज्योतिषे। दधतिशतभिषायांस्नानवत्यो युवत्योदयितजनितभोगाश्लेषचित्रेषदुःखम्।धनमिवकृपणानांसम्प्रजन्मापितासांविफलतिकुचकुम्भः कुम्भिकुम्भस्थलाभः । सीतगौवरुणदैवतेयदिस्नानमा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चरास्तिवामलोचना । सप्तजन्मविधवातिदुर्भगास्यात् ध्रुवंमुनिवरैरितिस्मृतमित्यादीनिस्त्रीणांशतभिषास्नानेनिषेधकानिवचनानिनित्यस्नाननिषेधकानि उत नैमित्तिकस्नाननिषेधकानिकाम्यस्नाननिषेधकानितत्र-नतावदाद्यः नित्यस्यशुचिविहितकालजीवित्वप्र-युक्ताधिकारिकत्वेन निषेद्धुमशक्यत्वात् । नद्वितीयस्तस्यापिनैमित्ति कानिकर्म्माणिनिपतन्तियदायदातदातदैवकार्य्याणिनकालस्तु विधीयतइतिकात्यायनवचनेनप्राप्तस्यनिषेद्धुमशक्यत्वात् । । तस्मात् परिशेषाद्रागप्राप्तस्नाननिषेधकानि ।अतएवकुहूस्नानंगयायानंतिलैस्तर्प्य णमेवचेत्यादिजीवत्पितृकस्यकुहूस्नाननिषेधोयदिसमूलस्तदारागप्राप्तस्नानविषय-इतिनिबद्धारः । तथाचतन्नक्षत्रेपिस्त्रीणांनित्यंनैमित्तिकंस्नानमविरुद्धमेवेतिदिक् । शंखलिखितौनस्त्रीशूद्राशुच्येकपाण्यावर्जितेन । अत्राशुचिपदमाचमनकर्तृभिन्नपरम्शूद्रासाहचर्य्यादेव मेकपाणिपदमपिबहुब्रीहिणाकर्तृव्यतिरिक्तधर्म्मि परमेवतेनस्वयंवामपाण्यावर्जितमनिषिद्धमेव । अतएवबौधायनोपि । मूत्रपुरीषेकुर्वन्दक्षिणहस्तेन गृह्णातिसव्यआच

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मनीयमितिकेचित्तन्न एकपाणिनेत्यत्रैकश्चासौपाणिश्चेतिकर्म्मधारयोलघवात् । साहचर्य्यस्याप्रयोजकत्वान्नतुशूद्रसाहचर्य्यात्तस्यकर्तृत्वादन्यत्रापिलुप्तकर्तृतीयाकर्तृपरैवावैषम्यार्थम् एकःपाणिर्यस्येतिवहुव्रीहेस्संजघन्यत्वादिति । यद्दिवाविहितंशौचं रात्रौतस्यार्धमिष्यतेतदर्धमातुरेप्रोक्तमातुरस्यार्धमध्वनि । आपस्तम्बः । अह्निशौचंयथाप्रोक्तंनिश्यर्धंतुतदिष्यते पथिपादस्तुविज्ञेयआर्तःकुर्य्याद्यथावलम् अत्रशौचापकर्षोनिशात्वादिपुरस्कारेणेतिकश्चित्तन्नएवंवाक्यस्यादृष्टार्थतापत्तेः किन्तुयथोक्तशौचकरणासामर्थ्यमेवापकर्षः । आर्तःकुर्य्याद्यथावलमित्युपसंहाराच्च । मनुः । एतच्छौचंगृहस्थानांद्विगुणंब्रह्मचारिणां त्रिगुणंतुवनस्थानांयतीनांस्याच्चतुर्गुणमिति दक्षःउषःकालेतुसंप्राप्तेशौचंकुर्य्याद्यथार्थवत् ततःस्नानंप्रकुर्वीतदन्तधावनपूर्व्वकम् । याज्ञवल्क्यःशरीरचिंतांनिर्वर्त्यकृतशौचविधिर्द्विजःप्रातःसंध्यामुपासीतदन्तधावनपूर्विकाम् । दक्षःयथाहानितथाप्रातर्नित्यंस्नायादनातुरःदन्तान्प्रक्षाल्यनद्यादौगेहेचेत्तदमंत्रवत् । अत्रस्नानेसंध्यायांचदन्तधावनमंगंक्त्वाश्रवणादिति-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

केचित् तन्न मुखेपर्य्युषितेनित्यं भवत्यप्रयतोनरः ।
तस्मात्सर्वप्रयत्नेन भक्षयेद्दन्तधावनमितिशातातपेन
स्वतंत्रस्यैवशुद्धिहेतुत्वेनाभिधानात् । आनन्तर्य्य
मात्रेचक्त्वः शक्तेनत्वंगागिभावेपिवहुषुव्यभिचारात्
किन्तुदन्तधावनपूर्वकमित्यत्रस्नायादित्यत्र चदर्शार
म्भणीययोरिवकालार्थःसंयोगः।विष्णुःकनीन्यग्रसम
स्थौल्यंसुकूर्च्चंद्वादशांगुलंकूर्चंचूर्णिताग्रंद्वादशांगुलंवित
स्तिमात्रम् । अष्टाङ्गुलेनमानेनतत्प्रमाणमिहोच्यतेप्राद
शमात्रमथवातेनदन्तान्विशोधयेत् । अत्रचवितस्त्या
दौपरिमाणचतुष्टयेफलभूम्नाषोडशिग्रहणाग्रहणवद्वि
कल्पइतिभ्रान्ताःअत्र परिमाणचतुष्टयेपिशुद्धेरविशेषा
द्वितस्तिरितिप्रथमःकल्पः तदभावेप्रादेशमात्रमितिम
ध्यमःतदभावेऽष्टांगुलमित्यपकृष्टइतितृतीयः कल्पः
तदभावेचतुरंगुलमित्यत्यन्तापकृष्टःचतुर्थः कल्पइ
ति । तत्रहिकाम्यत्वादस्नुफलभूम्नाविकल्पइति । उ
त्थायनेत्रेप्रक्षाल्यशुचिर्भूत्वासमाहितः प्रतिजप्यच
मंत्रेणभक्षयेद्दन्तधावनम् । मंत्रस्तुतत्रैव । आयुर्व
लंयशोवर्चःप्रजापशुवसूनिचब्रह्मप्रज्ञांचमेधांचत्वन्नो
धेहिवनस्पते । जावालः नपारक्ये सदास्नायान्नभु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्कानमहानिशिनाद्र मेकंचवसनंपरिदध्यात्कथञ्चने-
ति । अत्राहि । एकवासस्त्वस्यसर्वदानिषेधाद्येनके
नापिप्रकारेणद्विवाससाभवितव्यमित्यर्थः । तेनस्नान
कालेद्विवस्त्रत्वनियमइतितत्त्वम् । यत्तुस्नानंतर्प्पण
पर्यंन्तं कुर्य्यादेकेनवाससेतिपठित्वातर्प्पणपर्यंतं स्ना
नमेकवाससाकार्य्यमितिप्राच्यमतं तदप्यपास्तं । उ
क्तवचनस्यनिर्मूलत्वात् । समूलत्वेवाजाबालवचन
विरोधेनैकपदस्यैकजातीयपरत्वादन्यथाकदाचनेतर
स्यबाधापत्तेः । केचित्तु । एकवस्त्रः प्राचीनावि
तिनइत्यादिपारस्करवचनैकवाक्यतया प्रथमाहस्ना
नेतर्प्पणे चैकवस्त्रत्वमिच्छन्तितत्रापिप्रतिहस्तकचर
णैः । प्रथमाहप्रेततर्प्पणे सिद्धवचनसमक्षइति । न
रसिंहपुराणे । ब्रह्मक्षत्रविशांचैवमंत्रवत्स्नानमिष्य
तेतूष्णीमेवतु शूद्रस्यसनमस्कारकंस्मृतम् ॥ अत्रच
मंत्रंविनैवनमश्शब्दमभिधायशूद्रःस्नानमाचरेदिति-
वाक्यार्थेसिद्धे पद्मपुराणीय स्नानेपिनाधिकारइतिकृ
जवः तन्नतूष्णीमेवेत्यनेनाविद्वस्यशूद्रस्यवैदिकमं-
त्रपाठोनिषिध्यतेनतुमंत्रान्तरम् । मंत्रवत् स्नानमि
ष्यतइत्यत्रपूर्वार्धेवैदिकमंत्रस्यैवोपस्थितत्वेनाद्विती-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यार्थेतस्यैवनिषेधादन्यथासकलनिबंधविरोधः स्यादिति ॥ दक्षः यथाहनितथाप्रातर्नित्यंस्नायादनातुरः दन्तान्प्रक्षाल्यनद्यादौगेहेचेत्तदमंत्रवत्। अतएवप्रातरपिमंत्रवत् कातीयकल्पादिनास्नानं तथाप्रातरितिश्रुतेः । मलापकर्षणंतीरेमंत्रवत्तुजलेस्मृतम् संध्यास्नान मुभाभ्यान्तुस्नानदेशाःप्रकीर्तिताः । अत्रमंत्रस्नानंजलएवनियम्यते । तेनजलएवतत्कार्य्यं नतुस्थलेपिगेहेचेत्तदमंत्रवदितिश्रुतेः । अत्रवदन्ति। अनुद्धृतैरुद्धृतैर्वाजलैस्नानंविधीयते ॥ तीर्थंप्रकल्पयेद्विद्वान् मूलमंत्रेणमंत्रविदितिपद्मपुराणदर्शनात् स्थलेपिमंत्रान्वयइतितन्न । अनुद्धृतैरुद्धृतैर्वातोयैः स्नानंक्रियतइत्यस्य प्रथमखण्डार्थत्वात् । आशयस्थएवस्नानकरणपक्षेकयेतिकर्तव्यतयास्नानमित्याकांक्षायांद्वितीयखण्डार्थान्वयादन्यथापद्मपुराणेदक्षविरोधःस्यादिति। गौडास्तुमंत्रमात्रनिषेधवलादितिकर्तव्यतान्वयःस्थलेपिनिराबाधएवेतितन्नविभिन्नान्वयेपर्य्यवसितेतदितिकर्तव्यतायास्तत्रैवान्वयात् । किञ्चसगरस्सुदेवखातेषुतीर्थेषुचनदीषुचक्रिया स्नानंसमुद्दिष्टं स्नानंतत्रक्रियामतेतिशंखेनक्रियान्वयस्यदर्शि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्वादिति ॥ अथातोनित्यस्नानंनद्यादावित्यु-पक्रम्यसूर्य्याभिमुखोमज्जेदितिकात्यायनेनाभिधाना त् । प्रवाहेपिसूर्य्याभिमुखंमज्जनमितिकेचित्तन्ननद्यां सरस्सुचस्नायात् प्रतिस्रोतस्थितोद्विजः तडागादिषु तोयेषुप्रत्यर्कंस्नानमाचरेदितिनरसिंहपुराणात् स्रो-तसांसम्मुखोमज्जेद्यत्रापः प्रवहंतिवै । स्थावरेषु गृहेचैवसूर्य्यसम्मुखमाप्लवेदितियाज्ञ्यवल्क्य वचनाच्चा तएवप्रथममज्जनंसूर्य्याभिमुखमेवप्रवाहेपिकात्याय नानुरोधाधात् द्वितीयं तृतीयंतुप्रवाहाभिमुखमिति प्रत्युक्त सूर्य्याभिमुखोमज्जेदिति कात्यायनवचनंत-डागाद्यभिप्रायकमेकवाक्यतावलादिति सवस्त्रोहरह राप्लवेदितिसांख्यायनगृह्यात् गृहस्थस्यप्राप्तंस्नानं गंगायांतदलाभे पुण्योदकेतदलाभेपरोत्सृष्टेतदलाभे पुण्येनोद्धृतेनोदकेनविहितक्रियापितेनैवकायर्याशि-रःस्नातस्तुकुर्वीतदैवं पित्र्यमथापिवेतिमार्कण्डे-यपुराणात् । रुग्नश्चेदुष्णोदकेनापि एतदशक्तावशि रस्कंतदशक्तावप्यार्द्रेणवाससागात्रसंमार्जनंतदाह-जावालः । अशिरस्कंभवेत्स्नानंस्नानाशक्तौतुक-र्म्मिणां आर्द्रेणवाससावापिदेहिकंमार्जनंविदुः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रातः स्नानेनविशेषविहितेतरस्मिन्कर्म्मणिनाधिका
रः अतएव अस्नाताशीःपुमान्नाहो जप्याग्निहवना
दिषु । प्रातस्नानन्तदर्थन्तुनित्यस्नानं प्रकीर्त्तितम् ॥
जप्तुकामःपवित्राणिअर्चिष्यन्देवताः पितन् । स्नानं
समाचरेन्नित्यंक्रियांगंतत्प्रकीर्त्तितम् ॥ इतिषोढा
स्नानपरिसंख्यानेशंखेनैव । नित्यंनैमित्तिकंकाम्यंक्रि
यांगंमलकर्षणम् । क्रियास्नानंततःषष्ठ षोढास्नानंप्र
कीर्त्तितमितिप्रातःस्नानस्यनित्यत्वेनाहःकर्त्तव्यस्य
क्रियांगत्वेनद्वयोर्भेदउक्तोन्यथापरिसंख्यानभंगःस्या
दतएवाघारमाघारयतीतिवत्प्रातः स्नातःसहाम्बर
इत्यस्यापिस्नानान्तरवारकत्वेनैवसार्थकत्वम् । नत्वं
गतावोधकत्वेने तिपरेषाम्मतमपास्तम् ॥ यदातुसौत्रं
स्नानंतदातत्कल्पेनैवतर्प्पणमपिआरभ्याधीतत्वादेवं
पद्मपुराणीय कल्प्येपियदितुनरसिंहपुराणोक्तंस्नान-
विधीयतेतदावैधस्नानतयातस्यतर्प्पणांगकत्वेसि -
द्धेउभयोरप्यदृष्टजनकतयानारभ्याधीतविष्णुपुरा -
णीयतर्प्पणमेवांगतयान्वेतिस्वतन्त्रत्वात्नष्टाश्वदग्ध
न्यायात्तक्षसूत्राधिकरणविरोधाभावाच्चउद्धृतोदके
नस्नानेतुस्नानांगतर्प्पणस्योक्ताधिकरण विरोधेनकृ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

थातूष्णोदकेस्नानमित्यादिनास्नानस्यादृष्टजनकत्वे नांगापूर्व्वस्यकुत्रोपकारकत्वमतोऽलौकिकस्यलौकिकांगत्वाभावान्नांगांगिभावः॥ननुतत्स्नानस्याप्यलौकिकत्वमेवगेहेचेन्तदमन्त्रवदित्यादिनातस्यापिविधानादितिनवेदबोधितकर्त्तव्यताविशिष्टस्यैवालौकिकत्वस्य निर्वक्तव्यत्वादन्यथाप्रकृतेपितर्प्पणस्यांगतापत्तेः किन्नश्छिन्नमितिचेतृन्नथातूष्णोदकेस्नानमित्यस्यानुरोधेनोक्ताधिकरणविरोधापत्तेः ॥ हन्ततर्हिइतिकर्त्तव्यतान्वयोस्तुतदमन्त्रवदित्यादिना तत्रमन्त्रमात्रपर्य्युदासात् सरस्सुदेवखातेषुतीर्थेषुचनदीषुच। क्रियास्नानंसमुद्दिष्टमित्यादिविशेषवचनेननद्यादावेवतद्विधानादेवंचपञ्चयज्ञान्तर्गतंस्वतन्त्रतर्प्पणमेवविष्णुपुराणविधिनाकार्य्यम् तच्चस्नानन्न विष्णुवाप्यादौनवापतितादिकारितेनवानुत्सृष्टपरकारितेनवाशूद्रकारितेनवास्वकारितउत्सृष्टेऽनुत्सृष्टेवाकार्य्यमृदिवास्नानेतुस्नानसंन्ध्यातर्प्पणानीतिक्रमः कात्यायनसूत्रानुरोधातएवंप्रातरपि। यथाऽहनितथाप्रातरितिस्मरणात् कातीयकल्पेप्रयोगाविधेरहम्मात्रविषयतयाप्रातःस्नानेतर्प्पणानन्तरंसन्ध्यावन्दनमिति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भ्रान्ताः ॥ तन्नस्नानविधिरेषस्नानविधिरेषइतिद्वरा वृत्यामाध्याह्निकसकलस्नानेतिकर्त्तव्यतायाःप्रातःस्नानेप्यतिदेशात् अतएवयथाऽहनितथाप्रातर्नित्यंस्नायादनातुरइत्यपिसंगच्छतइतिसन्ध्यावन्दनाप्राप्तौ-सर्व्वत्रस्नानानुपदमेवतर्प्पण मुत्सर्गतोऽगांनांप्रधानदेशकालान्वयनियमादिति दिक् ॥ ० ॥

अथस्वखानितवाप्यादौस्वस्यापिस्नानाधिकारोस्तु तथाहितत्राप्रतिष्ठितेस्नानंप्रतिष्ठितेवानताव-दाद्यः यन्नसर्व्वार्थमुत्सृष्टं यच्चाभोज्यनिपानजम् ॥ तद्वर्ज्यंसलिलंतातसदैवपितृकर्म्मणि ॥ तथाअप्र-तिष्ठितपानीयेष्वपेयंसलिलम्भवेत् ॥ तथाअनुत्सृष्टन्तुमूत्रवदित्यादिनानावचनेनतस्याकर्म्मण्यत्वप्रतिपादनात् अतएवविष्णुवाप्यादौ परकारिताप्रतिष्ठितेचपरेषांस्नानमपास्तम् चौर्य्यापत्तेःनद्वीतीयःस्वत्वक्तेस्वोद्देश्यतायादेवताधिकरणविरोधेन निरस्तत्वात् नापिपुरुषान्तरवदौपादानिकंकर्तुरपिस्वत्वमस्तित्वतिस्वत्यक्तेस्वोपादानस्यक्वचिदप्यदर्शनात् ॥ ननुदेवताधिकरणेइन्द्रस्त्यागकर्त्तासएवोद्देश्यइतिसमान-प्रकारकत्वादस्तुविरोधःप्रकृतेचैकस्त्यागकर्तासर्वभूते

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भ्यउत्सृष्टं मयैतज्जलमूर्जितं। रमन्तुसर्वभूतानिस्नानपा
नावगाहनैरितिमन्वादिवचनवलात्सर्वभूतानामुद्देश्य
त्वेनसमानप्रकारकत्वाभावात् नविरोधइतिचेत्भ्रा-
न्तोऽसित्यागकर्तृत्वत्यागोद्देश्यतयोर्व्विरोधेनस्वसमा
नप्रकारकत्वस्याप्रयोजकत्वात् ॥ अन्यथाब्राह्मणोद्दे
शेनत्यक्तस्यहिरण्यादेःस्वयमप्युपादानप्रसंगःतस्मा-
त्तत्रागवाक्यंसर्व्वभूतपदंयजमानेतरसर्व्वभूतपरमिति॥
विष्णुःपरनिपानेषुनस्नानमाचरेदाचरेद्वापञ्चपिण्डा
नुद्धृत्यापदि ॥ याज्ञवल्क्यःपञ्चपिण्डाननुद्धृत्यनस्नाया
त्परवारिणि ॥ बौधायनःवहन्तीष्वनिरुद्धासुत्रयोव
र्णाद्विजातयः । प्रातरुत्थायकुर्व्वीरन्देवर्षिपितृतर्प्प
णम् । निरुद्धासुनकुर्व्वीरन्नंशभाक्तत्रसेतुकृत् ॥ त
स्मात्परकृतान्सेतून् कूपांश्चपरिवर्जयेत् ॥ उद्धृत्यवा
त्रीन्पिण्डान्कुर्य्यादापत्सुनोसदा । निरुद्धासुचत्री
न्पिण्डान्कूपात्तुत्रीन्घटान्सदा ॥ शंखः ॥ वापीकू
पतडागोदपानेषुसप्तपञ्चत्रीन् पिण्डानुद्धृत्यदेवतास्त
र्प्पयित्वा पितृपरस्तर्प्पयेत॥ पैठीनसिः ॥ अथस्नान
विधिः ॥ परकृतान्सेतून्कूपांश्चपरिवर्ज्जयेदंशभा
क्तत्रसेतुकृत्त्रीन्पिण्डानुद्धृत्यस्नायात् अत्रेदंरह-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्यम् ॥ प्रतिष्ठितेपरकृतेतडागेसम्प्रनिपानेपञ्चसेतु प्र
तिरुद्धे तु जलेत्रीन् पिण्डानुद्धृत्यकूपादम्बु घटत्रयमु
द्धृत्यस्नायात् । नचविष्णवादिवचनानामप्रति-
ष्ठितपरतैवमानत्ववचननिषेधवाधाक्षमत्वादिति । ए
षुतुतर्प्पणकरणेम्बुघटत्रयोद्धारोऽन्यत्रसप्तानांपिण्डा
नांपंचानांवोद्धारःपिण्डम् श्रीफलप्रमाणम् ॥ पि-
ण्डपदान्निरुपाधेस्तथैवावगमात् ॥ अत्रस्नानतर्प्प-
णयोः करणपक्षेउभयप्राप्तस्यापि पिण्डोद्धारस्य
स्नानात्प्राक्तंत्रेणैवानुष्टानमंगानांतन्त्रोपदेशात् प्र-
योगैक्यात् ॥ उपस्थानादिर्यस्तासांमन्त्रवान् की
र्त्तितोविधिः ॥ निवेदनान्तं तत्स्नानमित्याहुर्ब्रह्मवा
दिनः । इतियाज्ञवल्के ननिवेदनान्तस्यस्नानत्वाभि
धानात् एषुतुस्नानमकृत्वातर्प्पणपक्षेतर्प्पणाव्य-
वहितप्रागेवसकार्यइति । यत्रत्वंगतर्प्पणेनैवप्र-
संगात् स्वतन्त्रतर्प्पण सिद्धिस्तत्रनपृथक्पिण्डोद्धारः
कार्यइतिअंगतर्प्पणेतुन पृथक्पिण्डोद्धारोनवात-
र्प्पणानुष्ठानमनुपदेशादितितत्वम् ॥ सन्ध्याव-
न्दनेचादावघमर्षणसूक्तेनयदाचमनं तद्द्विरावर्त्तते
आचान्तः पुनराचमेद्कृतमित्यभिमान्त्रितमितिवचना

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त् अत्रचऋषिच्छन्दोविनियोगानां ज्ञानमपेक्षितम् ॥ तत्रनशब्दप्रयोगः कार्य्यो मानाभावादसंबंधव्यवायापत्तेश्चसन्ध्यावन्दनं वाजसनेयिनां स्थलएव उत्तीर्य्यवाससीपरिधायेति कात्यायनेनाभिधानात् ॥ स्थलाशुचित्वपक्षेजलेपिकार्य्यम् यत्राशुचिस्थलंवास्यादुदकेदेवताः पितॄन् । तर्प्पयेत्तु यथाकाममप्सुसर्वम्प्रतिष्ठितम् ॥ इत्यादिनातदुदोच्यस्यतर्प्पणस्यजलेविधानात् ॥

स्मृत्वोंकारन्तुगायत्रीन्निवध्नीयाच्छिखान्ततः । इतिव्यासेनविशिष्याभिधानात् ॥ सन्ध्यावन्दनसमादौबद्धापिशिखान्मोच्यवन्धनीयेतिभ्रमोहेयः । साधारणांगप्रधानदेशकालान्वयानियमात् । ननुतर्हिविशेषाभिधानमनर्थकंस्यात् । नसायद्यदितत्कालेमुक्ताशिखः स्यात्तदानेनबन्धनीयेतितदर्थत्वात् अन्यथातात्पर्य्यगौरवादिति ॥ प्रातःस्नानेतु साग्निनागायत्रीजपोभूयान्नकार्य्यो होमलोपप्रसंगात् । निरग्निनातुसकार्यः सहस्रं परमान्देवीमित्यादिस्मरणात् ॥ विभ्राडित्यनुवाक्परसंकल्पमण्डलब्राह्मणैस्तु चतुर्भिर्यदुपस्थानंतत्सायंसंध्यायाम् ॥ प्रातःसन्ध्यायान्तुना

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्त्येव मध्याह्नसंध्यायां काम्यम् मध्याह्नउदयेवापि विश्वाडादीच्छया जपेदिति वचनात् यद्यप्यध्यापनं ब्रह्मयज्ञस्तुतर्पणम् होमोदैवोवलिर्भौतोनृयज्ञोऽति-थिपूजनमिति कात्यायनेनाभिधानादध्यापनमेव-प्रतीयते तथाप्यहरहः स्वाध्यायमधीयीतेति ब्रह्मय-ज्ञोत्पत्तिश्रुतेः श्रुतिजप एव ब्रह्मयज्ञ इति ॥ मनुः नैत्तिकेनास्त्यनध्यायो ब्रह्मसत्रंहितत्स्मृतम् ॥ अत्र यद्यपि ब्रह्मयज्ञे नित्यत्वादेवानध्यायदोषो नास्ति तथाप्यनध्याये मनसा सकार्य्यः । मनसाधीयीतेत्या पस्तम्बसूत्रादिति ॥ अथ दर्भोच्चयः ॥ मरीचिः । मासेनभस्यमावास्या तस्यांदर्भोच्चयोमतः । अजा-तयामास्तेदर्भाविनियोज्याःपुनःपुनः ॥ नभसीति शुक्लादिक्रमेण । तेन श्रावणपूर्णिमानन्तराग्रिमा-मावास्यायां ये कुशा आहृतास्तेऽजातयामाः । नि-र्णयेतु भाद्रामावास्यापदं गौणचान्द्रेणेति सर्व्वं रमणी यं । अतएव मासे नभसीति वचनात् श्रावणामा-वास्याहृतान्दर्भानिति कृत्यप्रदीपे सिद्धवल्लिखित-मिति । अथ त्याज्यकुशाः ॥ पिण्डार्थंयेस्तृतादर्भा यैःकृतंपितृतर्पणं । सूत्रोच्छिष्टे धृतायेच तेषांत्यागो-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विधीयते । इति लघुहारीतवाक्ये पितृपदं शक्त्या-
जनकादिषट्पुरुषवाचकमेव न तुयावत्तर्पणीयपरं
प्रमीतमात्रपरं वा लक्षणापत्तेः । नच विनिगमना-
विरहात्तातमात्रपरतैवास्तु प्रकरणवलेनषट्पुरुषपर-
तायान्यायत्वात् । ननु परकीयगृहेयस्तुस्वान्पितॄं
स्तर्पयेज्जड इत्यत्राजहत्स्वार्थलक्षणया पितृपदस्य
प्रमीतमात्रपरत्वादत्रापि तथास्त्विति चेन्न दृष्टत्वं
हि न नियामकं किन्तु प्रतीतिरुपफलवलेन तत्पर-
त्वमनन्यलभ्यतयातुशक्तिरिति सुष्टूक्तम् षट्पुरुष-
तर्पणमोटकमपहायमात्रादितर्पणं मोटकान्तरेणका-
र्य्यमिति कात्यायनः । दर्भाः पवित्रमित्युक्तमतः स
न्ध्यादिकर्म्मसु । सव्यःसोपग्रहःकार्य्यो दक्षिणःसप
वित्रक इति अतोहेतोः सन्ध्यादिकर्म्मसु दर्भमात्रं
प्रशस्तमित्यर्थः । तत्रापिकेन क्रमेण धारणमि-
त्यत्रोपतिष्ठते सव्य इति सएव पवित्रं लक्षयति ॥
अनन्तर्गर्भिणंसाग्रं कौशंद्विदलमेवच । प्रादेशमात्रं
विज्ञेयं पवित्रंयत्रकुत्रचित् ॥ लघुहारीतः । जपेहो-
मेतथादानेस्वाध्यायेपितृतर्पणे । अशून्यन्तुकरंकुर्या
द्धिरण्यरजतैःकुशैरित्यत्रानयोः सामान्यविशेषभा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वेनान्वयइतिकेचित् । तन्नविशेषोक्तेः समुच्चयस्यै
व वाक्यार्थत्वात् । नच हारीतवाक्य एव सव्य इ-
त्यादेरन्वयः । कात्यायनवाक्य एवाकांक्षासत्वेना-
न्वयस्य जातत्वात् परत्रान्वयेगौरवाच्च अतएव स
र्वत्रदक्षिणहस्तानामिकायां कुशत्रयहिरण्यरजतानि
धारणीयानीति परमगुरवः ॥ पितुःसन्यासादिनापाति
त्येनवातर्पणानर्हत्वेजीवत्पितृकोपि पितामहादितस्त
र्पणंकुर्य्यात् । यदिस्याज्जीवत्पितृकएतान्दिव्यान्पितॄं
स्तथा । येभ्योवापिपितादद्यात्तेभ्योवापिचदापयेदिति
याज्ञवल्क्यवाक्येनस्फुटमेवतादृशपितृसत्वेपिपुत्रस्या
धिकारप्रतीतेः ॥ ब्राह्मणादिहतेताते पतितेसंगवर्ज्जि
ते ॥ व्युत्क्रमाच्चमृतेदेयंयेभ्य एवददात्यसौ इत्यनेन
कात्यायनेनापितस्यपितामहोपक्रमप्रतिपादनात पि
तुरसत्वेसुतरामिति ॥ त्रिदण्डपुत्रेणतु ब्रह्मीभूतस्य
पितुरपितर्पणादिकंकार्य्यमेवापवादकाभावात् । प्रे-
तक्रियायाःसाम्वत्सरिकैकोद्दिष्टस्यपरंनिरसनात् श्रा
द्धचिन्तामणिप्रभृतयोप्येवम् ॥ यद्यपिकात्यायनक-
ल्पे तत्तत्तर्पणेतत्तन्मन्त्रान्वयः श्रूयते तथापि कल्पा-
न्तरेणापि तर्पणे मन्त्रानियताएत्र । मन्त्रैस्तुदेयमुद

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कंपितृणांप्रीतिवर्द्धनैः ॥ उदीरतामङ्गिरसआयन्तूर्ज्जंमित्यपि पितृभ्यइति येचेहमधुवाता इतित्र्यचम् ॥ आवाह्यपूर्ववन्मंत्रैरास्तीर्य्यचकुशानूशुचीन् । प्रागग्रेषुसुरान्सम्यगुदक्षिणाग्रेषुवै पितृन्तल्लिङ्गैस्तर्प्पयेन् मंत्रैः सर्वान्पितृगणांस्तथेति याज्ञवल्क्यवचनेन तर्पणमात्र एव मन्त्राणां करणत्वप्रतीतेः ॥ किञ्चविना दर्भैर्विनामंत्रैःपितृणांनोपतिष्ठत इत्यादिना शंखेना मंत्रकतर्पणेनिन्दाप्रतिपादनात् हन्तैवम् दर्व्वीहोमस्ययाकांक्षापरांगग्रहणंप्रति । आकांक्षेवकुलस्त्रीणां स्वांगएवनिमज्जतीतिश्रवणात् । परांगग्रहणेदर्व्वीहोमाधिकरणविरोध इतिचेत् । भ्रांतोसि लिखितवचनेन तिलानामप्यभावेनु सुवर्णरजतान्वितम् । तदभावे निषिञ्चेत्तु दर्भैर्मंत्रेण चाप्यथेत्याद्यनेकवचनेन तर्पणमात्र एव मंत्रागता प्रतीतेस्तस्मादत्रामत्सरेण भवितव्यमिति ॥ तर्पणेतुदेवानांवामान्वारब्धोदक्षिणकरः । अन्वारब्धेनसव्येनपाणिनादक्षिणेनतु । तृप्यतामितिसेक्तव्यम् नाम्नातुप्रणवादिनेति वचनात् ॥ पितृणामंजलित्रयम् त्रींस्त्रींजलांजलीन्ददद्यादुच्चैरुच्चतरन्नर इतिवचनात् । पात्रेण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तर्प्पणपक्षेपि नैतयोरपवादः किन्तु समुच्चयएवसौ वर्णेनराजतौदम्बरेण पात्रेणखड्गपात्रेण शंकुनावाप्युदकं पितृतीर्थंस्पृशन्ददद्यादितिशंखवचनेनांजलेरपेक्षणीयत्वात् । यत्तु सौवर्णनेत्यादिशंखवचनात् तथा रजते मनसायच्चसुवर्णेयच्चनिर्गतम् । तिलेषुचमुहूर्तेनताम्रे चाद्धमुहूर्त्ततः ॥ दर्भेसप्तमुहूर्त्तन्तुमन्त्रयुक्तन्तदक्षयमिति मरीचिवचनात् राजतैर्भाजनैरेषामपिरजतान्वितैः । वार्य्यपिश्रद्धयादत्तमक्षयायोपकल्प्यतेइति मनुवचनाच्च पितृतर्प्पणएवतत्पात्राणांकरणत्वन्नतु देवर्षितर्प्पणेप्यनभिधानादिति तदसत् ॥ देवर्षितर्प्पणेऽपिपात्राणां करणत्वमविरुद्धमनिषेधात एकत्रनिर्णीतेतिन्यायात् ॥ तथा शुचिवस्त्रधरःस्नातो देवर्षिपितृतर्प्पणम् तेषामेवहितीर्थेनकुर्व्वीतसुसमाहित इतिविष्णुपुराणवचनेन करस्याप्यपेक्षणीयत्वात् ननु गोदोहनाधिकरणाविरोधादस्तुविकल्प इतिचेत् वैषम्यात्तत्र हि प्रणयनस्य विधेयतया करणाकांक्षायांच मसान्वयेगोदोहनस्यनिराकांक्षतया विकल्पोऽत्रतुनोदकेषुनपात्रेषुनक्षव्योनैकपाणिनेत्यनेन तथातर्प्पणोद्धृतयंकुर्य्यादित्यने

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नसमुच्चयएवेतितत्वम् ॥ तर्प्पणन्तुपुरुषषट्कस्त्रीषट्कयोर्न्नित्यमिति सर्वत्रप्राप्तःस्नानादौतदेवांगतया कर्त्तव्यमिति ॥ अत्र एकैकमंजलिन्देवाद्वौद्वौतुसनकादयः । अर्हन्तिपितरस्त्रींस्त्रींस्त्रियश्चैकैकमंजलिम् । इति वचनात्ब्रह्मादीनामेकैकोऽजलिरिति यद्यपिदेवानामंजलिर्न्नास्ति । अन्वारब्धेनसव्यनेत्युक्तगोतमवचनात्तथापि देवतर्प्पणे वामान्वारब्धदक्षिणकर एवांजलिपदेनोक्त इतिद्रष्टव्यम् । उद्धृतोदकेनस्नानकरणपक्षेऽलौकिकस्य तर्प्पणस्यलौकिकस्नानांगकत्वस्य तक्षसूत्राधिकरणविरोधेन निरस्तत्वात् । तर्प्पणन्तुशुचिःकुर्य्यात् प्रत्यहंस्नातकोद्विजः देवेभ्यश्चऋषिभ्यश्चपितृभ्यश्चयथाक्रममिति वचनात् प्राप्तस्यतर्पणस्यस्वतंत्राहःकर्त्तव्यत्वेन तदानीमनुपस्थितेरुभयथाप्युदयात्प्राङ् नतर्प्पणानुष्ठानम् एवं नद्यादौ प्रातःस्नाने कृते उदयानन्तरमंगतर्प्पणेकृते उद्धृतोदकेनमध्यान्हस्नानकरणेस्वतंत्रतर्पणमावर्त्तत एवाहःकर्त्तव्यत्वेनप्रसङ्गाभावादितिशंखः । नोदकेषुनपात्रेषु नक्षुब्धोनैकपाणिना । नोपतिष्ठतितत्तोयंयन्नभूमौप्रदीयते । इति अत्रचभूमिपदंशु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ष्कपरंतेनदार्व्यादावपि तर्प्पणजलंप्रक्षेप्तव्यमितिभ्र
मोहेयः । लक्षणावीजस्यानुपपत्तेरभावादिति ॥ शं
खलिखितौस्रवन्तींवृथानातिक्रामेदनवसिव्य । अन
वसिव्यतर्प्पणमकृत्वा अतिक्रामेत् लंघयेत् वृथानि
ष्प्रयोजनम् ॥ देवाश्चपितरश्चैवकांक्षन्तिसरितंप्रति
अदत्ते तुनिराशास्तेप्रयान्तिचयथागतम् अत्राङ्गाधि
कारमुखेनप्रधानाधिकारोपिबोध्यते तथाचैकत्रदिने
कृतमध्याह्नस्नानस्यापिनानानदीलाभे नानास्नाने
स्नानाङ्गतर्प्पणेचाधिकार एव लिखितवचनात् नित्यं
नैमित्तिकंकाम्यंत्रिविधंस्नानमुच्यते । तर्प्पणन्तुभवेत्त
स्यअङ्गत्वेनप्रकीर्तितमितिवचनादङ्गत्वेपिसन्ध्याव-
न्दनव्यवधानेनाङ्गानुष्ठानं सूत्रकारवचनात् अतएव
यत्र सन्ध्यावन्दनाप्रसङ्गस्तत्राव्यवधानमेवापवाद-
काभावात्काम्यतर्प्पणन्तुसकृदेवतदावृत्तौ बीजाभा
वात् ननुनस्नानमाचरेद्भुक्त्वानातुरोनमहानिशि । न
वासोभिःसहाजस्रंनाविज्ञातेजलाशये इत्यादिनाऽन
वरतस्नाननिषेधान्नैवमितिचेन्न । मानवस्नाननिषे
धस्यश्रद्धाजाड्यादिप्रयुक्तानवरतस्नाननिषेधपरत्वा-
दन्यथागयादौ तत्तत्तीर्थेतत्तत्स्नानबाधापत्तिरितिदि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क् ॥ तर्प्पणवाक्येचास्मत्पदंदेयम् । नचसम्बन्धिश ब्दत्वादेवतल्लाभः सम्बन्धिपदानांसमभिव्याहृतवि- शिष्टस्वार्थबोधकत्वव्युत्पत्तेः प्रकृतेतर्प्पयितृबोधक- पदाभावात् । तर्प्पणवाक्यन्तु अद्यामुकगोत्रोऽस्म- त्पिताऽमुकशर्म्मातृप्यतामिदं तिलोदकं तस्मै स्वधा नमः इति कल्पतरुः सपदास्मत्पदेविहायैवमेवेतिर- त्नाकरः । कल्पतरुप्रयोगेसकारमात्रस्यत्यागइतिवर्द्ध मानाह्निकम् । एवमेवपरमगुरवोपि ॥ तर्प्पणन्तुवाज सनेयिनांस्थलस्थानांस्थलएव । उत्तीर्य्यवाससीपरि धायेत्यनन्तरं कात्यायनेनतत्कथनात् । स्थलाशौ- चादिपक्षेजलस्थैरपितत्कार्य्यम् । यदाहयोगीयाज्ञ- वल्क्यः ॥ यत्राशुचिस्थलंवास्यादुदकेदेवताःपितॄन् । तर्प्पयेत्तुयथाकाममप्सुसर्व्वंप्रतिष्ठितम् ॥ अत्रेदंर हस्यम् ॥ जलसन्ध्यावन्दनपक्षे उपस्थानपर्य्यन्ता- सन्ध्याजलेततस्तर्प्पणम् । तत उत्तीर्य्यशुष्कवास- सा आवाहनाङ्गन्याससहितगायत्रीजपो ब्रह्मयज्ञश्च- स्थानेकार्य्यः । यदार्द्रवासाःकुरुतेजपहोमतपांसिच । इत्यादिनाजले जपमात्रनिषेधात् ॥ कदाचिदपिनो विद्वान्गायत्रीमुदकेजपेत् । गायत्र्यग्निमुखीप्रोक्ता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्मादुत्थायतांजपेदितिगोभिलेन विशिष्यनिषेधा च्च तस्य च सामशाखास्थत्वेपिकात्यायनाप्रति षिद्धतयाग्निमुखत्वनिर्द्देशेन च वाजसनेयिकेपिजाग रूकत्वात् अत्रच कात्यायनोक्तक्रमभङ्गोपि गोभिल याज्ञवल्क्यैकवाक्यतानुरोधात् ॥ क्रमभङ्गभीताय्त्वा स्तु ॥ यदिस्यात्क्लिन्नवासावैगायत्रीमुदकेजपेत् । अ न्यथातुशुचौभूम्यांकुशोपरिसमाहितः । इतिपठित्वा जलसन्ध्यावन्दनपक्षे जल एवगायत्रीजपमाचर न्तीति ॥ कार्ष्णाजिनिः । नाभिमात्रेजलेस्थित्वाचिन्त येदूर्द्ध्वमानसः । आगच्छन्तुमेपितर इमंगृह्णन्त्वपों जलिम् ॥ तथा आपोदेवगणाःसर्व्वे आपःपितृगणा स्तथा । तस्माज्जलेजलंदेयं पितृभ्योदत्तमक्षयम् ॥ तथादेवतानांपितृणांचजलेदद्याज्जलांजलिम् ॥ य मः । भूमौयदापोदीयन्ते दाताचैवजलेस्थितः । वृथा तद्दीयतेतोयं नोपातिष्ठतिकस्यचित् ॥ याज्ञवल्क्यः । आवाह्यपूर्व्वंत्रन्मन्त्रैरास्तीर्यचकुशान्शुचीन् प्रागग्रे षुसुरान्सम्यक्दक्षिणाग्रेषुवैपितॄन् ॥ तल्लिङ्गैस्तर्प्पये न्मन्त्रैः सर्व्वान्पितृगणांस्तथा । तदेतेषांवचनानांब लेनजलस्थेन जल एव स्थलस्थेन स्थल एव तर्प्पणजलं

२०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रक्षेप्यम् । तत्रापिकुशेष्वेवलिखितवचनात् ॥ एव
ञ्च नाभिमात्रेजलेतिष्ठता तर्प्पणं कार्य्यमितिपर्य्यव
सिते जलेप्यासीनोदद्यादितिप्राचाम्मतमपास्तम्
वस्त्रनिष्पीड़नोदकदानन्तुजलतर्प्पणपक्षेऽपि शुष्क
वाससा भूमावेव कुशत्रयोपरिकार्य्यम् । असंस्कृत
प्रमीतानांभूमौ दद्याज्जलांजलिम् इति वचनात् ॥
जलमध्येतुयःकश्चिद्द्विजातिर्ज्ञानदुर्व्वलः । निपीडय
तियद्वस्त्रंस्नानंतस्यवृथाभवेत् इतिशातातपवचनाच्च
यज्जलेशुष्कवस्त्रेणस्थलेचैवार्द्रवाससा । सर्व्वन्तन्नि
ष्फलंप्रोक्तं वाहज्जानुचयत्कृतमितिवचनाच्च । असं
स्कृतप्रमीतोद्देश्यकत्वञ्च अन्नप्रकरवत्तस्याप्यपसव्ये
नपीडनमितिवचनात् अन्नप्रकरवदित्यभिधानादा
स्तृतकुशत्रयायांभूमौकार्य्यम् ॥ मोटकान्वयोप्यत्रान
पवादात् । नचान्नप्रकरवदित्यनेनैवतद्बाधः संकोचा
पत्तेरिति । तद्वासश्च्छालनंतद्दानादव्यवहितप्रागेवअ
पूर्व्वरूपोपकारजनकत्वे सत्यसाधारणत्वात् । नच
विशुद्धय इति वचनाद्विशेषणासिद्धिरितिवाच्यम् वि
शुद्धेरप्यदृष्टविशेषत्वादिति ॥ असंस्कृतप्रमीतानांतु
तर्प्पणजलं जलस्थेनापिकुशव्यतिरिक्तभूमावेव प्रक्षे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्यम् देवतानामृषीणाञ्जलेदद्याज्जलांजलिम् ॥ अ
संस्कृतप्रमीतानांस्थलेदद्याज्जलांजलिरिति कार्ष्णा
जिनिनाविशिष्यैवाभिधानात् ॥ षट्पुरुषतर्पणंस्व
धानम इतिवाक्यम् । यदिस्याज्जीवत्पितृक एतान्
दिव्यान्पितृंस्तथा । येभ्योवापिपितादद्यात्तेभ्योवा
पिचदापयेत् । एतांश्चवक्ष्यमाणांश्च प्रमीतपितृकोद्वि
जः । वसूनरुद्रांस्तथादित्यान्नमस्कारस्वधान्वितान् ।
एतेसर्व्वस्यपितर एषायत्ताश्चमानुषाः । आचार्य्यान्
स्वान्पितृंश्चैव पितृप्रभृतिनामतः । इतियाज्ञवल्क्यव
चनात् । नमस्कारस्वधान्वितानित्यादेर्व्वक्ष्यमाणानां
सर्व्वेषामन्वयोऽविशेषात् । तेनवस्वादीना-
मियस्वपित्रादीनामपिवक्ष्यमाणपदार्थानांस्वधानम
इत्येवत्यागवाक्यम् ॥ यत्तुनमस्कारस्वधान्वयो-
दिव्यपितृणामेव वक्ष्यमाणत्वादविशेषेपिदिव्यपितृ-
त्वान्नतुस्वपितृणामपिदिव्यत्वाभावेननमोयोगे हे-
त्वभावात् । वाक्यस्यचवस्वादन्वयेपिचरितार्थ
त्वादिति प्राहुः । तन्न वाचनिकेऽर्थे न्यायाननु-
रोधाद विरोधिश्रुतेः । मात्रादिषुसर्व्वेषु ... ाका-
रमात्रम् । मातापितृष्वसाचैव मातुलानीपितृष्व-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सा । दुहिताचैवस्वसाचैवशिष्यर्त्विग्ज्ञातिवान्धवाः । नामतस्तुस्वधाकारैस्तर्प्याःस्युरनुपूर्व्वशः इतिवचनात् ॥ योगियाज्ञवल्क्यः । आवाह्यपूर्व्ववन्मन्त्रैरास्तीर्य्यचकुशान्शुचीन् । तल्लिंगैस्तर्प्पयेन्मन्त्रैः सर्व्वान्पितृगणांस्तथा । पूर्व्ववदितियोगिसंहितायामेवश्राद्धप्रकरणेविहितैः तेनविश्वेदेवास्स आगत । विश्वेदेवाः शृणुतेममिति ऋग्भ्यान्देवानावाह्यतर्प्पयेत् । उशन्तस्त्वेति आयन्तुनइति ऋग्भ्यांपितृनावाह्य तल्लिंगैर्म्मन्त्रैस्तर्प्पयेदित्यर्थः ॥ ननुयोगशास्त्रञ्चयत्प्रोक्तमिति तेनैवसंहितान्तराभिधानात् ।तत्संहितायामेव प्राथम्यंव्यवसीयते तथाच तत्रैवोक्तम् तर्प्पणे श्राद्धावाहनमन्त्रस्य पूर्व्ववदित्यतिदेशोनयुक्तः नहिवक्ष्यमाणमतिदेष्टुंशक्यते किञ्च विश्वेदेवाइतिऋचेति उशन्तस्त्वेत्यनयावाह्येति श्राद्धे तेनैवोक्ते तथाच मन्त्रैरितिवहुवचनमनुपपन्नम् नचसम्भूयपठितानाञ्चतुर्णांवहुवचनोपपत्तिः तेनैवानयोर्ज्जपेविनियोगकथनात् किञ्चलिंगाद्यभावाद्ब्रह्मादिप्रकाशकत्वानुपपत्तिः तस्मादेवं योजना आवाह्यसुरांस्तर्प्पयेत् आवाह्यपितृंस्तर्प्प

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

येत् पूर्ववत्तद्देववत् तेनपितृतर्प्पणेऽपिप्रणवस्तूष्णीमितिप्राप्यते तत्रापिकस्यमन्त्रस्यकुत्रविनियोगइत्यपेक्षायां तल्लिङ्गैरिति तस्मादावाहनम् देवा आगच्छन्तु इत्यनेनैव प्रकाशकत्वात् पितृणान्तुकात्यायिनिकथितक्रमेणेति चेन्न :एतस्यमंत्रत्वाभावात् तस्मादुशन्तस्त्वेतिमन्त्रेणदेवावाहनम् आदेशबलात् । पित्राद्यावाहनेतुत्रयोमंत्राएव आयन्तुन इत्यस्यापिसमवेतार्थत्वात् । वस्तुतस्तु आस्तीर्य्यचकुशान् साग्रांस्तानावाहयस्वमंत्रतः । इतिब्रह्मपुराणवचनात् वहुवचनरहितात्प्रथमः पक्षोज्यायानिति ॥ अमंत्रकतर्प्पणेसमंत्रकेपि मातामहादितर्प्पणे प्रत्यंजलिस्तु न वाक्यम् सकृदेवाज्जलित्रयदानसिद्धेरावृत्तौवीजाभावात् । ननुद्वितीयतृतीयांजल्योर्भविष्यत्तयानेदमादिपदनिर्द्देशो नवास्वधाशब्देनत्यागस्तथाहिउद्धृतोदकांजल्यसिद्धेः अनुद्धृतोदकेचानुपात्ततयो पादानिकस्वत्वस्याप्यसिद्धेरितिचेत् मैवम् नहिद्रव्यवत्तयाधिकारः किन्तुद्रव्ययोग्यतयैवभविष्यन्तीनामपिसन्निधान्त्यागोऽतएवच पूरकपिण्डेषु वहूनांतिलतोयाञ्जलीनांसकृद्दयदा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नम् इदमस्तुबौद्धसन्निधिना मानसप्रत्यक्षीभावेना
प्युपपत्तेः व्यवहितस्यापिचफलस्यधात्वर्थंतावच्छे
दकत्वाभ्युपगमात् चान्द्रोऽप्येवमिति साम्प्रदायिकाः
तदेतदयुक्तम् क्रमिकयोरंजल्योर्युगपत्प्रत्यक्षाभा
वात् तत्रैवचेदमः प्रयोगात् पाणिद्वयस्थितजला
वयविद्वयस्यैकदा असम्भवात् अंजलेरलब्धात्मक
त्वेनानुशासनविरोधादंजली इतिचायुक्तम् किन्तु
लब्धात्मकं हिस्वन्त्यज्यते नत्वलब्धात्मकम् हन्त त
र्ह्यंजलित्रयदानवदधिवासनरात्रौहविस्त्यागवद
धिकारोऽस्त्वितिचेदस्यापि पक्षसमत्वादव्यवहित
स्यैवफलस्यधात्वर्थंतावच्छेदकत्वात् तस्मादुक्त
दोषैः संवलितत्यागासम्भवादेकदादश नत्यज्यन्ते
किन्तुक्रमेणत्यक्तादशभवन्तीति । एतत् सर्व्वमभि
संधायवर्द्धमानोपाध्यायाः प्रत्यंजलित्यागवाक्य
माहुरिति ॥ नमोवइत्युक्त्वामातामहाचार्य्यशिष्य
र्त्विगज्ञातिवान्धवा अतर्प्यंतादेहाद्रुधिरं पिबन्ति
इतरायिशेषश्चतत्तोपि मातामहानामेवमन्त्रान्वयोऽत्र
चनप्रतिपुरुषंमन्त्रावृत्तिर्वीजाभावात् इतिकेचित्तन्न
करणत्वभंगापत्तेरिति ॥ अथ देवपूजा ॥ सातुनि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्या कालिकापुराणे शिवंभास्करमग्निञ्च केशवं
कौशिकीमपि । मनसाऽनर्च्चयन्याति ब्रह्मलोकाद
धोगतिम् ॥ अत्रापिभिन्नक्रमः तेनपुष्पाद्यभावेम
नसाप्येतेपूज्याः ओषधीनामभावेतु भक्त्याभवति
पूजित इति स्मरणात् नतुमनसाप्यनादरोविधेय इत्य
र्थः॥ वरं प्राणपरित्यागः शिरसोवापिकर्त्तनम्। नत्व
संपूज्यभुंजीतकेशवंकौशिकींशिवं अपूज्यप्रथमंसूर्य्यं
मपरान्यः प्रपूजयेत्॥नतद्भूतकृतंकर्म्म संप्रयच्छन्तिदेव
ताः॥त्य।द्विवचनविरोधात् अतएवं प्रथमंसूर्य्यस्य
सर्व्वशेषेविष्णोःपूजनन्तस्यैव ब्राह्मणषुदेवत्वात् ॥ इष्ट
देवतापूजापिनित्यैव ततोगृहार्च्चनंकुर्य्यादभीष्टसुरपू
जनमितिविष्णुपुराणात्॥स्वर्गापवर्गसंसिद्धिर्दुर्गायागा
त्प्रजायतेतथा यस्तुपूजयतेनित्यं शिवंत्रिभुवनेश्वरम्।
सस्वर्गराज्यमोक्षाणां क्षिप्रं भवतिभाजनम् ॥ तस्मात्
सौम्यमनाभूत्वायावज्जीव प्रतिज्ञया।अर्च्चयेत्तु सदा
देवपिमहामुने । इतिवचनात् ॥ यच्चाग्न्यादिपूजा
याअकरणेनिन्दार्थवादः सतदिष्टदेवतात्वपक्षेनित्यत
यातदकरणेद्रष्टव्यः । नचाकरणेऽनिष्टश्रवणात्
करणे फलश्रवणाच्च नित्यकाम्यमिति जीविफलका

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मस्य नित्याधिकार इतिवाच्यम् नित्यकाम्यापूर्व्वं योर्द्वारफलयोरभिन्नेतंत्रासम्भवादावृत्तौचवाक्यभेदा पत्तेरिति प्राञ्चः । नित्यानामपिसफलत्वादपूर्व्वं स्याबाच्यत्वाच्च संवलिताधिकार एवपञ्चदेवतापू जन इति तत्वम् ॥ अत्रचशिवपूजा सर्वदादङ्मुखे न कार्य्या शंकराराधनं तद्वत् सदाकुर्य्यादुदङ्मुख- इतिवचनात् पूजान्तरन्तु प्रातः प्राङ्मुखेनरात्रौ चोदङ्मुखेन । पंचदेवतापूजायान्तु प्रथमोऽग्निः सूर्य्यपूजा तु नास्त्येवेतिवदन्ति॥ अत्रपूजायां स- र्व्ववर्णानामधिकारः ॥ आर्ज्जवं लोभशून्यत्वन्देव ब्राह्मणपूजनम् अनभ्यसूयाचतथाधर्म्मः सामान्य उच्यते इति विष्णुपुराणात् अत एव शूद्राणां भगव त्पूजनेशिवार्च्चने वा नाधिकार इति प्राच्यानांभ्र- मोहेयः किन्तु वर्णाश्रमाचारवतापुरुषेण परः पु- मान् विष्णुराराध्यतेपन्था नान्यस्तत्तोषकारण मितिवचनात्॥ शिवपूजने ब्राह्मणस्यस्वधर्म्मत्याग नोप्यधिकारः। शूद्रकर्म्मरतेनापिसपूज्यमानो द्विजन्म ना । हृष्यामितेन सुतरांपूज्यमानश्चसुन्दरीतिवच- नात् ॥ ब्राह्मणातिरिक्तस्य स्वधर्म्मत्यागिनोनाधि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कारः । स्वधर्म्मं यः परित्यज्य परधर्म्मरुचिर्भवेत् । तेनाहं पूज्यमानोऽपि गन्धर्वजि घ्रामिकौणपमितिश्रुतेरितिप्राहुः ॥ ० ॥ याचितं निष्फलं पुष्पं क्रयक्रीतञ्चनिष्फलमिति। अन्यारामभवानिपुष्पाणिनिष्फलानि पारक्यारामजातैस्तुकुसुमैरर्च्चयेत् सुरान् । तेनपापेन लिप्येहमिति निन्दाश्रुतेः ॥ नित्यपूजायांतु पुष्पस्यचौर्य्यमप्यदोषः । देवतार्थन्तुकुसुममस्तेयम्मनुरब्रवीदिति वचनात् ॥ ० ॥ तुलसीपत्रविल्वपत्रजलजानां पर्य्युषितत्वन्नास्तीति प्रवादः । सर्व्वंपर्य्युषितंत्याज्यंपत्रंपुष्पंफलञ्जलम् । अत्याज्यंजाह्नवीतोयं अत्याज्यन्तुलसीदलमिति सोटदेववाक्यंतुलसीप्राशस्तत्रे केचिन्मानमाहुः ॥ पर्य्युषितेष्वपिमालाकारगृहस्थितेषुनदोष इति शैवागमः ॥ स्नानं कृत्वा तुयेकेचित् पुष्पंचिन्वन्तिवैद्विजाः देवतास्तन्नगृह्णन्ति भस्मीभवति दारुवत्। इदन्त्वहः स्नानविषयम् प्रातः स्नानानन्तरं दक्षेणतदाहरणविधानात् तदपिसमानाधिकरणं तत्क्वाश्रुतेराग्नेयीन्यायाच्च अभिवाद्याभिवादनकालेऽभिवाद्याभिवादकान्यतरकरस्थंकुसुमन्दुष्टम् । अग्रभागत्यागात्प्रोक्षणाच्च तत्कर्म्मण्यंभ-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वतीति केचित्। देवोपरिधृतम्मस्तकोपरिच्धृतम् अन्तर्ज्जलक्षालितम् अधोवस्त्रधृतञ्च पुष्पम् हरिभक्तिसंज्ञकेग्रन्थे निषिद्धतयागणितमिति ॥ मुकुराणिकदम्बानिरात्रौ देयानिभानवे । दिवाशेषाणिपुष्पाणिदिवारात्रौचमल्लिका । दिवात्रोटितान्यपिरात्रौभानवेदेयानि नतुखण्डनीयानीत्यर्थः ॥ पूजाप्रकरणेस्नानविरोधात्॥कुब्जकन्तगरञ्चैवकर्णिकारः कुरुन्टकः । अत्रतगरः सूर्य्यपूजनेपिग्राह्यतगरः ॥ शिवेविवर्ज्जयेत् कुन्दमुन्मत्तञ्चहरेस्तथा । देवीनामर्कमन्दारौसूर्य्यस्य तगरन्तथेति शातातपीयोनिषेधोवनतगरीविषयः॥ तुल्यविषयौविधिनिषेधाविति केचित् तन्न विषयभेदसम्भवात्॥ दुर्गापूजनेतु। बकुलैश्चैवमन्दारैः कुन्दपुष्पैस्तिरीटकैरिति श्रुतेर्देवीनामर्कमन्दाराविति वचनेदेवीपदं दुर्गेतरदेवीपरम् सामान्यविशेषन्यायात् ॥ केतकीचातिमुक्तञ्चकुन्दो यूथीमदन्तिका । शिरीषसर्ज्जवन्धूककुसुमानिविवर्ज्जयेत् ॥ कुन्दन्तुवर्षव्यापिशिवपूजायां व्रतरूपायां माघमासेविहितम् । माघेतुकुन्दकुसुममिति स्मरणात् । अन्यथातुमाघेपिशिवेनिषिद्धमेवेति ॥ कन-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कानिकदम्बानिरात्रौदेयानिशम्भवे। देयानिखण्ड
नीयानीति सागरः तन्न पूजा प्रकरणेस्नानविरोधात्
किन्त्वरात्रावववचितस्य तदुत्तरमह्निविनियोगेपर्य्युषि-
ततयाबाधसापेक्षविध्यापत्तेः ॥ सुरभीणितथान्या-
निवर्ज्जयित्वातु केतकी मिति वामनपुराणात् केतकी
पत्र पुष्पञ्चभृगु राजस्य पत्रकम्। तुलसीकृष्णतुलसी
सदास्तुष्टिकरी हरेरिति श्रुतेः। केतकीपुष्पं विहितनि
षिद्धमिति केचित् निषेधोनरसिंहेतरविषयकः नरसिं
हपुराणीयत्वेन विधेर्न्नरसिंहविषयकत्वमिति च-
ण्डेश्वरः॥ पारिभद्रं पाटलाञ्चवकुलंगिरिशालिनी। तिल
कंजम्बुबनजंवीतकंतगरन्त्वपि एतानिहि प्रशस्तानि
कुसुमान्यच्युतार्च्चने ॥ गिरिशालिनीअपराजिता
जम्बूवनजं श्वेतजवाकुसुममिति॥ देवपूजाच दक्षि
णहस्तेनैवदक्षिणस्तत्रविज्ञेयः कर्म्मणांपारगः करः।
इतिपरिशिष्टवचनात् एवञ्चांजलिपूजनेयदिशिष्टा
चारोपि तथापिसनप्रमाणम्। तदभावेशिष्टाचार इ
ति श्रुतेः॥ यदपियौतत्पूजाकरौकरावितितदपियदि
समूलं तदापिपरिचर्य्यापरमेवेति॥ अथपंचमहायज्ञाः
तत्रवैश्वदेवहोमोदेवयज्ञः पितृवलिव्यतिरिक्तवलयो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूतयज्ञः स्वाध्यायो ब्रह्मयज्ञः कव्यवालादि तर्प्पणं पितृवलिर्न्नित्यश्राद्धञ्चपितृ यज्ञः मनुष्याणामन्न दानं मनुष्ययज्ञः । वैश्वदेववलिषु । विभक्तस्य जीवत्पितृकस्याप्यधिकारः। कव्यवालादितर्प्पणे त्वविभक्तजीवत्पितृकस्याप्यधिकारः एवं ब्राह्मणाय भिक्षादानेतुब्रह्मयज्ञे ब्राह्मणानामेवाधिकारः । नित्यश्राद्धे प्रमीतपितृकाणामविभक्तानाम्मध्येज्ये ष्ठस्यैवाधिकारः विभक्तानान्तु सर्व्वेषामितिवचनात् । देवभूतपितृब्रह्ममनुष्याणामिहक्रमात् । महासत्राणिजानीयात्तएवहिमहामखाइतिकर्म्मप्रदीपः ॥ तत्राद्योदेवयज्ञस्ततोभूतयज्ञस्ततः पितृयज्ञः श्राद्धरूपः ततो मनुष्ययज्ञइतिच्छन्दोगाह्निके ॥ याज्ञवल्क्यःदेवेभ्यश्चहुतादन्नाच्छेषाद्भूतवलिंहरेत् ॥ शातातपः । भूतयज्ञस्तथाश्राद्धं नित्यञ्चातिथिपूजनम् । क्रमेणानेनकर्त्तव्यमिति च्छन्दोगाह्निकेव्यक्तम् ॥ रात्रौतुपाकपक्षे नतदावैश्वदेववलिकर्म्मणी किन्तु तदन्नसंस्कारमेव दिवातनन्तुपञ्चयज्ञान्तर्गतं नित्यं तत्रफलश्रुतिस्तुतिः । यदाचनित्यश्राद्धकरणन्तदातत्प्रागेववैश्वदेववलिकर्म्मणीकर्त्तव्ये यदातुपार्व्वणमेकोद्दिष्टं वातदा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पार्व्वणानन्तरंवैश्वदेव बलिकर्म्मणी एकोद्दिष्टानन्तरन्तु वैश्वदेवबलिनित्यश्राद्धन्तदानीमिति विशेषः ॥ शूद्रेणापि सिद्धान्नैर्व्वैश्वदेवबलिकर्म्मणीकर्त्तव्ये । दानंदद्याच्चशूद्रोपिपाकयज्ञैर्य्यजेतचेतिविष्णुपुराणात् ॥ भार्य्यारतिःशुचिर्भृत्योभर्त्ता श्राद्धक्रियारतः । नमस्कारेणमन्त्रेणपञ्चयज्ञान्नहापयेदिति याज्ञवल्क्य वचनाच्च पञ्चयज्ञाधिकारस्य स्फुटमेवावगमात् । नचपक्कमुच्छिष्टमुच्यतइत्यादिविरोधोविशेषश्रुतेरत एवाचारविरोधोऽपिपरास्तोऽकिञ्चित्करत्वात् वैश्वदेवञ्चकुर्व्वीतस्वशाखाविहितञ्चयत् । संस्कृतान्नैर्हविष्यैश्चहविष्यव्यञ्जनान्वितैः । तैरेवान्नैर्व्वलिन्दद्याच्छेषमाप्लाव्यवारिणा, कृतापसव्यः स्वधयासर्व्वन्दक्षिणतोहरेदिति ॥ वैश्वदेवाधिकारिणातुसिद्धान्नं वैश्वदेवानन्तरपूजापक्षेदेयम् नतुप्रागपि पाकादग्रमुद्धृत्येतिवाक्येन पाकाग्रस्यैव वैश्वदेवहोमेविनियोगविधानात् । श्राद्धादौचागत्याशेषान्नेनापिवैश्वदेव होम इति ॥ नित्यश्राद्धं कृत्वानित्यदेव पूजादि न कार्य्यम् । श्राद्धान्तानिकर्म्माणीतिपल्लवः ॥ साम्प्रदायिकास्तु नित्य एव क्रमश्रुतेः काम्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्तुकार्य्यमेवेति । अतएव नित्यश्राद्धानन्तरमपिनि-र्व्विचिकित्सशिष्टानां पुष्करिण्युत्सर्गइति ॥ पञ्च यज्ञानामशक्तौस्नात्वातर्प्पणं ब्रह्मयज्ञमात्र मपि-कार्य्यम् । नित्यंस्वाध्यायःपितृभ्यश्चोदकदानं य थोत्साहमन्यादिति गौतमवचनात् ॥ मनुरपियदेवत र्प्पयेदद्भिः पितॄन्स्नात्वाद्विजोत्तमः । तेनैवसर्व्वमाप्नो ति पितृयज्ञक्रियाफलमिति दिशाञ्चेतिश्रवणाद्दि ग्भ्योनमइत्येवबलिचतुष्टयमितिवासुदेवः तन्न अमु ष्मैनमइतिवदस्यसंग्राहकत्वात् चकारस्य तेभ्य प्राच्यै दिशेस्वाहेतिश्रुत्यातेनैवरूपेण देवतात्वनिर्णयादतए वप्राच्यैनमइतिपरास्तंअपाच्यैनम इति मुख्यंअवाच्यै नमइतिकेचित्मध्येब्रह्मणेऽन्तरिक्षायसूर्य्यायचेतिबलित्र यंप्राक्संस्थमेवयथाक्रममितिश्रुतेः। ततएषामुत्तरतो विश्वेभ्योदेवेभ्योविश्वेभ्योभूतेभ्यइतिबलिद्वयंप्राक्सं स्थमेव। ततोऽनयोरुत्तरतःप्राक्संस्थमेव उषसेभूतानां पतयइतिबलिद्वयमिति॥एषामुत्तरत उषसेभूतानाम्प तयइति श्रु तेरितिकर्कः । यद्युत्तर चतुष्कस्य ब्रह्मा दित्रिकोत्तरत्वंविवक्ष्येत तदासूर्य्यायेत्यनन्तरमेवो त्तरतइति विदधीत नतु भूतेभ्य इत्यनन्तरमतोवि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्यौयद्ब्रह्माद्यु त्तरत्वंद्वयोरत्तश्चुत्तरत्वञ्चशेषयोस्ते षामि तिचादौब्रह्मादिपरंततस्तयोरिति परिणतं सद्विश्वदे वादिद्वयपरं अन्यथाऽनन्वयादिति ॥ ननु ब्रह्मणेचा न्तरिक्षायसूर्य्यायचयथाक्रमम् । विश्वेभ्यश्चैवदेवे भ्योविश्वभूतेभ्यएव च । उषसेभूतपतयेदद्याच्चोत्तर तस्ततइति श्रु तेश्चतुर्णामविशेषेणब्रह्मादिवलित्रिको त्तरत्वमितिव्याख्यानेनाप्युतरत्वोक्षतेरनासत्तेश्चाप्रती कार्यत्वादितिकर्काशयः श्रीदत्ताह्निकेतु चतुष्टय मुत्तरोत्तरंविभक्तिविपरिणामापेक्षयाव्यवहितान्वयस्यै वलाघवेनाश्रयणादेवञ्च ब्रह्मादित्रिकोत्तरं प्राक् संस्थमेववलित्रयदानं सर्व्वथैवचिन्त्यमिति ॥ भारते घासमुष्टिं परगवेसान्नन्दद्यात्तुयःसदा । अकृत्वा- स्वयमाहारंस्वर्गलोकं सगच्छति । सौरभेय्यः सर्व्व- हिताःपवित्राःपुण्यराशयः परिगृह्णन्तुमेग्रासंगावस्त्रै लोक्यमातरः ॥ दद्यादनेनमन्त्रेणगवांग्रासंसदेव- हीतिश्रवणात्तुसंवलिताधिकार इतिवहवः । तन्न अकरणेनिष्टाश्रुतेः द्वितीयेतुमंत्रविधिरेवायमूनतु कालविधिरपिवाक्यभेदापत्तेः मूलान्तरकल्पना- पत्तेःविधेयगौरवापत्तेश्च । तस्मात्सदेत्यनुवाद-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति ॥ ० भक्ष्या अपिमत्स्याः स्मार्द्धशेषाः सन्तएव खाद्यास्तथाहि । मनुः । पाठीमरोहिताबाद्यौप्रयु स्तौहव्यकव्ययोः । राजीवाःसिंहतुण्डाश्चसशल्काश्चै वसर्व्वशः ॥ तथा । मधुपर्क्केचसोमेचपितृदैवतकर्म्म णि । अत्रैवपशवोहिंस्यानान्यत्रेत्यब्रवीन्मनुः ॥ तथा । यावन्तिपशुलोमानितावत्कृत्वेहमारणम् । वृथापशुघ्नः प्राप्नोतिप्रेत्यजन्मनिजन्मनि ॥ अत्रच निषेधविध्योः श्रवणाद्विकल्प एव तत्रापिव्यवस्थित इति द्रष्टव्यम् ॥ यस्तुखादतिमांसानिब्राह्मणोवेदवित्तथा । सपच्यते निरालम्बेनरकेतेनकर्म्मणेति श्रुतेर्ब्राह्मणस्य मांसभक्षणनिषेधेसिद्धे नाद्यादविधिनामांसंविधिज्ञोनापदिद्विजः । इत्यादिवचनाद्द्विजपुरस्कारेणापि यत्सविधिमांसभक्षणंतदपिक्षत्रियादिपरमेवसामान्यविशेष न्यायादितिकेचित् । तन्न असंस्कृतान् पशून्मंत्रैर्नाद्याद्विप्रः कथञ्चन । मंत्रैस्तुसंस्कृतानद्याच्छाश्वतंविधिमास्थितः इत्यादिमनुवचनेन ब्राह्मणस्य सविधिमांसभक्षणविधानात् तस्मात् प्रतिषेधवचनान्यभक्षणपराणीति । तथाचचातुर्वर्ण्यस्यैवभक्षणे प्रवृत्तेर्निषे-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ध्येपि चतुर्णामधिकारः । प्रवृत्तिमतोनिवृत्तिनियो
गाधिकारादिति॥ ० ॥ संविभागन्ततः कृत्वागृहस्थः
शेषभुग्भवेदित्यादिना दक्षेण पञ्चमकालेभोजनमुक्त-
न्तथापितददृष्टार्थं तेनानिषिद्धकालेवैधंकर्म्मकृत्वा-
प्रातरपिभोक्तव्यमेव । अतएवसायं प्रातर्म्मनुष्या-
णामशनं देवनिर्म्मितमित्यपि घटतइति ॥ ० ॥
अंगुल्यादन्तकाष्ठंचप्रत्यक्षलवणंन्तथा । मृत्तिकाभ
क्षणंचैव तुल्यंगोमांसभक्षणात् अत्रावतारणानन्तरंप्र
क्षिप्तं यत्तत्प्रत्यक्षलवणम् केचित्तुदत्तंसद्यद्दृश्यतेतत्प्र
त्यक्षलवणम् एतादृशमपिसैन्धवंसामुद्रकंचानिषिद्धमेव
सैन्धवँल्लवणंतद्वत्तथासागरसंभवम् । पवित्रेपरमेह्ये
ते प्रत्यक्षे अपिनित्यसः इति वचनादित्याहुः ॥
शूद्रेण कापिलंपयः सर्वथानपेयम् कापिलंयःपिवे-
च्छूद्रोनरकेसविपच्यते । इतिभविष्यात् ॥ पृष्ठमांसं
गर्भशय्यांशुष्कमांसमथापिवा इतिवचनात् क-
स्तूर्य्यपिनभक्ष्येतिद्रष्टव्यंतांवूलोपकरणत्वेनतुकस्तू-
र्य्यपिदेयेतिपल्लवलिखनंतुचिंत्यमिति ॥ शातात-
पः । ऋतौतुगर्भशंकित्वात् स्नानंमैथुनिनः स्मृत-
म् ॥ अन्यदातुसदाकार्य्यंशौचंमूत्रपुरीषवत् ॥ द्वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वेतावशुचीस्यातां दंपतीशयनंगतौ ॥ शयनादुत्थितानारीशुचिः स्यादशुचिः पुमान् ॥ अत्यन्तलेपेपुरीषवत् अल्पलेपेमूत्रवदिति व्यवस्थितोविकल्पः ॥ शुचिरितिस्नानंविनैव नतुमृज्जलक्षालनाचमनाभावे तस्यमलसंवन्धोपाधिप्रयुक्तस्यन्यायप्राप्तत्वेन मैथुनानन्तरमनिवार्य्यत्वात् ॥ गौतमः । नमिथुनीभूयशौचंप्रतिलम्वेत तथाचमैथुनानन्तरमेवयथोक्तजलक्षालनानन्तरमृतौपुंसोरजन्यामेवनैमित्तिकंस्नानमपि। नैमित्तिकानीत्यादिदक्षवचनात् वृद्धास्तु गौतमवचनेन शौचाचमनक्षालनमात्रम्॥ ऋतुगमने स्नानन्तुकर्म्माधिकारापादकं नतुचांडालादिस्पर्शवहतुगमनादप्रायत्यंभवतितत्स्नानंनतुरात्रौ किन्तुप्रातरेवेत्याहुः श्रुतवाक्यभंगापत्तेरिति॥ ० ॥ मात्स्ये मांसानिनभक्षयेयुराप्रदानादितिगोतमः अस्यार्थः ॥ प्रदानपर्य्यन्तंपुत्रैःसपिण्डैर्वामत्स्यादिभक्षणं नकार्य्यम् अत्रचप्रदानेनप्रदानसमयोलक्ष्यते । अन्यथाऽलाभादिनातददानेभक्षणानापत्तिरत एवसद्यःशौचेप्यशौचान्तद्वितीयाह एव तद्भक्षणमितिकेचित् तन्न अशौचव्यपगम इतिविष्णुवचनेन सद्यःशौ-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चेपितदहरेवाद्यश्राद्धे मांसादिभक्षणन्तद्दिनेपिनि
ष्प्रत्यूहमिति ॥ ० ॥ शरदि शुक्लपक्षे षष्टिकाभिः पार्व्व
णम् निरग्नीनामपिनित्यम्। व्रीहियवपाकौचेत्यन्तम
भिधाय एतांस्तुश्राद्धकालान् वैनित्यानाहप्रजापति
रित्यनेनविष्णुनातन्नित्यत्वाभिधानात् इदंचव्रीहिभि
र्गृहमेधी शरद्वसन्तयोर्व्रीहियवाभ्यांयजेतेतिवचना-
त् ॥ शुक्लपक्षेनवंधान्यं पक्वं ज्ञात्वासुशोभनं । गच्छे
त् क्षेत्रेविधानेनगीतवाद्यपुरःसरःतेनदेवान् पि-
तॄंश्चैवतर्प्पयेदर्च्चयेत्तथा ॥ प्राश्नीयाद्दधिसंयुक्तं
नवांविप्रानुमोदितमित्यादिना शरच्छुक्लपक्षमुपक्र-
म्य ब्रह्मपुराणकथनात् इदंचनवव्रीहीणामभावेपु-
राणैरपि तदभावे प्रतिनिधिनाशाल्यादिनापिकार्य्य-
मितिकेचित् तदुभयमपिमन्दम् एवं धान्यमित्युप-
क्रम्यतेनेत्युपसंहारात् ॥ यवपाकेश्राद्धं चवसन्ते त-
दपिनित्यम् व्रीहियवपाकौचेत्युपक्रम्य विष्णुना
तन्नित्यत्वाभिधानात् इदंचवसन्तेपि नचैत्रेनवाकृ
ष्णपक्षे कार्य्यम् पौषेचैत्रेकृष्णपक्षेनवान्नन्नाचरेद्बु-
धः भवेज्जन्मान्तरेरोगी पितृणान्नोपतिष्ठतइति भो
जराजलिखितवचनात् एतच्चवैशाखशुक्लपक्षएव-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कार्य्यम् शरदिवसन्तेचेतिवसन्तनियमात् । वसन्तव्यतिरिक्तेप्रापकाभावात् इदञ्चवैशाखशुक्लपक्षेमलमासेऽपिकार्य्यं नित्यनैमित्तिकेकुर्य्यात्प्रयतस्सन्मलिम्लुचेतीर्थस्नानंगजच्छायां प्रेतश्राद्धन्तथैवचेतिप्रतिप्रसवात् गृहमेधीशरद्वसन्तयोर्व्रीहियवाग्रयां यजेतेति विष्णुसूत्रात् ऋतुनियमेश्रीपतिरत्नमालायाम् मृगादिराशिद्वयभानुभोगात्षडर्त्तवस्स्युःशिशिरोवसन्तः । ग्रीष्मोऽथवर्षाश्चततःशरद्वैहेमन्तनामाकथितश्चषष्ठः इतिशिष्टाचाराच्चेतिसंप्रदायः ॥ नव्यास्तु प्रेतश्राद्धन्तथैवचेति पृथगुपादानबलान्नित्यनैमित्तिकयोरपि तद्दिनकर्त्तव्यताकयोरेव प्रतिप्रसवो नतुसावकाशयोरपीति ॥ अतएव नेहेतात्रविशेषेज्या अन्यत्रावश्यकाद्विधेरित्यार्षसंक्षेपेयस्यैव तदानीमननुष्ठानेपातन्तदेवावश्यकमिति तद्विवरणमपिसंगच्छतेतथाचयवपाकश्राद्धं द्वितीयवैशाखशुक्लपक्षएवकाकार्य्यम् । तस्मिंस्तु प्रकृते मासिकुर्य्यात् श्राद्धं यथाविधीतिश्रुतेः ॥ नचवसन्तबाधापत्तिः । पक्षौपूर्व्वापरौशुक्लकृष्णौमासस्तुतावुभौ । द्वौद्वौमाघादिमासौस्याहतुस्तैरयनान्त्रिभिरितिशक्तिग्राहकाच्चा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्द्रमासस्यैवतत्रप्रयोजकत्वात्॥ षष्ट्यातुदिवसैर्म्मासः कथितोवादरायणैरित्यनेन तस्यषष्टिदिवसात्मकस्य सत्वादित्याहुः ॥ एवंहैमन्तिकसंस्कारमपिपार्व्वण-मावश्यकम्, अकृताग्रयणंनैवधान्यजातंद्विजोत्तम राजमाषानणूँश्चैवमसूरांश्चविवर्जयेदितिवराहपुरा-णवचनेनाकृतनवान्नश्राद्धानांसस्यानामकर्म्मण्यत्व प्रतिपादनात् ॥ आग्रयणमिहनवेनशाल्यादिना प्रथमागमननिमित्तकं श्राद्धं विवक्षित न्नत्वाग्रयणे-ष्टिः पारिजातादिव्याख्यानसंवादात् श्यामाकैरि-क्षुभिश्चैवपितॄणां सार्वकालिकम् कुर्य्यादाग्रयणं यस्तुसशीघ्रं फलमाप्नुयात् इत्यादिवचनाच्च किंचा ग्रयणेष्टिपरत्वेराजमाषानणूनित्यत्रोत्तरार्द्धे वाक्यभे-दापत्तेरिति ॥ इदञ्चश्राद्धन्ननन्दायांनहरिशयने-नधनुस्थेरवौ नापितुलस्थे नचकृष्णपक्षे नवान्नन्नै-वनन्दायांनापिसुप्तेजनार्द्दने । नकृष्णपक्षेधनुषि-तुलायान्नैवकारयेदितिज्यौतिषवचनात् इदंचवृश्चि-कत्रयोदशांशमध्येकार्य्यम् ॥ वृश्चिकेपूर्वभागेतु न-वान्नं शस्यतेबुधैः । उत्तरेक्रियमाणन्तु धनुष्येवकृतं भवेत् । धनुषियत् क्रियतेश्राद्धं मृगनेत्रासुरात्रि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षु ॥ पितरस्तन्नगृह्णन्तिनवान्नामिषगर्द्धिनइतिवच-
नात् ॥ अत्रवृश्चिकेशुक्लपक्षेत्त्विलिपिप्रमादः ॥
यद्यप्यपरभागेकृतम् श्राद्धं फलतोधनुषिकृतत्वान्नि
रर्थकमतः पंचदशदिनानन्तरं धनुरतिदेशइत्यापा-
ततः प्रतीयते तथापिपूर्वभागपदस्यसायनवृश्चिक-
रविस्थदिनतयावृश्चिकत्रयोदशांशपरतैव त्रयोदशां
शानन्तरमेवसायनधनुस्थरविसंबन्धात् साम्प्रतंरवेर
यनांशक्रमेणाग्रिममेषादिद्वादशराशौ फलदातृत्वात्
अतएवज्योतिस्सारसमुच्चये वृश्चिकस्थेरवौत्यक्त्वावा
सराणित्रयोदश । नवान्नैर्विहितं श्राद्धं धनुष्येवकृ
तंभवेदितिकण्ठतोऽप्युक्तम् ॥ नचैतानि कृष्णपक्ष-
निषेधवचनानि शारदनवान्नपराण्येवस्युरेकवाक्य-
तानुरोधात् चैत्रेपौषे इत्यादिप्रत्येक निषेधादिति-
चेदुच्यते अनयोर्वैषम्ये मूलयोरपि वैषम्यस्य व-
ज्रलेपायितत्वात् मूलमूलिनोरेकवाक्यतानियमात्
अतएवनजीर्णमलवद्वासाः स्नातकःस्याद्द्विजोत्तम इ-
त्यत्रसुवाससाभवितव्यमिति श्रुतिर्न्न मूलमितिसक
लतन्त्रसिद्धान्तः । तस्मात् ब्रह्मपुराणवचनं शुक्लप-
क्ष विधायकमेव ज्यौतिषवचनानि तु सामान्यतः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृष्णापक्षनिषेधकान्येवेतितत्वम् ॥ यद्यपिपरमगुरु चरणैस्तत्वालोकेलाघवात् पर्य्युदासलक्षणया द्वयो रेकवाक्यतापि स्वीकृता तथापि प्रकृतेकृष्णापक्षेननवा न्नंकुर्वीतेतिलाघवात् पर्युदासेसिद्धं नःसमीहितमिति प्रत्येकनिषेधे वाक्यभेदापत्तिः ननन्दायामिति सा- मान्यनिषेधाच्च ननुकथन्तर्हिं नप्रसुप्तेजनार्द्दन इति विशेषनिषेधः अन्यथानुपपत्तेरितिगृहाण अतएव कामधेनुकृता कृष्णापक्षेनवान्नन्तुनकुर्य्यान्मानवोय तः पितरस्तन्नगृह्णन्ति दाताचनरकं व्रजेदितिवचना त् सामान्यनिषेधोयमिति कण्ठरवेणोक्तम् वृश्चि- कशुक्लपक्षेतदकरणेमाघेपिकार्य्यमावश्यकत्वात् अ निषेधाच्च शस्यत इत्यभिधानाच्च ॥ यत्तुप्रकृतव- चनं व्रीहिपाकश्राद्धएव गौणकालविधायकं लाघ- वादितितन्न अस्यगौणकालविधायकत्वेशस्यत इ- त्यस्यवैयर्थ्यापत्तेः । सर्वाणिचसावकाशश्राद्धानि नन्दादौनकर्य्याणि नन्दायांभार्गवदिनइत्यादिवच- नात् ॥ विवाहादौचप्रधानाधिकारिण एवांगाधिका- रान्नानुपपत्तिः । नचइज्यावत् श्राद्धबाधएवास्तुनि षेधसंकोचस्यावश्यकत्वादिति एवंपित्राग्रयणेह्यकृ-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तेतदेकपाकेनवसतांपुत्राणामपिहैमन्तिकशस्यमकर्म्म ण्यमेवासंस्कृतत्वात् इति॥०॥सर्वत्रश्राद्धे दक्षिणामुखे नपादप्रक्षालनंकार्य्यमाचमनन्तु प्रकृतक्रमेणैवप्रथमं- प्राङ्मुखः स्थित्वापादौप्रक्षालयेत् शनै रुदङ्मुखो- वादैवत्येपैतृकेदक्षिणामुखः । इतिदेवलेनाचमनंव- दताविशिष्याभिधानात् एतत्सर्वमभिसन्धायतरंगि ण्यांदक्षिणामुखः पादौप्रक्षाल्यप्राङ् मुखउदङ् मु- खोवाऐशान्याभिमुखोवाचमेत् । इति सिद्धवल्लि- खितम् ॥ भूगतवामजानुनापित्र्यंकर्म्मकार्य्यम् ॥ भूमौकृत्वातथाजानुंसव्यंपितृपरायणः ॥ इति श्राद्ध पारिजातलिखितवचनात् प्रोक्षणमभिधाय एतदन- न्तरन्तु काम्येकाम्याभिलापपूर्वकः संकल्पोनित्येतु- शिष्टाचारपरिप्राप्तः संकल्पएवनिर्णयकृतालिखितः तत्रक्रमोप्यभिमत एव अत एवआचारोप्येवमेवे- ति ॥॥ सेकसंकल्पयोर्य्याहॅच्छिकः क्रमइति प्रां- चः कामधेनुकृतातुगायत्रीजपानन्तरमासादनात् प्राक्प्रोक्षणंलिखितम् तत्रचतस्यायमाशयः । नाप्रो क्षितं द द्यादितिश्रुतेर्द्दानात्प्रागेवप्रोक्षणमायाती- ति ॥ वायुपुराणे उपविश्यजपेद्धीमान् गायत्रीन्त-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दनुज्ञयेति अत्र यद्यपिसंख्यानियमोनश्रूयते । तथापिभोजनस्थलेत्रिःसकृद्वेतिकात्यायनसूत्रादेकत्रानिर्णीत इतिन्यायात् शिष्टाचाराच्च त्रिर्जपोऽविरुद्धएव ॥ येतुप्रणवव्याहृतिरहितांगायत्रीं वायुपुराणानुरोधादिहजपन्तितेभ्रान्ताः ॥ तथाहि प्रणवंपूर्वमुच्चार्य्यभूर्भुवःस्वस्ततःपरम् ॥ गायत्रीप्रणवश्चान्तेजप्येह्येषविधिस्मृतः ॥ इतिपरिभाषारूपयाज्ञवल्क्यवाक्येन गायत्रीजपेसर्वत्रप्रणवव्याहृतिपूर्वकतायावज्रलेपायितत्वात् इति नचास्नात्सुजपेत् व्याहृतिपूर्वां गायत्रीमिति कात्यायनसूत्रे विशेषोपदेशादन्यत्र तयोरसाहित्यमिति वाच्यम् ॥ वाक्ययोर्भिन्नकर्त्तृकत्वात् ॥ एकवक्तृकेविशेषोपदेशानर्थक्ये तथाकल्प्यते ॥ ननु परिभाषाप्राप्ते कथमुपदेशः प्रतिपत्तिलाघवस्यकृतोपदेशस्य पर्य्यनुयोगानर्हत्वादिति ॥ ब्रह्मपुराणे परकीयगृहेयस्तु स्वान् पितॄंस्तर्पयेज्जडः ॥ तद्भूमिस्वामिनस्तस्य हरन्तिपितरोवलात् ॥ अग्रभागन्ततस्तेभ्यो दद्यान्मूलंचजीवतामिति अत्र पितृपदमजहत्स्वार्थलक्षणया प्रमीतमात्रपरम् तेनमातृभ्रात्राद्यादि संग्रहः ॥ नच निर्बीजलक्षणापत्ति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

राकाङ्क्षायाः सर्वत्रतुल्यत्वान्निर्विचिकित्ससकलशिष्टाचाराच्चेति न किञ्चिदेतत् ॥ तेभ्यः ॥ तत्स्वामिपितृभ्यः ॥ तेन परस्वत्वास्पदेस्थाने सङ्कल्पादनुपदमेव जीवते तत्स्वामिने किञ्चित्तांबूलादिकं तत्पितृभ्यस्तु श्राद्धीय द्रव्याग्रभागन्दद्यादिदंनैमित्तिकं पितृरीत्या पित्र्यत्वादतएव सव्येनैवेत्तद्दानमिति प्रदीपोक्तमपास्तम् अतएव नैमित्तिकत्वेन वृद्धिश्राद्धेप्यपसव्येनैवतद्दानम् ॥ नच नात्रापसव्यकरणं न पित्र्यन्तीर्थमिष्यते ॥ पात्राणांपूरणादीनिदैवेनैवहि कारयेदिति कात्यायनविरोधान्नैवमिति वाच्यम् ॥ अनेनापिहिवृद्धिश्राद्ध एव तन्निषेधोनतुनैमित्तिके कर्मण्यपीति ॥ अस्तुतर्हिहविस्त्यागस्य श्राद्धत्वेन परिवेषणात्प्रागेवतद्दानमुचितमितिचेद्भ्रान्तोसि अनङ्गव्यवायापत्तेः ॥ प्रधानाधिकारात् गायत्रीजपादावपि श्राद्धांगेअनधिकरापत्तेः । प्रधानाधिकारिण एवाधिकारात् नच तदानीन्दानेप्यनंगव्यवायः संकल्पस्यांगत्वाभावात् उपविश्यजपेद्धीमान् गायत्रीन्तदनुज्ञयेतिवचनात् ॥ गायत्रीजपस्यैव श्राद्धप्रथमकर्म्मत्वात् ॥ सेकस्यश्राद्धपूर्वसमयकर्त्त-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्यत्वात् ॥ एतच्च भूस्वाम्यन्नदानं नित्यश्राद्धोपिका-र्य्यम् अहन्यहनि यत् श्राद्धन्तन्नित्यमितिकीर्त्तितम्॥ विश्वेदेवविहीनन्तदशक्तावुदकेनत्वित्यादिभविष्य-पुराणेन तस्यापिश्राद्धत्वसिद्धेरिति केचित् ॥ तदस-त् ॥ इदंहिनश्राद्धत्वेनविहितम् । किन्तुमहायज्ञान्त-र्गतत्वेन अतएव तर्पणेनवलिनानित्यश्राद्धेन यथा धिकारोविधीयते ॥ तत्र च श्राद्धमन्यथासिद्धं भव-ति ॥ समाप्तिजनकविघ्नसंसर्गाभावे मङ्गलजन्यविघ्न ध्वंसवत् अतएवात्रनश्राद्धधर्म्माइति त्यागवाक्ये-तुनमः पदंदद्यादित्याद्यनुरोधादस्य श्राद्धत्वाभावा दिति सपिण्डितत्वसन्देहान्नमः पदमितितन्मन्द-म् नियतप्रयोगानुपपत्तेः ॥ यन्मते पार्वणादौ संक-ल्पस्यांगत्वम् ॥ तन्मतेसङ्कल्पात् प्रागेवभूस्वाम्यन्न दानम् अन्यथाऽनङ्गव्यवायः प्रतिहस्तकमतवदेव यन्मतेतुनांगत्वं तन्मतेसङ्कल्पानन्तरमपितद्दानंगा-यत्रीजपस्यैव प्रथमकर्म्मत्वात् ॥ अतएव कर्म्मप्र-दीपे प्राग्वेतिपरमगुरवोलिखन्तिस्म ॥ यत्र देशवि-शेषेयएवदेवागुणशून्याएवद्विजा अप्रतिष्ठितमेव पानीयं गौरान्यैवमृत्तिका तत्रचसर्वत्रतत्कर्म्मणि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तान्येवादर्त्तव्यानीति यस्मिन् देशेच येदेया यस्मिन् देशेचयेद्विजाः यस्मिन्देशेचयत्तोयं मृत्तिकायत्रयाद्दृशी इतिस्मृतेः॥ अर्घपात्रस्यकरेणाच्छादनमित्याचारश्चिन्त्यः देवार्घयोस्तूत्सर्गोनचस्थापनचालने अनभिधानादिति हन्तैवं मातामहादिपात्रेपिनस्यात्। प्रथमंपैतृकंपात्रं ततःपैतामहंन्यसेत्॥ प्रपितामहन्ततोन्यस्यनस्पृशेन्नच चालयेत् इतिविशेषाभिधानस्वरसादितिचेत् भ्रान्तोऽसि मातामहानामप्येवं श्राद्धं कुर्य्याद्विचक्षणः इत्यतिदेशवलात् तत्तदङ्गप्राप्तिस्तु विशेषवचनादिति पितृभ्यः स्थानमसीतिन्युब्जं पात्रमित्यविशेषितकात्यायनश्रुतेस्तत्रापितत्प्रतीतेश्च॥ ननु देवपूर्वश्राद्धमितिश्रुतेरत्रापिस्यादिति चेन्न तत्पूर्वकत्वमात्रश्रुतेः॥ तत्तदङ्गप्राप्तिस्तुविशेषापदेशवलादिति॥ अर्घदानमेषते अर्घःस्वधेत्यनेन॥ असावेषतेऽर्घ इतिकात्यायनेन सूत्रणादिति॥ परिवेषणन्तुदक्षिणहस्तेनैव विशिष्यानभिधानात कर्म्मोपदिश्यते यत्र कर्तुरंगन्नचोद्यते। दक्षिणस्तत्रविज्ञेयः कर्म्मणांपारगःकरइति छन्दोगपरिशिष्टवचनात् अतएव श्राद्धेहवनकालेतु पाणिनैकेननि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्पयेत् । तर्पणेद्वितयंकुर्य्यादेषएवविधिः सदेत्यपिस-
ङ्गच्छते ॥ यत्तु अन्नोपनयोर्हस्ताभ्यांमन्नदानं वा-
मान्वारब्धदक्षिणकरणेतत्तरङ्गिणीलिखनम् एकेन-
पाणिनादत्तम् न कदाचनभक्षयेत् । घृततैलंचपानी-
यंलवणंगोरसन्तथा इतिवचनादिति तद्घृतादिवि-
षयकमवगन्तव्यम्॥ युक्तं हुयभाभ्यांपाणिभ्यांतदन्नं
परिविष्यते । तद्विलुंपन्तिअसुराः सहसादुष्टचेतसः ।
युक्तं पाणिभ्यामसम्बन्धमिति व्याख्यायपाणिभ्या-
मेवपरिवेषणमिच्छन्ति तत्सर्वैरनादरणादमूलकमव-
गन्तव्यम् ॥ किञ्च उभयोर्हस्तयोर्युक्तम् यदन्नमु-
पनीयते । तद्विलुंपन्तिअसुराइतिपाठस्यैव भृगुसंहि-
तायांदर्शनादिति ॥ श्राद्धे तुलसीपुष्पत्वेनैवदेया ।
पुष्पप्रकरणेतत्पाठात् ॥ वाजसनेयिनामन्नविकरणे
अनग्निदग्धाइतिपाठः स्वशाखाम्नातत्वात् ॥ ब्रह्म-
पुराणे ततः प्रक्षाल्यहस्तौचतथाचम्यहरिंस्मरेत् ।
सव्याहृतींसप्रणवांगायत्रींचततोजपेत् ॥ पठेन्मधु-
मतीःपुण्यास्तथाचमधुमध्विति ॥ अयंचगायत्रीज-
पोमधुमतीजपश्चसव्येनैव अपसव्येमानाभावा-
दितिभ्रान्तास्तन्न । प्राचीनावीतिनासम्यगपसव्यम-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तन्द्रिणा । पित्र्यमानिधनात्कार्य्यं विधिवद्दर्भपाणि-
नेतिवचनात् पित्र्यजपत्वेन प्राचीनावीतित्वसिद्धे-
रिति । एवन्दक्षिणायामपिप्राचीनावीतित्वमेव ।
ब्रह्मपुराणोक्तगायत्रीजपेदेवताभ्य इतिजपेचसव्य-
विधिरेव । उपविश्यजपेदित्यादिना अपसव्यबाधा-
त् ॥ गायत्रीजपात्प्रागेव कुशोपवेशनमितिवृद्धा-
स्तदसत् । पवित्रपाणिर्दर्भेष्वासीनोमधुवाताइति-
त्र्यचमिति शङ्खवचनेनमधुवाताइतिमन्त्रजपएवतद्वि
धानात् ॥ मधुर्मध्वितियस्तत्रत्रिर्जपोऽशितुमिच्छता
म् । गायत्र्यनन्तरं सोऽत्रमधुमन्त्रविवर्ज्जितः । इति
यथाश्रुतवाक्येमधुमध्वितिवाक्यस्यैवत्रिरभ्यास इति
प्राच्यास्तन्न तत्रप्रकृतौपार्वणेमधुमध्वित्यादित्रिर-
भ्यस्तोयोजपः स इहविकृतौमधुमन्त्रविवर्जितः का
र्य्यइत्यस्यैवप्रकृतवाक्यार्थत्वात् ॥ सपिण्डनेतुसंयो-
जनवदर्घपिण्डविभागयोरपिमन्त्रान्वयः । कात्या-
यनालिखनमात्रस्याकिञ्चित्करत्वेन ये समानाइति
द्वाभ्यामाघन्तुविभजेत्त्रिधा । इत्यनेनमन्त्रान्वयस्य
दर्शितत्वात् नानाशाखाप्रत्ययमेकंकर्म्मेतिन्यायात्
श्रीदत्तनिबन्धेतदलिखनन्तुकल्पकारानुक्तत्वमात्रेण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कल्पसूत्रव्याख्यारूपत्वात् ननु विभजेदित्यत्रसंया-
गएवार्थोविपूर्वकभजतेस्तत्रापि शक्तत्वादितिचेन्न
तत्रशक्तिग्राहकाभावात् नचविभजन्तेनयेभूपाना
लभन्तेचतेश्रियमिति वलाहकच्छेदविभक्तरागामका
लसन्ध्यामिवधातुमत्ताभित्यादिप्रयोगएवशक्तिग्रा-
हकइतिवाच्यम् रूढिकाव्यकोदाहरणानुपपत्तेरिति॥
मत्स्यपुराणबोधितशय्यादिदान पंचकवाक्येस्वर्गप-
दानन्तरंप्राप्तिपदंनदेयम् तस्यस्वर्गार्थकत्वेपौनरु-
क्त्यापत्तेः। तदन्यार्थकत्वेकाम्यत्वाभावात् प्राप्ति-
र्हिसमवायलक्षणा साचाकाम्या विश्वजिन्यायेना-
स्पृष्टाचसहिन्यायः स्वर्गमात्रंस्पृशति तथाहि वि-
श्वजितायजेतेत्यत्र विश्वजित्यागस्यनित्यत्वम् तद-
करणेदोषाश्रवणात् अननुष्ठानेच विधेरप्रामाण्या-
पत्तिः अतःकाम्यत्वेअधिकारिलाभायफलमिहक-
ल्प्यते तच्च न तदनुष्ठातृपुरुषेच्छाविषयंपुत्रधनादि
अनन्ताधिकारिकगौरवात् लाघवादेकाधिकारिकत्व
मेव तत्र सुखदुःखाभावयोर्निरुपाधीच्छाविषयत्वेन
सकलानुष्ठातृपुरुषेच्छाविषयतया उभयोरपिप्रश-
क्तौदुःखाभावस्यगुरुतयाहेयत्वेन भावरूपत्वंनला-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

घवात् स्वर्गःफलंपर्य्यवस्यति सस्यात् स्वर्गः सर्वान् प्रत्ययविशेषादितितत्राभिधानान्नतत्प्राप्तिरपीति ॥ वृषोत्सर्गवाक्ये तु प्राप्तिपदंदेयमेव प्रकृत्यनुरोधात् तत्र च स्वर्गपदस्य सुरलोकार्थकत्वेन तत्सम्बन्धस्य निवासस्य संयोगरूपस्यकाम्यत्वादिति ॥ ब्रह्मपुराणे गृहीत्वादर्भपिञ्जलींततोवामेनपाणिनासव्येतराभ्यांपाणिभ्यांकुर्य्यादुल्लेखनादिकम् ॥ अत्र द्वन्द्वलात्कराभ्यामेव रेखाकरणमिति केचित् तन्न पिंजल्याद्यभिसंगृह्यदक्षिणेनकरेणतु । अन्वारभ्यतुसव्येनकुर्य्यादुल्लेखनादिकमिति कात्यायन वचनेनान्वारम्भप्रतीतेः । पाणिभ्यामेवेति तुल्यद्वारत्वेपिक्षौमेवसनावितिवत् ॥ कात्यायनानुरोधात् नचातद्गुणसंविज्ञानबहुव्रीहिस्तस्यजघन्यत्वात् ॥ करप्रोक्षणन्तु पित्रादित्रिकपिण्डकुशेष्वेव वृद्धप्रपितामहादीनामेवलेपभागित्वात् ॥ लेपभागश्चतुर्थाद्याः पित्राद्याःपिण्डभागिनइति पिण्डदइतिवचनात्तत्रापिदक्षिणकरस्यैव ततोदर्भेषुतंहस्तं निर्मृज्याल्लेपभागिनामितिवचनात् ॥ दर्भमूलेकरौप्रोक्ष्य त्रिरावृत्यहारिंस्मरेत् इत्यत्रोभयत्ववचनस्याविवक्षित-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वात् वस्तुतस्तूपक्रमस्थद्विवचनानुरोधेनगृहं सम्मा ष्टींतिवदेकत्वमविवक्षितम् वेदोवेतिन्यायात् अतएवद्विबचनोपबृंहितः प्रयोगोपिघटत इति अत्र च शब्दप्रयोगोनकार्य्योमानाभावात् ॥ नीवीविस्त्रं सनन्दक्षिण हस्तेनैवांगानभिधानात् कर्म्मोपदिश्य तेयत्रकर्त्तुरंगंनचोच्यतइत्युक्तवचनात् ॥ पिण्डानामुत्थापनानन्तरमाघ्राणम् ॥ अवधायाजिघ्रतियजमानउल्मुकं सकृदछिन्नान्यग्नावाधत्तेइति कात्यायनेनाभिधानात् अवधाय उत्थाप्येतितदर्थात् एवं चविपरीतक्रमोहेयइति ॥ मत्स्यपुराणे ॥ अघोराः पितरःसन्तुसन्त्वित्युक्ते पुनश्चतैः एवंचात्रवारिधारादानंप्रमममूलकमितितत्वम् ॥ कात्यायनः । नमोवइत्यंजलिंकरोत्येतद्वइत्यपास्यनिसूत्राणिप्रति पिण्डमिति ॥ एतद्वः पितरोवास इति जल्पन् पृथक् पृथक् अमुकगोत्रैतत्तुभ्यमन्नंस्वधानमः । दद्यात् क्रमेण वासांसिश्वेत वस्त्रभवादशाः अत्र च एतद्वः पितरोवास इतिषट्कृत्वः पठनीयंपूर्बभागस्तु सकृदेवावृत्यनभिधानात् अत्रसूत्राणीति वचनात् प्रतिपिण्ड सूत्राणिदेयानि तेनपिण्डसूत्रदानानन्तरमु-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्सर्गः तत एव मेव पिता महादि पिण्डदानमुत्सर्ग-श्च ब्रह्मपुराणवाक्यैस्फुटमेवकाण्डान्तसमय प्रतीते-रिति । एतद्वोमत्पुत्रत्वकरी पतिश्वशुर प्रश्वशुरा-वास इति वाक्यमाचरन्ति तन्नमनोरमम् प्रत्येकमे-षांदेवतात्वेन सूत्तदानेर्थानन्वयात् नहिपुत्रत्वकरी-पतित्वं श्वशुरत्वं प्रश्वशुरत्वंचैतेषां प्रत्येकमस्तिए-तद्वःपितरोवास इत्यत्रपितृपदस्य प्रत्येकमेवसक्तेः प्रत्येकमेवदेवतात्वेनार्थान्वयः एतद्वः पितरोवास इतिजल्पन् पृथक् पृथगितिवचनवलेन एकस्मिन्न-पिवहु वचनान्तस्य पितृपदस्य प्रयोगात् साधुत्वा-द्बहुवचनम् प्रकृतेतुपदत्रय भिन्नभिन्नार्थकत्वेन प्र-त्येकंसमुदाय प्रतिपाद्यत्वाभावात् तथाच एतद्वो-मत्पुत्रत्वकरीपतयोवासएतद्वोमत्पुत्रत्वकरीश्वशुरा-वासएतद्वोमत्पुत्रत्वकरीप्रश्वशुरावासइति वाक्यं कर्त्तुमर्हम्भवतीति ॥ वसन्तायनमस्तुभ्यमितिमन्त्रे-णवसन्तादीनां नमस्कारोनतुलौकिकवाक्येन पूजन-म्मानाभावादिति ॥ श्राद्धशेषेणैव वैश्वदेव वलिहन्त-काद्याः॥निवृत्यप्रणिपत्याथपर्युक्ष्याग्निं समन्त्रवत्। वैश्वदेवं प्रकुर्वीत नैत्यिकं वलिमेवच । भुंजीता-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिथिसंयुक्तः सर्वपितृनिषेवितमितिमत्स्यपुराणे शे-
षेणैवतिथिभोजनविधानादस्यचतत्तुल्यरूपत्वात्न
न्वयंकालयिधिरेव । प्रत्युतनिरूप्यहविरन्यस्मा अ-
न्यस्मैनहिहूयतइत्यादिनानिर्वापहोमयोः समानोद्दे-
श्यताप्रतिपादनात्कथमेवमितिचेन्न पर्युक्ष्याग्नि-
मित्यनेनदक्षिणाग्नेरेवाभिधामात् शेषस्यैवहविर्द्र-
व्यत्वसिद्धेरनपवादाच्च निरूप्येत्यादिवचनमग्नौ-
करणहोमस्य प्राचीना वीतितायां वीजाभिधा न
परमतो न किंचिदेतदिति ॥ श्राद्धानन्तरन्तु पाकान्त-
रेण पाकस्य तत्रांगत्वात् नचांगत्वेन प्रधानति-
थिनियमः नियमादृष्टभिन्नापूर्वरूपोपकारजनक-
त्वाभावाद् अन्यथापरेषामपिकुतपमात्रलाभेश्राद्ध-
वाधापत्तेरिति ॥ अग्नौकरणहोमस्तु कर्त्तव्यउप-
वीतिनाप्राङ्मुखेनैवदेवेभ्योजुहोतीति श्रुतिश्रुतेः ।
अपसव्येनवाकार्य्यो दक्षिणाभिमुखेन तु । निरू-
प्यहविरन्यस्माअन्यस्मैनहूयते । अत्रसउद्वास्यद्वे
आहुती जुहोतीति पिंडपितृयज्ञे शतपथश्रुतेरग्नौक-
रणहोम उपवीतिना पूर्वाभिमुखेनैव कार्य्यो हेतु
मान्निगदवलादिति प्रथमश्लोकार्थः पितृभ्योनिर्वपा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मीति चरुनिष्पत्तयेव्रीहिनिर्वापः कृताहोमनिर्वाप-
योः सामानोद्देश्यत्वानियमादपसव्येन दक्षिणामुखे-
नैव कार्य्यो हेतुमन्निगदबलादिति द्वितीयश्लोकार्थः।
अत्रच प्रथमः कल्पः पूर्वपक्षोद्वितीयः सिद्धान्त इ-
ति केचितन्न हेतुमन्निगदविरोधात् ॥ धर्म्मशास्त्र
स्यास्य वेदमूलकत्वेन अत्रपूर्वपक्षसिद्धान्तयोरभा-
वात् ननुपृथकृतयोः केचिदाहुः श्राद्धस्यकरणन्नृप।
एकत्रैकेनपाकेनवदन्त्यन्यमहर्षयः। इत्यत्रकेचिदि-
त्यभिधानेन पूर्वपक्षत्वावगतिः। महर्षय इति स-
पुरस्कारमभिधानेनोत्तरस्यसिद्धान्तत्वावगतेः। भ्रा
न्तोसि। अत्रापिव्यवस्थितविकल्पत्वात् यदियज-
मानः शेषधारणाकांक्षीतदापृथक् पाकेनान्यथात्वेके-
नैवेतितदर्थात् तस्मादत्रापि उदितादिहोमवच् छा-
खादिभेदेनैव विकल्पस्यव्यवस्थितत्वात् तेनगोभि-
लीयानां सव्येनैवहोममभिधायानुपदमेवातः परं
प्राचीनावीतिनाभाव्यमिति गोभिलात् माध्यन्दि-
नीयानान्त्वपसव्येनैव प्राचीनावीती भूत्वादक्षिणा
सीन इत्युपक्रम्य सउद्धास्य द्वेआहुतीजुहोतीति
शतपथश्रुतेः अत्र च भ्रान्तानांविपरीताचारे परम

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गुरुचरणैरेव तत्रतत्रोक्तमपसव्यं नैवमितिदिक् ॥ आमश्राद्धपक्षेपरितस्तिलविकरणं छागवन्धनंच नास्ति तत्रेत्यनेन देवलवचनेन पाकस्थानस्यैव प्रत्यवमर्षादितिकेचित्तन्न मनुनाश्राद्धदेशएवतद्विधानात् देवलस्याप्येकवाक्यतयातत्परत्वादिति ॥ कात्यायनः। शेषमन्नंकिंक्रियतामिष्टैः सहभुज्यतामिति अत्रच यावद्वचनं हिवाचनिकमिति न्यायादनुज्ञानमात्रादेवशास्त्रार्थ सिद्धिस्तएकादश्यादौभक्षणाभावेपिनांगवैगुण्यमितिकेचित्तन्न ततोज्ञातिषुतुष्टेषुस्वान् भृत्यान् प्रतिपूजयेत । पश्चात्स्वयंचपत्नी चपितृशेषमुदाहरेत् इतिदेवलविरोधात सतिशेषेतद्भक्षणमंगमतएकादश्यादौतन्नधार्यमित्यपरे तदप्यसत् देवलेनतद्धारणविधानात् सतीत्यत्रैव मानाभावात् एकादश्यादौभक्षणनिषेधान्नतत्रभक्षण मंगमित्यन्येतदपिन प्रेतश्राद्धे यदुच्छिष्टमित्यादिनातद्भक्षणनिषेधात् परेतु रागप्राप्तस्यापिविधानमंगत्वार्थम् इज्यायामावाहन वाधवदेकादश्यां भक्षणं विनापितत्सिद्धिरितितन्न वैषम्यादन्यथोपपत्ते र्वक्ष्यमाणत्वात् अत्रभक्षणस्य रागप्राप्तत्वेन समुच्चितस्य न-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विधेयत्वं किन्तु परि संख्यापरत्वमतस्तद्भक्षणाभा-
वेप्येकादश्यादौ श्राद्धसिद्धिरिति अत एवहविष्य व्र-
ते एकभुक्तव्रतेच भोजनाभावेपि नांगवैगुण्यं परि
संख्यापरत्वा दतएव वत्सरान्त सपिण्डतासिद्धिर-
पिपरास्ता ॥ वस्तुतस्तु शेषान्नस्याघ्राणमात्रेणैवशा
स्त्रार्थसिद्धिरतस्तद्भोजनाभावेनांगवैगुण्यन्तदुक्तं का
लादर्शलिखितश्रुतौ एकादश्यादौपिण्डमाघ्रेयंतन्नै-
वप्राशितं नैवाप्राशितम्भवतीति ॥ वराहपुराणे
उपवासोयदानित्यः श्राद्धन्नैमित्तिकंभवेत् । उप-
वासस्तदाकुर्य्यादाघ्रायपितृसेवितमिति ॥ एकोदि-
ष्टस्यपिण्डे तुअनुशब्दंनयुज्यते । पितृशब्दंनकुर्बी-
त पितृहाचोपजायत इति ॥ प्रेत प्रकरणीयवाक्यब-
लाद्वर्गोभिलीयानां प्रेतैकोद्दिष्टेयेचात्रेत्यादिशब्दो-
ल्लेखोनकार्य्यं एवतदतिरिक्ते तु सांवत्सरिकादौपुंसः
श्राद्धे कार्य्यं एवापादकाभावात् ॥ स्त्रियास्तुश्राद्धे
कुत्रापिनकार्य्यः । पितुर्नामगृहीत्वासावेतत्तेतिलो
दकम् । येचात्रत्वानुयांश्चात्वमनुतस्मैतेस्वधेतिवि-
शेषश्रुतेः । एवंमाध्यन्दिनीयानां स्त्रियाः पुंसोवा-
प्रेतश्राद्धेविकृतस्य नमोवइत्यस्यनपाठः पितृशब्द-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्नकुर्व्वीतेत्यादिवचनात्॥ श्राद्धान्तरेतु तदुल्लेखःका र्य्यएव प्रेतश्राद्धप्रकरणएवश्रुतेः॥ गौड़ास्तुसमस्त एव प्रेतश्राद्धे पितृशब्दोल्लेखोनकार्यः प्रकरणवला- दसंकोचाच्चेत्याहः तन्मन्दम् पिण्ड इतिकारकविभ- क्तिश्रुतेः॥ ननुछन्दोगानामनुशब्दनिषेधोपि तत्रै- वस्यात् नस्यात्। प्रेतशाद्धेषुसर्व्वेषुनस्वधानाभि- रम्यताम्। स्वस्त्यस्तुविसृजेदेनं सकृत् प्रणव व- र्जितमित्याश्वलायनीयविशेषनिषेधात् पितृशब्द- निषेधेच पितरिदंतेऽर्घ्यमित्याद्यनेकश्रुति स्मृति- विरोधापत्तेरितिदिक्॥ पितामहादिनामेवपिण्ड- दानं वामान्वारब्धदक्षिणकरेण। पिण्डानिदध्या- त् सव्येनपाणिनादक्षिण मुपसमाधायेत्यश्वाधितम् सूत्रात्उक्तमादायपिण्डन्तुकृत्वाविल्वफलोपमम्। दद्यात्पितामहादिभ्योदर्भमूलाद्यथाक्रममिति वच- नाच्च। वहुवचनन्तुमातामहादिपिण्डापेक्षया पितृ- पिण्डदानन्तुपाणिभ्यामेव सव्येतराभ्यांप्रथमं पि- ण्डमावपेदितिवचनात् नचक्षौमेवसनावग्निना द- धीयातामिति वदत्राप्यस्तु इति वाच्यम् एवं हिप्रथ- मपदस्यवैयर्थ्यापत्तेरिति॥ नचैकवचनवन्मन्त्रानूहे-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नैकोद्दिष्ट इति सूत्रात् प्रकृतिप्राप्तानां वहुवचनवन्मन्त्राणां समवेतार्थानां विकृतौतावदेकवचनोह्योऽत एवाग्नयेत्वजुष्टं निर्वपामीत्यत्र सूर्य्यायत्वाजुष्टं निर्वपामीतिदेवतोहः। असमवेतार्थानान्तुनोहः अतएव दैक्षेपशावेकपाशिकायां रज्जौप्रकृतौस्वधितिस्तेपाशं प्रमुमोक्तुस्वधितिस्तेपाशान् प्रमुमोक्तु इति मन्त्रद्वयंद्विपाशिकायां विकृतावेकवचनान्तोद्विवचनान्तः कृत्वोह्यते प्रकृतौसमवेतार्थकत्वात् द्विवचनान्तस्तुनोह्यते प्रकृतावेवासमवेतार्थकत्वात् तथाचनमस्तेमातारसाय नमस्तेपितारसाय इति सिद्धंतु एतत्तेपितर्वासइतिकथं प्रकृतावेवासमवेतार्थकत्वान् एतद्वः पितरोवास इतिजल्पन् पृथक्पृथगितिश्रवणात नचन्यायलभ्योनायमूहः किन्तुवाचनिक एव तथाचात्रस्यादेवेतिवाच्यम् तथासत्यायन्तुनः पितरइत्यादावप्यूहापत्तेः तस्मादेतद्वः पित्ररोवास इत्यत्रवहुवचनं नोह्यं किन्तु प्रकृतिभूतं पितृशव्दमात्रमिति केचित्तन्नयत्रहि प्रकृतौस्वारसिक्यसमवेतार्थकता तत्रविकृतौनोहः। यथाशुन्धन्तां पितरइत्यत्र अत्रतुपृथक् पृथगितिव-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च्चनात् प्रकृतौबहुवचनस्यासमवेतार्थकता तत्रतुवि-
कृतावेकोद्दिष्टेबहुवचनस्योहएव अन्यथाविभ-
क्तीनां साधुत्वनस्यात् द्विधाहिविभक्तीनांसाधुता
प्रकृतेतन्त्रत्वन्मते सौत्रीसाधुतानास्त्येव प्रयोगसाधु-
तापितद्बहुवचनस्यपार्वणएव वीप्सात्वलात् नत्वे-
कोद्दिष्टे । तत्रवीप्सासहितवाक्याप्रवृत्तेरिति । तृती-
याचविभक्तीनांसाधुतानास्त्येवेत्यकामेनापिद्वयम-
प्यूह्यमेवेति ॥ श्राद्धविवेकेतुनात्राद्ये कोद्दिष्टे एतद्वः
पितरोवास इत्यत्रद्वयमपिनोह्यमिति तत्राप्युक्तमेवे
तिदिक् ॥ ७ ॥ रुद्रः श्वेतश्चमैत्रश्चततोगारभटस्तथा ।
सावित्रोविजयश्चैवगान्धर्वः कुतपस्तथा॥रौहिणोऽथ-
विराजश्चसोमोनिर्ऋतिरेवच माहेन्द्रोवरुणश्चैवभटः
पञ्चदशस्मृतः ॥ अह्नोमुहूर्त्ताविख्यातादशपंचच सर्व
दा ॥ अत्रपूर्वोत्तरयोर्दिनयोर्मध्याह्ने क्षयतिथिलाभे
कपालाधिकरणन्यायेन एकोद्दिष्टंतावत्पूर्वदिन ए-
वेतिसकलजनसिद्धं एकोद्दिष्टं तुमध्याह्न इति वच-
नात् यत्रपूर्वदिनेमध्याह्नलाभस्तत्रोत्तरदिनएव
तिथिद्वैधाभावात् रौहिणन्तुनलंघयेदिति श्रुतेश्च-
यदिचैकत्रगांधर्वकुतपरौहिणानां लाभस्तदागुणफ-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लार्थिनाकृतपएकोद्दिष्टश्राद्धं कार्य्यम् शिवसंनिधा-
वनन्तफलासन्येरतिवत् नचगान्धर्वातिक्रमाक्षेपश-
का तथापिमध्याह्नानाक्षेपात् पूर्वदिनेतुयदिरौहिण-
मात्रलाभस्तदापिरौहिण एवश्राद्धम् नतुगुणफलानु-
रोधेनोत्तरत्र एकोद्दिष्टविहितास्याभ्युपगतमध्या-
ह्नाक्षेपापत्तेः नचगुणविधेरननुष्ठानलक्षणाप्रामा-
ण्यापत्तिस्तस्यमध्याह्नव्यापकतिथिपरत्वेनैवोपप -
त्तेः एवं मध्याह्नाप्रतिक्षेपेयत्रगुणफलयोगस्तत्रैवत-
दर्थं प्रवृत्तिरितिवज्रलेपायितम् अतऊर्द्धं म्मुहूर्त्ता-
त्कुतपाद्यन्मुहूर्त्तचतुष्टयम् । मुहूर्त्तपंचकं वापिस्वधा-
वाचनमिष्यत इति विधेरमावास्यायां पितृभ्योद-
द्यादिति श्रवणाद्द्वयोरेकवाक्यतयारात्र्यादौ श्राद्धा-
प्राप्तौ रात्रौश्राद्धन्नकुर्वीतराक्षसीसाहिकीर्त्तिता ।
संध्ययोरुभयोर्वापिसूर्य्येचैवाचिरोदिते ॥ इत्यत्र-
वाक्यभेदापत्त्यापर्य्युदासएवनञर्थः तेनपर्य्युदस्ते-
तरकाले श्राद्धविधिरतएवसन्ध्यारात्र्योर्नकर्त्तव्यं
श्राद्धं खलुविचक्षणैः ॥ तयोरपिचकर्त्तव्यंयदि-
स्याद्राहुदर्शनमितिवचनेपितयोरित्यत्रपर्य्युदस्तकाल
एवाभिहितोऽन्यथाचिरोदितकालसूर्य्यग्रासे श्राद्ध-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

बाधापत्तिः। अतएव राहुदर्शनसंक्रान्तिविवाहात्य-
यवृद्धिषु । स्नानदानादिकं कुर्य्यान्निशिकाम्यव्रतेषु-
चेत्यपिसंगच्छते केचित्तु पूर्वाह्णे मातृकं श्राद्धमप-
राह्णे तुपैतृकम् एकोद्दिष्टन्तुमध्याह्ने प्रातर्वृद्धिनिमित्त-
कमितिस्मरणात् सिद्धे सत्यारंभस्यनियमार्थत्वात् अ
न्यथावैयर्थ्यापत्तेः तेनकृष्णपक्षेपार्वणेऽपराह्णनियम
एव एकोद्दिष्टेऽपिमध्याह्ननियमएवेत्याहुस्तन्नय-
पाचैवापरःपक्षः पूर्वपक्षाद्विशिष्यते। तथाश्राद्धस्य-
मध्याह्नादपराह्णोविशिष्यते।।तथादर्शेश्राद्धन्तुयत् प्रो-
क्तंपार्वणं तत्प्रकीर्त्तितम्। अपराह्णेपितॄणान्तुतत्रदा-
नंप्रशस्यते ।। तथाऽपरपक्षस्यपराह्णः श्रेयानितिक-
ण्ठतएव प्राशस्त्याभिधानात् । नचपरनिरपेक्षस्य-
प्राशस्त्यस्यनियमपरतैव गौरवमानाभावाभ्यास-
प्रयोजकत्वात् । पूर्वोत्तरादिनयोरेवापराह्णालाभेपा-
र्वणलोपापत्तेश्च किञ्चाधिच्छन्नमितिचेत् भ्रान्तोसिउक्त-
युक्त्यानियमेप्रत्यादिष्टे अमावास्यायां पितृभ्योद-
द्यात् ऊर्द्धं म्मुहूर्त्तात्कुतपाद्यन्मुहूर्त्तचतुष्टयमित्यन-
योरेकवाक्यतयाऽमावास्या पार्वणस्यपर्य्युदस्तेतर-
कालकर्तव्यत्वेनियमिते तन्नचश्राद्धलोपोविधिविरो-

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धस्यवज्जलेपायितत्वात्॥ अथ सर्वाण्यवद्दशमुहूर्त्तकु-
पकालविधायकानिवचनानिमध्या ह्नापराह्नरूपप्र-
शस्तकालविशेषपराणि तथा औरसक्षेत्रजौपुत्रौ विधि
नापार्वणेनतु । प्रत्यब्दमितरेकुर्युरेकोद्दिष्टंसुतादशे-
तिसामान्यवचनं पार्वणेनविधानेन द्वयमाग्निमतास-
देति मत्स्यपुराणीयविशेषवचनपर्यालोचनया वि-
शेषपरमिति चेत्। तन्न मुनिभेदाद्वचनमनुनैवरात्रौश्रा-
द्धङ्कुर्वीतेति पर्य्युदासमभिधायापराह्णोविशिष्यत
इत्युक्तम् तथाचात्रसामान्यस्यविशेषपरत्वेस्वकृत
सामान्योपादानं व्यर्थमेवस्यादिति । ननु तर्ह्ये-
कोद्दिष्टेमध्याह्ननियमएवास्तु बाधकाभावादिति
चेन्न । एकादशाहेद्वादशाहेऽथवेतिश्रवणादेकोद्दि
ष्टे मध्याह्ननियमेन तद्विधेरननुष्ठानलक्षणमप्रामा-
ण्यं स्यात् हन्ततर्हीति एवंयावद्वचनंहवाचनिक
मितिन्यायेन तत्रानियमोस्तु अन्यत्रतु नियमएवे-
तिचेन्न । पूर्वोत्तरदिनयोर्मध्याह्न क्षयतिथ्यलाभेत-
द्वर्षवार्षिकलोपापत्त्या प्रतिसम्वत्सरं राजन्न कोद्दि-
ष्टंविधानत इत्यत्र प्रत्यब्दं द्वादशेमासिकार्योपि-
ण्डक्रियाबुधैरित्यादौ च सर्वत्रवीप्साबाधापत्तेः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथवीप्सयापिप्रत्यब्दम्मध्याह्नश्राद्धं कुर्वीतेत्यंवक्तव्यम् मध्याह्नस्यनियमितत्वान् मध्याह्ननियमे वीप्सायास्तद्भिन्नविषयकत्वं तद्भिन्नविषयकत्वे च मध्याह्ननियमइत्यन्योन्याश्रयात् मृताहनितुकर्त्तव्यं प्रतिमासंतुवत्सरमित्यत्रात्यन्तसंयोगाविधिवाधापत्तेश्च भ्रान्तास्तु सति सम्भवे स एवादर्त्तव्य इति मैथिलालिखनानुरोधास् सति सम्भवे मध्याह्नापराह्ननियममिच्छन्ति तत्तुच्छम् नियम एव मानाभावे न सम्भवनियमस्य दूरापास्तत्वात् निबन्धलिखनस्य गुणपरत्वेनैवोपपत्तेः। शुक्लपक्षे पार्वणेतु पूर्वाह्ननियम एवापवादकाभावादिति सर्वं रमणीयम् रौहिणन्तु न लंघयेदिति वचनन्तु पार्वणपरमेव तन्मात्रकालस्यैव प्रक्रान्तत्वादिति गौडास्तन्मन्दम्। एवमस्यानुवादकतापत्तेः पूर्वाह्नापराह्नयोः शाब्द्येव प्राप्तेरत एतद्बलादेव शुक्लपक्षे,तूत्तरावधित्वमपरपक्षपूर्वावधित्वमतोऽस्यविधायकत्वमेवेति हन्ततर्हि इतएव कृष्णपक्षापराह्नःश्रेयानित्यस्यैवानुवादकतापत्तेः रौहिणमित्यनेन पराह्नस्यलाभात्। न च कृष्णपक्षसमभिव्याहारादेव तल्लाभः तात्पर्यगौरवापत्तेः तस्मा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दारभ्यकुतपेश्राद्धं कुर्यादारौहिणम्बुधः विधिज्ञोविधिमास्थाय रौहिणं नतुलंघयेदिति गोतमवचनमेकोद्दिष्टपरमेव एवं सपिण्डीकरणमेकोद्दिष्टपरमेव प्राधान्यादेकोद्दिष्टव्यपदेशाच्चतद्धर्मलाभाद्रौहिणोत्तरसमयः सर्वथासपिण्डनेनिषिद्धः गौडास्तु सपिण्डीकरणस्य पार्वणरूपत्वादपराह्णकर्त्तव्यत्वमिच्छन्ति अथापूर्वरूपोपकारजनकाङ्गानांप्रधानदेशकालनियमात पाकस्यतु आरभेत् नवैः पात्रैरन्नारम्भं सधान्यत्र इति स्मृतेस्तथात्वे नैकोद्दिष्टे च एकोद्दिष्टन्तु कर्त्तव्यं पाकेनैवसदास्वयमितिवचनात् पाकस्य नियतत्वादस्तूत्तराह्णेतत्रानुष्ठानमिति नपाकस्यव्रीहीन वहन्तीतिवत् नियमाहष्टभिन्नाहष्टजनकत्वे मानाभावान्नियमाहष्टमात्रजनकेपाकेतत्तिथिकर्तव्यता नियमाभावात् अन्यथातवापि प्रथमदिनेकुतपमात्रलाभेश्राद्धवाधापत्तेः नचैकोद्दिष्टेकुतपनियम एव मानाभावात् तत्र दत्तमथाक्षयमितिश्रुतेश्च ॥०॥

श्वःकर्तास्मीतिनिश्चित्यदातात्रीन्विप्रान् निमन्त्रयेन्निरामिषंसकृत्भुक्त्वासर्वंभुक्तजनेगृहइतिवचनान्निरामिषसकृद्भोजनं कर्तृसंस्कारद्वाराश्राद्धाङ्गं तत्रामा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

वास्यादौ क्षयाहेवामावास्याक्षयाह श्राद्धयोः श्वो-
भावितिथिकर्तव्यत्वकस्योभयोरपि निश्चयादङ्गानु
ष्ठानमप्रत्यूहमेव तीर्थप्राप्तिक्षतान्तयोरुभयोरपि
श्वोभावित्वानिश्चयेन तयोः श्राद्धकर्तव्यतानिश्च-
येपि न तदङ्गानुष्ठानं निश्चित्यैत्युक्तवचनेऽश्रवणा-
त् । न च सर्वत्रभाविनिश्चयाभावात् अननुष्ठान-
मेवास्तु विध्यन्यथानुपपत्त्या तत्संशयस्याप्रयोजक
त्वादन्यथाऽननुष्ठानलक्षणाप्रामाण्यापत्तेः कथन्तर्हि
विवाहादावाभ्युदयिके श्वोभावित्वनिश्चयाभावेपि
तदङ्गानुष्ठानं वैवाहिकविध्यन्यथानुपपत्त्या निमि-
त्तानिश्चयेपिनित्यनैमित्तिकश्राद्धाधिकारे सिद्धेऽङ्गा
नां प्रधानरीत्यन्वये प्रधानाधिकारवदङ्गेपिसन्देहे-
तत्राधिकारात् अतएवनिर्विचिकित्सांधिष्ठानान्तथाचा
रइतिदिक् तथैवामन्त्रितो दाता प्रातःस्नातः सहाम्बरः
आरभेतनवैः पात्रैरन्वारम्भं सयान्धवइति देवलवा-
क्येन स्वस्यसपिण्डानां च पाकाधिकारः तथापि
पत्न्याः सपिण्डायाश्चाधिकारः स्वयं पत्न्यापिवा-
पचेत् इतिश्रुतेः रजस्वलाञ्चयानारी व्यङ्गिताकर्ण-
योस्तथा निर्वापेनोपतिष्ठेतसंग्राह्यानान्यवंशजेति

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भारतवचनेनान्यवंशजाताया एव निषेधात् अशौचाभ्यन्तर एव श्राद्धे तुकर्त्तु रेव पाकाधिकारानान्यस्य तस्यैव परन्तत्र शौचापदेशादिति ॥ नवैःपात्रैरितिमृन्मयभाण्डैरनुपहतैरितियावत् ताम्रमयैरिति गणेश्वरमिश्राः वस्तुतस्तु नवैः पात्रैरनिषिद्धपात्रैरित्यर्थ इतिदिक् ॥ मत्स्यपुराणेपुनर्भोजनमध्वानं दूरतमायासमैथुनम् श्राद्धभुक्श्राद्धकृच्चैव सर्वमेतद्विवर्जयेत् स्वाध्यायंकलहञ्चैव दिवास्वप्नंचसर्वदा । कात्यायनः तदहः शुचिरक्रोधनोत्वरितोप्रमत्तः सत्यवादीस्यादध्वमैथुनश्रमस्वाध्यायान् वर्जयेत् । विष्णुपुराणे श्राद्धेनियुक्तो भुक्त्वा वा भोजयित्वा नियुज्यवा व्यवायीरेतसोगर्त्तेमज्जयेदात्मनःपितॄन् ॥ व्यासः अध्वनीनोभवेदश्वः पुनर्भोजीतुवायसः होमकृन्नेत्ररोगीस्यात्पाठादायुःप्रहीयते । दानं निष्फलतामेतिप्रतिग्राहीदरिद्रतां कर्मकृज्जायतेदासो मैथुनीशूकरोभवेत् ॥ होमोत्रानावश्यकः दानमत्राद्यातिरिक्तस्य तत्र च तदहरिति कात्यायनवचनात् कर्तुरध्वश्रमस्वाध्यायादिवर्जनं श्राद्धात्प्रागपि एकदेशेविष्णुपुराणस-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वादात् ॥ एतेनश्राद्धानन्तरमेवैतेषांनिषेध इति परेषांमतमपास्तम् । यत्तुश्राद्धं कृत्वाऽष्टवर्जयेदिति तदपियदिसमूलं तथाप्यत्यंतनिषेद्धपरमिति अमावास्याष्टकावृद्धिः कृष्णपक्षोयनद्वयमित्यत्रामावास्योत्सर्गतः श्राद्धनिमित्तमनग्नेस्तत्रा खंडामावास्यापराह्ण एवश्राद्धम् संशयाभावात् ॥ सखंडायान्तु दिनद्वयेप्यपराह्णलाभेपूर्वदिनएव कपालाधिकरणन्यायात् दिनद्वयेप्यपराह्णालाभेउत्तरदिनमध्याह्न एवश्राद्धम् तिथिमात्रलाभात् ॥ यथाचैवापरः पक्षः पूर्वपक्षाद्विशिष्यते तथाश्राद्धस्यपूर्वाह्णादपराह्णो विशिष्यते इतिशातातपवचनेन तथापरपक्षस्यापराह्णः श्रेयानित्यापस्तंववचनेन तत्प्राशस्त्यस्यकंठतोऽभिधानात् अतएवापराह्णे नियमः संभवनियमोवाप्यपास्तः ननुपूर्वाह्णे तु पैत्रिकमितिनिष्फलत्वानिर्देशादस्तुनियम इतिचेत् भ्रान्तोसि मन्वापस्तंवशातातपवचनविरोधात् एवं चशुक्लपक्षेपूर्वाह्णनियमएव शुक्लपक्षेतुपूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः कृष्णपक्षेपराह्णे तु रौहिणन्तुलंघयेत् इतिवचनात् हन्तैवमपराह्णे तुपैतृकमिति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वचनाविरोधः मन्वादिवचनपर्य्यालोचनया शुक्लपक्षस्यपूर्व्वाह्ण इतिश्रुतेस्तस्य कृष्णपक्षमात्रपरत्वादिति ॥ एकोद्दिष्टन्तुकुर्वीतपाकेनैव सदास्वयमित्येकोद्दिष्टे विशेषाभिधानलाभादपाटवादौ पुत्रादिद्वारापिपार्वणमेवकारयितव्यम् नत्वेकोद्दिष्टमपि अतएव गौडानामाचारोप्येवम् नचस्वयं शब्दस्यपाकएवान्वयः प्रथमस्यपर्णाकांक्षत्वेनानन्वयात् विमलंजलंनद्याः कच्छेमहिषश्चरतीतिवन्निराकांक्षत्वादिति ॥ अमावास्यायामध्याह्ने राहुदर्शनेकथं त्रैवर्णिकानांक्षयाहश्राद्धसिद्धिः तत्रतेषांपाकस्य नियतत्वादेकोद्दिष्टन्तु कुर्वीतेत्याद रनुपदमेवाभिधानात् ॥ प्रेतश्राद्धं यदुच्छिष्टं ग्रहेपर्युषितं चयत् दंपत्योर्भुक्तशेषं चनभुंजीतकदाचन तथासर्वेषामेववर्णानां सूतकंराहुदर्शनेस्नात्वाकर्मकुर्वीतश्रृतमन्नं विवर्जयेदित्यादिना पूर्वसिद्धस्यतदानीं सिद्धस्यचाऽकर्मण्यत्वप्रतिपादनादितिचेत् उच्यते अखंडामावस्यायां तथाखंडामावास्यायामपि चतुर्दशीयुक्तायां मध्याह्नेग्रासस्यासंभवात् प्रतिपद्युक्तायान्तु सखंडायां मध्याह्ने राहुग्राससंभवेपि पर्युदस्तेतर-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कालतृतीयादिमुहूर्त एवश्राद्धं वाधकाभावात् मध्याह्नस्यप्रशस्तत्वात् नचग्रासस्य च तत्रविहितसकलमुहूर्तव्यापकतामानाभावात् मध्याह्नाव्यापनेपिनानुपपत्तिस्तत्रोत्तराह्ने पूर्वचरमभाग एवनियमात् सपिंडीकरणन्तु संभवत् कालान्तरमेवकार्यमिति तत्रनानुपपत्तिः दैवादेकादशाहेग्रासपूर्वग्रासान्तरं वावृषोत्सर्गादिकंविनापिश्राद्धसिद्धिरगतिकत्वादिति ॥ अपराह्णव्याविन्यामवावास्यायां रविग्रहे ग्रहणश्राद्धेनैवा मावास्याश्राद्धस्यापि प्रसङ्गादेवसिद्धिः प्रसङ्गविरोधिनोऽभावात् सायाह्नेतुरविग्रहेपृथगनुष्ठानमेवकालभेदेन प्रसङ्गाभावात् एवंचाचिरोदितादौ ग्रासेपृथगनुष्ठानमेव तत्रामावास्याश्राद्धस्यापि पूर्व्वदिनएव प्रवृत्तेरितिसुव्यक्तमेवेतिदिक् ॥ ० ॥ आमावास्यायामेवतीर्थप्राप्तौ अमावस्याश्राद्धमेवकार्य्यम् नतुतीर्थप्राप्तिनिमित्तकमधिकाङ्गेनाल्याङ्गस्यनिर्व्वाहादितिकेचित् ॥ तत्रागन्तुकतीर्थश्राद्धमेवावश्यकम् । अकालेप्यथवाकाल इत्यादिनाऽमावास्यादिकालेपि प्राप्युत्तरश्राद्धानन्तुगुणकालान्तरितविहित मुहूर्त्तकर्त्तव्यतयावोधना-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दिति तदानीमेवग्रहो परागेतन्निमित्तकमेव श्राद्धं कार्य्यंतस्यतत्कालमात्रकर्त्तव्यत्वेननिरवकाशत्वात् तत्रैवपितुरेकादशाहे ऽमावास्यादिश्राद्धस्यवाधितत्वात् पित्रन्यप्रमीतस्यापितुरेकादशाहश्राद्धं सपिण्डनेचाकृतेऽन्तराग्रहणनिमित्तकमेवश्राद्धं कर्त्तव्यम् । सपिण्डनस्यान्यदापिसम्भवादिति सांप्रदायिकाः ॥ कार्त्तिक्यादौ वृषोत्सर्गे शुद्धसमयापेक्षाइष्टत्वादिति ॥ अत्रसर्व्वत्रप्रधानयोर्न्यूनाधिकाङ्गयोरप्येकस्मिन् क्रियमाणेप्रसङ्गादेवापरस्यापिसिद्धिः ॥ ० ॥ आम्राश्चसिक्ताः पितरश्चतृप्ताइतिवत् नतुतन्त्रेणतयोरुद्देश्यताविरहात् अतएवाङ्गेक्रियमाणेप्रसङ्गादेवप्रधानसिद्धिः । यथोदयोत्तरक्रियमाणेनाङ्गतर्प्पणेनप्रसङ्गात् स्वतन्त्रतर्प्पणस्यापिसिद्धिरङ्गयोश्चतन्त्रेणैवसिद्धिरुद्देश्यतासत्वात् । अनेकोद्देशेन एकानुष्टानक्रियातन्त्रमिति तल्लक्षणात् अतएव नामकरणचूडाकरणयोः सुतसंस्कारत्वेनद्वयोरुद्देश्यताभवतितेनसकृदेवनान्दीमुखश्राद्धानुष्टानमितिसिद्धान्तः । काम्येनत्वमावास्याश्राद्धेननित्यस्यनैमित्तिकस्यापि प्रसङ्गादेवसिद्धिर्न्न ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तुनित्येननैमित्तिकेनवाकाम्यसिद्धिरधिकारभेदात्
एवंचतन्नतन्त्रनिवन्धे प्रधानयोस्तन्त्रेणाङ्गयोः प्र-
सङ्गेनेतिलिखनं तत्प्रकृतपरतयैवनेयमितिकक् ॥०॥
देयंपितॄणां श्राद्धंवै अशौचं जायतेयदि । अशौचे-
तुव्यतीते वैतेषांश्राद्धंविधीयते ॥ अत्राशौचं पुरु-
षप्रयत्नानपनेयम् । तदपनेयस्यतुश्राद्धार्हंविहित-
शौचादेवापगमात् तत्राशौचनिवर्त्तनीयत्वेसतिक्ष-
याह निरूप्यत्वमेवतन्त्वम् तथाचजननमरणरजो-
योगाद्यत्ययेविहितमुहूर्त्तेश्राद्धं कार्य्यमतएव नि-
षिद्धमुहूर्त्तेक्षतादृशभावेविहितमुहूर्त्तालाभेऽग्रिमदिने
तत्कार्य्यन्तत्रापिकुत्रदिने इत्यपेक्षायांसएवाह ।
शुचीभूतेनदातव्यंयातिथिः प्रतिपद्यते सातिथिस्त-
त्रकर्त्तव्यानत्वन्यावैकदाचन ॥ एवञ्चसएवमासः
सएवपक्षः सैवातिथिः प्रधानत एवोल्लेख्यायाति-
थिः प्रतिपद्यत इत्यादिद्वन्द्ववलात् ॥ श्राद्धे प्रतिव-
न्धकाऽशौचव्यपगम इत्यपिनिवेश्यम् अशौचेतु-
व्यतीत इतिस्मरणात् तदित्यमत्रप्रयोगः ओम-
द्यामुकेमास्य मुकेपक्षेऽमुकतिथौक्षयाहश्राद्ध प्र-
तिवन्धकाशौचव्यपगमेऽमुकगोत्रस्य पितुरमुकश-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्म्मणः साम्वत्सरिककोद्दिष्टश्राद्धमहं करिष्यइ-
ति ॥ साम्प्रदायिकास्तु । ओमद्यवैशाखशुक्लदश-
म्यान्तिथावित्याद्युल्लिख्यप्रयोगमाहुस्तच्चिन्त्यम् ।
मासपक्षतिथीनामितिद्वन्द्वविरोधात् तिथाविस्य-
स्यवैयर्थ्याच्च अत्र सपिण्डीकरणा दूर्द्धं यत्किञ्चि-
च्छ्राद्धिकम्भवेत् ॥ इष्टं वाप्यथवापूर्त्तं तन्नकुर्य्या-
न्मलिम्लुचे ॥ इत्यसंकुचितनिषेधवलात् ॥ अशा-
द्यशौचापगमेपिमलमासेवार्षिकश्राद्धं नकार्य्यमि-
ति प्राच्यास्तन्नसाधु ॰ प्रतिसम्वत्सरश्राद्धमशौ-
चात्पतितञ्चयत् । मलमासेपितत्कार्य्यमिति भा-
गुरिरब्रवीदितिवचनस्य प्रामाण्यसंशयेपि दैवेपि-
तृणां श्राद्धेवैअशौचं जायतेयदि । अशौचेतुव्य-
तीतेवैतेषांश्राद्धं विधीयतइत्यनेनाशौचान्ततत्क-
रणेप्रशक्ते शुचीभूतेनदातव्यं यातिथिःप्रतिपद्यते-
सातिथिस्तस्यकर्त्तव्यानत्वन्यावैकदाचनेत्येनतत्ति-
थावेवतत्कर्त्तव्यत्वावगमात् ॥ तथाचान्तयाधि-
मासवन्नियमवलादेव सामान्यनिषेधेसंकोच ए-
वेतितत्वम् ॥ अमावास्यायांपरपक्षमृतस्यसाम्व-
त्सरिकश्राद्धमशौचान्ते क्रियमाणमप्यावाहनादि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मदेवकार्य्यम् ॥ अमावास्यां क्षयो यस्य प्रेतपक्षेऽथवापुनरिति वाक्यलिङ्गात् ॥ क्षयाहनिमित्तकश्राद्धएव पार्व्वणेतिकर्त्तव्यताकत्वविधानात्तदधिकरणकत्वस्याप्रयोजनकत्वेनहेयत्वात् ॥ किञ्चयाहशं श्राद्धमशौचादिप्रतिरुद्धं तादृगेवाऽशौचांते कृष्यशृङ्गवचनेन प्रतिप्रसूयतइति ॥ ० ॥ यत्रैकस्मिन्दिनेक्षयाहनिमित्तकंश्राद्धमशौचादिप्रतिरुद्धंच श्राद्धान्तरं कर्त्तव्यत्वेनापतति तत्रप्रथमंक्षयाहनिमित्तकं श्राद्धमाचरणीयं तदनन्तरं श्राद्धान्तरमागन्तूनामन्तेनिवेशादिति ॥ बहूनामागन्तूनांसन्निपाते तेषामुपस्थितिक्रमेणैव एकोद्दिष्टं तुसम्प्राप्ते नवेपर्य्युषितेतथा पितुः प्रथमतः कुर्य्यादन्यस्यासन्तियोगतइति छत्रेशुक्लग्रन्थे निर्णयामृतेचदृश्यते ॥ एवञ्चएकाहमृतयोः पित्रोरशौचान्तद्वितीयदिनेपितुः शय्यादानमारभ्याद्यश्राद्धपर्य्यन्तं सकलंकर्म्मंसमाप्य मातुरपिशय्यादानादिपूर्व्वकं श्राद्धपर्य्यन्तं सकलं कर्म्मंक्रियतइति साम्प्रदायिकाः ॥ युक्तं चैतत् द्वयोरधिकारस्यतुल्यत्वेपिमातृसपिण्डनप्रयोजकतयाप्रथमं पितुरेवविसर्ज्जनंनी-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यत्वात् ॥ नचैवंदानं निष्फलतामेतीतिवचनवि-
रोधः ॥ प्रकृतेदानस्यनिरवकाशत्वात् ॥ कार्त्ति-
क्यामपूर्व्वदानवत् नचैवं मलमासवच्छय्यादानादि-
वाध एवास्तुनिषेधविधेः सावकाशविषयत्वात् ॥
अन्यथाश्राद्धादीप्यमानस्यापिवाधापत्तेः सङ्कसु-
कास्तुपितुः शय्यादानादिवृषोत्सर्गान्तं कर्म्मसमा-
प्यमातुः शय्यादानादिवृषोत्सर्गान्तं कर्म्मसम्पा-
द्यपितुरेकादशाहश्राद्धं ततोमातुरितिक्रममादिश-
न्तितत्र च श्राद्धपूर्व्वदत्तायाः शय्यायाःश्राद्धोत्तर-
विनियोगदर्शकेनमुहूर्त्तन्तत्र विस्मृत्यनिवापस्थान-
मागत इतिवोधितानन्तर्य्यभङ्गव्यवायापत्तेरिति॰
अपरेतुपदार्थानुसमयवत्प्रत्येकदानमुभयत्रततः श्रा
द्धद्वयाचरणमिति वदन्ति तदयुक्तन्नैकस्मिन् कर्म्म-
णिवितते तदसमाप्यकर्म्मान्तराचरणमिति ॥ सा-
ग्निभ्यामौरसक्षेत्रजाभ्यां मृताहेपितुस्त्रपिण्डकं स-
विश्वदेवकं पार्व्वणमेवकार्य्यमितरैस्तुदशभिरपिपु-
त्रैः साग्निभिरनग्निभिरपितत्रैकोद्दिष्टमेवकार्य्यम्
यत्रयत्रप्रदातव्यं सपिण्डीकरणात्परम् ॥ पार्व्वणे-
नविधानेन देयमग्निमतासदेतिमत्स्यपुराणात् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

औरसक्षेत्रजौपुत्रौ विधिनापार्व्वणेनतु ॥ प्रत्यब्द-
मितरेकुर्य्युरेकोद्दिष्टंसुतादशेतिजाबालिवचनाच्च ॥
चण्डेश्वरस्तुसाग्निनिरग्निभ्यां मृताहेपार्व्वणविधि-
नैकोद्दिष्टमेवकार्य्यम् । विधिनापार्व्वणेनत्वितिश्रु-
तेः प्रधानस्यातिदेशासम्भवात् । अन्यथातादा-
त्म्यादतिदेशानुपपत्तिः । अपुत्रस्यतुसर्व्वस्यैवस्त्री-
पुंससाधारणस्यसाग्निनानिरग्निनावाऽविकृतमेको-
द्दिष्टंश्राद्धंकार्यं अपुत्रायेमृताः केचित् स्त्रियोवापु-
रुषाश्चये तेषामपिचदेयंस्यादेकोद्दिष्टं नपार्वणमि-
तिवचनादित्याह तदेतच्चिन्त्यं औरसक्षेत्रजौपुत्रौ-
विधिनापार्वणेनतु इत्युक्तवचनेनौरसक्षेत्रजातिरि-
क्तानामेकोद्दिष्टविधानसामर्थ्यादौरसक्षेत्रजयोरर्थात्
त्रिदैवतमेवश्राद्धंपर्य्यवस्यति नचाविकृतमात्रवि-
धिरयं तात्पर्य्यगौरवात् शंखः सपिण्डीकरणादूर्ध्वं
यत्रयत्रप्रदीयतेतत्रतत्रत्रयं कूर्य्याद्वर्ज्जयित्वामृता-
हनि । अमावास्याक्षयोयस्यप्रेतपक्षेथवापुनः सपि-
ण्डीकरणादूद्र्ध्वं तस्योक्तः पार्वणोविधिः ॥ अत्र-
प्रथमवाक्येनपित्रादित्रिकश्राद्धं सपिण्डीकरणोत्तरं
विधायस एवमृताहनीत्यनेनमृताहेनिरग्निकर्तृकेप्र-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिषिद्धरते तद्देवापरपक्षमृतस्य द्वितीयवाक्ये प्रतिप्रसूयते अतएवामावास्यादौ स्त्रीमरणेऽपि न तस्याः पार्वणविधिना श्राद्धं तत्र प्रथमवाक्येनात्रिकश्राद्धस्याविहिततया प्रतिप्रसवासंभवात् एवं चामावास्यापरपक्षमृतस्यापि पितुः पुत्रेणात्रिपार्वणैकमेव श्राद्धमाचरणीयमन्यस्याविकृतमेकोद्दिष्टमिति प्रांचः॥ तन्त्रिन्स्यं तत्र तस्येत्येकवचननिर्देशादेकदैवतमेव श्राद्धमतएव पितुरन्यस्याः स्त्रियाः पुरुषस्य वा तदानींस्मरणे आवाहनादिपार्वणेतिकर्त्तव्यतया सवैश्वदेवमेकोद्दिष्टमेव कार्य्यम् क्षयोयस्येतिवाक्यलिंगात्॥ न चात्र पुंल्लिंगनिर्देशात् स्त्रीणामविकृतमेकोद्दिष्टं स्यादितिप्रथमवचनस्योद्देश्यमात्राकांक्षाप्रवृत्तत्वेन युवानइतिवत् लिंगविशेषतात्पर्य्याभावाच्च किंच पार्वणोविधिरित्यत्र पार्वणेतिकर्त्तव्यतैवातिदिश्यते पुरुषांतरश्राद्धं तु प्रधानमित्यतस्तन्नातिदिश्यते प्रधानस्य चाप्यनतिदेशात् एकवचनानुपपत्तेश्च अतएव मृतस्येत्यनुवृत्तौ स्मृतिः अमावास्यायां प्रेतपक्षे पितुः कुर्वीत पार्वणं पितृव्यभ्रातृमातृणामेकोद्दिष्टं न पार्वणमिति प्रेतपक्षेऽमावास्यायां वा मृतस्य पितृव्यादेरपि न

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पार्वणविधिनाश्राद्धमितिशत्रुघ्नोपाध्यायाः पार्वण-
प्रतिप्रसवत्वेऽपास्ते स्त्रियास्त्रियैचावाहनादिमद्दे-
वकार्य्यमतएवामावास्यादिमृतपतिश्राद्धमेवमेवेति
प्रतिहस्तकाअप्याहुः अन्यथात्वेतद्वचनस्यपार्वण-
प्रतिप्रसवार्थकत्वेऽपुत्रमृतस्यपार्वणानर्हत्वेप्रतिप्र-
सवाभावादविकृतमेकोद्दिष्टं स्यादिति साग्न्यौरस
क्षेत्रजकर्तृकेक्षयाहश्राद्धंपार्वणस्यतदतिरिक्तसाग्निनि
रग्निकर्तृकेपित्रिपिण्डकमेव श्राद्धमितितदसत् व-
र्ज्जयित्वामृताहनीत्यनेनप्रतिप्रसवस्यकण्ठतएवोक्त
त्वात् वस्तुतस्तु एककर्तृकत्वेपिप्रथमोविधिर्निषे
धावेवववर्ज्जयित्वामृताहनीतिश्रुतेः तृतीयस्तुस्वतंत्रो
विधिरेव प्रतिप्रसवार्थकत्वेसपिण्डीकरणादूर्द्ध्वमि
त्यस्यवैयर्थ्यापत्तेः प्रथमवाक्येनैव सपिण्डीकरणादू
र्द्ध्वमित्यादिनातदर्थस्यकण्ठतएवोक्तत्वात् तथाच
यस्ययस्येतिसमभिव्याहारबलादुद्देश्यमात्राकांक्षाप्र
वृत्तत्वेनलिंगाविशेषेतात्पर्य्याभावाद्युवानइतिवत् प्र
धानस्यातिदेशासंभवात् तादात्म्यातिदेशानुपपत्तेः
स्त्रियास्त्रियैचावाहनादिमद्दैवैकोद्दिष्टं कार्य्यमितिव
ज्रलेपायितं ॥ भ्रान्तास्तु स्त्रिया अपुत्रपुंसोपिचापर-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पक्षमृतस्याविकृतमेकोद्दिष्टं नतुपार्वणेतिकर्त्तव्यता कं ॥ अपुत्रायेमृताः केचित् स्त्रियोवापुरुषाश्चये तेषामपिचदेयं स्यादेकोद्दिष्टं नपार्वणमिति सामान्यनिषेधात् किन्तु सपिण्डीकरणादूर्द्ध्वन्तस्योक्तः पार्वणोविधिरितिशंखवाक्ये विधिनिषेधप्रतिप्रसवानामेकविषयत्वेनसुतरामितिवदन्ति एवमेकविषयत्वेन सपिण्डीकरणादूर्द्ध्वमित्यस्यवैयर्थ्यापत्तेः एककर्तृकत्वेनप्रथमतएवतस्यप्राप्तत्वात् तेनतृतीयः स्वतंत्रोविधिरेव तथाच स्वतंत्रविधिवलादपुत्रस्यपुंसःस्त्रियाश्चपार्वणेतिकर्त्तव्यताकं वैश्वदेवपूर्वकमेकोद्दिष्टं निरपवादमिति० अतएव सामान्यनिषेधोपिभिन्नविषय एव सामान्यविशेषन्यायात् वस्तुतस्तुतस्यपार्वणनिषेधकत्वेनैकोद्दिष्टविधायकत्वेन चास्यत्वदुक्तशंकापिनास्तीतिदिक् ॥ अशौचान्ताद्द्वितीयेह्नि इत्यत्रप्रकृतिशावाशौचान्तपरतैव तेन-जननाशौचांतेरजोयोगाशौचान्तेव्याधिकरणाशौचान्तेवानातिप्रसंगः । अतएव खंडाशौचान्तेपितद्वानं अत्रचाद्वितीयत्वमविवक्षितं पक्षप्राप्तंवानूद्यते शौचस्यैवाधिकारार्थमपेक्षितत्वेनतन्मात्रस्यैव वक्तव्य-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वात् अन्यथानियमादृष्टकल्पनापत्तेरतएवसद्यः शौचेपिविहितमुहूर्त्तलाभेशय्यादिदानंश्राद्धंचेतियुज्यते शुद्धयुत्तरविहितमुहूर्त्तकर्त्तव्यतायास्तत्राप्यक्षतेः तत्राशौचाव्यपगम इत्येवप्रयोगः कार्य्यःअशौचव्यपगमइति विष्णुसूत्रात् अत्राननुगमस्यादोषत्वादिति ॥ कस्यांचित्तिथौप्रमितस्यसाचतुर्थी यदिमध्याह्नं प्याप्यतेतदातस्यामेवत्रिपक्षे सपिण्डीकरणंनिष्पत्यूहमेव मासिकानिसर्वाणितद्दिन एव ततःप्राकृतदन्तापकर्षन्यायात्तत्रनप्रयाणतिथिनियमो हेत्वभावात् एषएवत्रिपक्षार्थः नतुमासत्रिपक्षादौसंख्याग्रहः तिथ्यावृत्तिग्रहइति सुव्यक्तमेव एवमेवषण्मासादिसपिण्डनेपीति ॥ संवत्सराभ्यंतरेयद्यधिमासपातोभवेत्तदामासिकार्थंदिनमेकंवर्द्धयेदिति विष्णुसूत्रेसंवत्सरपदस्यैकादशमासपरत्वे आश्विनशुक्लप्रतिपन्मृतस्याग्रिमभाद्रस्यमलमासत्वे कृष्णादिभाद्रामावास्यायामेकादशमासाः पूर्य्यन्ते शुक्लादिस्तुसकलएव भाद्रोमलमासीभवति तथाचतत्रैकादशमासपर्य्यन्तं नकुत्रापिमलमासः प्रविष्टः तेनतस्यांद्वितीयभाद्रशुक्लप्रतिपदिशेषमा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिकं सपिण्डनं सांवत्सरिकंचस्यात् तथाच तत्र-
मरणमासोल्लेखासंगत्तिः नहिकयापिरीत्याआश्वि-
नशुक्लपक्षोभवति तन्मोल्लेखानुरोधेनैकादशमासा-
भ्यन्तर इत्यस्यैकादशमासिककालाभ्यन्तरइति वि
वक्षयोल्लेखः संगच्छते एवंचक्वचिद्द्वादशोमासोम-
लमासोभवतीत्यत्रद्वादशमासात्ययेमलमासोभवती
त्येवार्थः अन्यथा प्रकृतविरोधः स्यात्ः अतए-
व संवत्सरातिरेकोवैमासश्चैवत्रयोदशः तस्मात्
त्रयोदशेश्राद्धंनदद्यान्नोपतिष्ठते इतित्र्यृष्यशृंगोपि-
कंठतएवद्वादशमासात्ययेमलमासपातेश्राद्धाभावं-
ब्रूते० एवञ्च असंक्रान्तेपिकर्त्तव्यमाब्दिकंप्रथमंबु-
धैरित्यत्रापिद्वादशमासात्ययेत्रयोदशेमासिमलमा-
सपाते शेषमासिकंसपिण्डनं सांवत्सरिकंचेत्येवा-
र्थइतिदिक् मलमासवत्यपित्र्यैडनवार्षिकानन्तरं-
द्वादशमासिकाचरणं ननुद्वादशमासाः संवत्सरः त-
तोदशमासाः संवत्सरइतिश्रुतेः। यथात्रयोदशन्तु-
श्रुतिराह मासश्चतुर्द्दशः क्वापिनदृष्टपूर्वः एकत्रमा-
सद्वितयंयदिस्यादब्दे।धिकंतत्रपरोधिमासइति स्मृ-
त्यंतरेतद्वर्षस्यत्रयोदशमासात्मकतयाद्वादशमासि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कानन्तरमेवानब्दिकाचरणं न्यूनाः संवत्सरश्चेति वचनादितिचेन्न षट्त्रिंशत्तुदिवसैर्मासः कथितोबादरायणैरितिवचनात् द्वादशैवसमाख्यातामासाः संक्रान्तिकल्पना इत्यादेश्च तत्रापिवर्षस्यद्वादशमासात्मकत्वेसिद्धे श्रुतेःस्मृतेर्वाईदृशोमासोभवतीत्यत्रैवतात्पर्य्यात् हन्तैवं मासिकेपि त्रिंसत्तिथ्यात्मकस्यैव मासस्योपादानाद्वर्षस्यापितन्मासघटिततयात्रयोदशमासात्मकत्वं वर्षस्यगणनासिद्धमितिचेत् एतावतापिविष्णुसूत्रानुसारेण संवत् सराभ्यन्तरेमलमासपाते तथागणनयाशेषमासिकाचरणं सपिण्डनंवासिद्ध्यतु नतु वर्षस्यापित्रयोदशमासात्मकत्वं संवत्सराभ्यन्तरइति विष्णुसूत्रविरोधात् संवत्सरातिरेकोवैमासश्चैवत्रयोदशइतिवाक्यं सकलैकवाक्यतयां्यत्याधिमासपक्षेत्रयोदशमासिकनिषेधेनत्रयोदशमासस्यसंवत्सरबाह्यभूतत्वेन संवत्सराभ्यन्तरइतिसूत्रस्याविवक्षिताविवेकेन एकादशमासिकादिनाभ्यन्तरे मलमासपातेसप्तदशश्राद्धबोधकेन एकादशमासाभ्यन्तर इत्यर्थकेनोभयत्रापि त्वदुक्तशंकानवतारात् । प्रतिमासिककरणपक्षे ए-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

काहोनेत्विवत्यादिबोधितस्थानिकक्रमानुरोधेनद्वा-दशमासिकाचरणमितिध्रुवम् अतएवत्रयोदशेमा-सिपूर्णेशेषमासिकं सपिण्डीकरणं वार्षिकञ्चतद्वर्ष-स्यत्रयोदशमात्माकत्वादिति सर्व्वंसिद्धम्॥ सम्वत्स-राभ्यन्तरे यद्यधिमासपातोभवेदिति विष्णुसूत्रेमा-सिकविशिष्टदिनविधौविधेयगौरवं मासिकमात्र-विधौलाघवम् । किञ्च । द्वादशाहेनवापूज्याः । त-थानार्थवद्द्वादशाहं कृत्वेत्युभयत्रत्रयोदशेह्नि द्वाद-शेह्नि इत्यत्रसर्व्वत्रशंकोचापत्तेरिति ॥ प्रत्युत्तराम-रणसजातीयतिथौ मासिकद्वयमिति द्वितीयःकल्पः। अपर्य्यांप्रावृत्तं प्रतीतिमरीचिवचनात् तेनषष्ठमा-सिकाचरणात् प्राक्तद्दिनएवपञ्चमासिकं ततउन-षाण्मासिकंततः षष्ठमासिकं तदाद्युत्कर्षन्याया-द्वीप्सावलाच्चेतिपरमगुरवः ॥ अन्येतु एकाहोने-त्विवत्यादिवाक्यवलादूनषाण् मासिकस्यैकाहोनषा-ण्मासिककर्त्तव्यत्वेसिद्धे पञ्चमस्यैवापकर्षेणोनषाण् मासिकात्प्रागेवतद्दिनेऽनुष्ठानं मासिकेतदन्तानुरो-धेनापकर्षस्यक्लृप्तत्वात् नतुवीप्सावाधोदोषाय-अनन्यगतिकत्वादित्याहुः ॥ परेतुवीप्सावलात्क-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्साबाधोदोषायानन्यगतिकत्वादित्याहुः परेतु वी-प्साबलात्क्रमभंगएव तेनपञ्चमात् प्रागेवोनषाण्मासिकाचरणं वचनयोरवाव्यत्वादित्याहुः । तदुभयमपिचिन्त्यम् । एकाहोनेत्वित्यादिवाक्यस्यदशाहादिसपिण्डनानुरोधेनप्रतिमासि मासिकविषयतायाः सर्व्वैरेववक्तव्यत्वात् तेनावश्यसंकोचोलाघवात् प्रत्युत्तरकल्पेसंकोचोऽस्तुप्रवृत्तेरवैषम्याच्चमतुवीप्साभंगःक्रमभंगोवा सर्व्वथैवाक्लृप्तत्वादिति ॥ सच्छूद्रेणतुत्रयोदशदिनेआद्यश्राद्धंकार्य्यंतदुत्तरदिनेमासिकंसपिण्डनंच । दिनेत्रयोदशेप्राप्ते पाकेनभोजयेद्द्विजान् । अयंविधिः प्रयोक्तव्यः शूद्राणांमंत्रवर्ज्जितइत्याद्यश्राद्धप्रकरणेवराहपुराणात् उत्तरदिनस्यस्वजात्युक्ताशौचान्तत्वादिति ॥ ० ॥ कृत्स्नेनाप्यन्त्यजन्मनइत्यत्रयोगशक्त्यैवान्त्यजन्मपदंत्रैवर्णिकापेक्षयाचरमजातशूद्रादिपरमतः शंकरजातीयानामप्यधिकारोनिराबाधएव अतएवान्त्यजन्मस्त्रीणामनधिकारोलिंगस्यविवक्षितत्वादन्यथाअमंत्राहिस्त्रियोमताइत्यत्रापिसंकोचापत्तेरिति ॥ ० ॥ मत्स्यपुराणे चरणानिमुखंपुच्छंयस्यश्वे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तानिगोपतेः लाक्षारससवर्णश्चतनीलमितिनिर्द्दिशेत् ॥ वृषएवसमोक्तव्योनैवधार्य्योगृहेभवेत् तदर्थमेषाचरतिलोकेगाथा पुरातनी ॥ गौरींवाप्युद्वहेत्कन्यां नीलंवावृषमुत्सृजेत् । एवंवृषंलक्षणसन्नियुक्तं गृहोद्भवं क्रीतमथापिराजन् । मुक्त्वानुशोचेन्मरणंमहात्मामोक्षेगतिंचाहमितोभिधास्ये ॥ चरणानीतिचत्वारिचरणानिमुखंपुच्छं यस्यश्वेतानिशरीरंलाक्षारसवर्णं सनीलोवृषोगृहेनधार्य्यः किन्तुमोक्तव्यएव एवकारोभिन्नक्रमः गृहोद्भवंक्रीतमथेत्यभिधानात् अस्यैवोत्सर्गेमोक्षःफलन्नतुवृषान्तरस्यइममेवोपक्रम्यएवंवृषंलक्षणसन्नियुक्तं इत्यनुपदमेवाभिधानात् एवञ्चद्वैतनिर्णयफक्किकायां मोक्षश्चनीलवृषोत्सर्गेतत्तल्लक्षणवृषोत्सर्गेवेत्यत्रमोक्षःफलमितियोजनाचकारोऽवधारणार्थः अव्ययानामनेकार्थत्वान्नतुविभिद्य मत्स्यपुराणविरोधात् स्वकथितविरोधाच्च ॥ वृषोत्सर्गेकातीयकल्पेहोतृदक्षिणानश्रूयते तथापिहोतुर्व्वस्त्रयुगन्दद्यात् सुवर्णंकांस्यमेव चेतिविष्णुस्मृतौकण्वशाखायांदर्शनात् सैवकातीयकल्पेप्यन्वेति सर्व्वशाखाप्रत्ययं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कर्म्मेति न्यायात् अतएव वृषोत्सर्गे यजमानएवहोतेतिपाश्चात्यमतमपास्तम् तथासतिश्रुतदक्षिणावाधापत्तेः किञ्चशूद्रस्यापियजमानत्वोपदेशात् नचैवंत्रैवर्णिकेयजमानेदक्षिणावाधोऽस्तुशूद्रेयजमाने दक्षिणान्वयइति वाच्यम् होतुर्व्वस्त्रयुगदद्यात् सुवर्णंकांस्यमेव चेत्यत्रहोतृपदेनिर्व्वीजलक्षणापत्तेः अथप्रधानं स्वामीफलयोगात् गुणेप्रतिनिधिः परार्थत्वादितिपरिभाषावलात् अस्तुयजमानएवहोतेति॥ प्रधानं प्रधानकर्म्माणिस्वामीअधिकारीफलयोगात् फलसम्वन्धादिति तदर्थादिति भ्रान्तोऽसि । गुणेपरार्थत्वादिति परिभाषाशेषाद्गुणेहोमादौप्रतिनिधिऋत्विगादिः परार्थत्वात् होमस्यदेवतार्थत्वादिति । एतच्चकर्म्म कार्त्तिकीचैत्र्याश्वयुजीषुकार्य्यमिति एतच्चतुष्टयं प्रथमाब्दातिरिक्तमिहग्राह्यम् प्रथमवर्षेतथैवकाम्यं यत्कर्म्मवत्सरात्प्रथमाहते इत्यनेननिषेधात् ॥ अथवृषोत्सर्गोयज्ञेनव्याख्यातः ॥ कार्त्तिक्यांपौर्णमास्यांरेवत्यांवाश्वयुजस्यमध्येगवांस्वसमिद्धमाग्निं कृत्वेतिकात्यायनसूत्रात् रेवत्यामाश्वयुजमध्यइत्यत्र सामानाधिकर-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ण्ये नान्वयेतिसूषुत्रितयमित्येवार्थइतिदिक् ॥ अथचैत्र्यांवृषोत्सर्गःकार्त्तिक्यांवाप्रयत्नतः । कर्त्तव्यस्त्वथरेवत्यांत्रिभिर्व्वर्णैर्द्विजातिभिरितिवचनात् केवलायाअपिरेवत्यास्तत्कालत्वसिद्धेरितिचेन्न तद्वचनैकमूलकतानुरोधेनसामानाधिकरण्ये नान्वयस्यशास्त्रार्थत्वात् ॥ अथवृषविशेषोपदेशादन्यथानुपपत्याशूद्रस्याविद्वत्वेपिरथकारवदधिकारः कल्प्यतेनतुतद्वदेवसकलाङ्गानुष्ठानकल्पनापिविध्यभावेननिजांगकरणविषयकापूर्व्वविधानात् वृषोत्सर्गंकुर्व्वीतेतिविधेरविद्वत्वेनस्वर्गकामोयजेतेतिवत् शूद्रादौशंकोचात् कल्पितविधेरननुभावकत्वात् लाघवेनकृतिसाध्येष्टसाधनताज्ञानस्यैवप्रवर्त्तकत्वाभ्युपगमेनतस्यचार्थवादादेवसम्भवात् विध्यभावस्यचाकिञ्चित्करत्वात् ॥ तस्मात् स्वपूजनमधिकारवलात् संध्यामुपासीतेतिवत् कर्म्मानुष्ठानव्वलुसकलांगानुष्ठानम् एवञ्चशूद्रेणापित्रैवर्णिकवदङ्गीभूतसकलमन्त्रसहितएववृषोत्सर्गः कर्त्तव्यइति तु तरङ्गिणीलिखनम् सुगतिसोपानानुसारेणस्वकथित विरोधात् स्वव्यवहारविरोधाच्चेति ॥ सो-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पानक्तताहिप्राभाकरास्तेषां सर्व्वशक्त्यधिकरणवि-
रोधेन तिर्य्यगधिकरणविरोधेनच तथालिखनमि-
तिन किञ्चिदनुपपन्नम् ॥ ननुवृषोत्सर्गेरात्रिसत्र-
यदार्थवादिकफलकामस्याधिकारितयातत्संदृष्टद-
म्यतिपूजासुतदधिकारित्वमेवकल्प्यतेलाघवात् त
थाच क्वास्यप्रधानत्वमिति वाच्यम् तदर्थवादस्य-
विधयसमभिव्याहृतत्वेन तदानीन्नियतापस्थितो-
प्रमाणाभावात् नचक्त्वाःश्रुतिवलादंगत्वंक्त्वाश्रुते-
स्तत्रासामर्थ्यात् किन्त्वनुष्ठानैक्यात् पूर्व्वकाल-
तामात्रमिहतदर्थः । क्वतर्हिक्त्वावरुद्धस्याङ्गतावग-
तिः यत्रविधिसमभिव्याहृतफलावरुद्धोपस्थितिरि-
तिगृहाण। एतच्चदंपतिपूजनमेकादशाहेवृषोत्सर्गाक
रणेपिकार्य्यं प्रधानात् तदानीमेतदकरणेवृषोत्सर्गा-
करणन्नतुतदकरणेप्येतदकरणमितिकेचित्तन्न त्क्वा-
वलात् पूर्व्वकालप्रतीतेरधिष्ठानैक्यादुभयोरपिप्राक्
प्रध्वंसावच्छिन्नकालकर्त्तव्यत्वसिद्धेः नचदर्शपौर्णमा
साभ्यामिष्ट्वासोमेनयजेतेत्यत्रव्यभिचारः। तस्यापि-
पक्षसमत्वादिति । तन्मात्रंपरिक्लिष्टंतन्मात्रंयथोप-
करणरहितमितिहारीतवचनाद्यथोक्तकपिलायाअ-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लाभे केवलापिकापिलानदेयेतिवृद्धा स्तांश्चिन्त्यम् कामर्याहिविशेषणासिद्धौ फलासिद्धिरेवतथैवातिर्य्यगधिकरण्याभिधानात् कथंतर्हि प्रेतषोडश्यां श्राद्धिब्राह्मणस्याभावेपिफलसिद्धिः तस्या आवस्यकत्वात् तथैव-सर्वशक्तावभिधानात् परिक्लिष्टमित्यादिनातिर्य्यग-धिकरणविरोधेनताहृशदानस्यैवनिरस्तत्वादिति०॥ स्त्रीशूद्रयोरविद्यत्वेपिअपुत्राशयनंभर्त्तुः पालय-न्तीव्रतेस्थितापत्न्येवदद्यात्तत्पिंडं कृत्स्नमर्थंलभेत-चेत्याद्यनेकवचनात् प्रधानाधिकारे सिद्धे तदंगम-न्त्रान्वयोप्यस्तु प्रधानाधिकारवलात् अधिकृताधिकारादङ्गस्यरथकारवदिति चेन्न शूद्रोमन्त्रवत्कुर्य्या-दनेनविधिनान्नपेतिमत्स्यपुराणात् शूद्रकर्तृकप्रयोगेवैदिकमन्त्रस्यानंगत्वव्यवहारात् अतएवकर्मप्रदीपेएषएवागृहीताग्नेः प्रेतस्यविधिरुच्यते । स्त्रीणामिवाग्निदानंस्यादितिकात्यायनेनापिहृष्टान्ततयो-पात्तं तत्रस्त्रीणामेवेति अस्मात्वमभिजातोसित्वदयं जायतांपुनः । असौस्वर्गायलोकायस्वाहेतिवैदिकेन-दाहमन्त्रेणनिरग्नेः पर्णनरदाहउक्तइति सकलनिब-न्धेषुविवृतम् । स्त्रियोन्नतइत्युपसंहाराद्वैदिकमन्त्र-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परान्निषेधोनतुपौराणिकमन्त्रेपीतितत्त्वम्। अतएव चातुर्व्वर्णेषुसंस्कारएवंभवतीतिवराहपुराणमपिसंगच्छतइतिवदन्ति॥ मत्स्यपुराणम्। शूद्रोप्यमन्त्रवत्कुर्य्यादनेनविधिनान्नृपेति॥ वराहपुराणम्। अयंविधिःप्रयोक्तव्यः शूद्राणाममंत्रवर्ज्जितइति॥ मनुरपि। नास्तिस्त्रीणांक्रियामन्त्रैरितिधर्म्मोव्यवस्थितः॥विष्णुरपिमासिकार्थंवद्द्वादशाहंकृत्वात्रयोदशेऽह्निसपिण्डीकरणंकुर्य्यान्मंत्रवर्ज्जंशूद्राणांद्वादशेऽह्नीतिगौतमोपि॥ अनुज्ञातोऽस्यनमस्कारोमन्त्रइति॥ नरसिंहपुराणम् ब्रह्मक्षत्रविशांचैवमन्त्रवत्स्नानमिष्यते। तुष्णीमेवतुशूद्रस्यसनमस्कारकं स्मृतमिति॥ एवं चनानास्मृतिपुराणपर्य्यालोचनया स्त्रीशूद्रयोः पौराणिकमन्त्रेपिनाधिकारोलाघवादतएव पुराणाधिकारेभविष्यपुराणे,अध्येतव्य न्नचान्येनब्राह्मणं क्षत्रियंविना। श्रोतव्यमिह शूद्रेणनाध्येतव्यंकदाचनेतिप्राच्याः॥ मैथिलास्तुस्त्रीशूद्रयोरविद्वत्त्वेनसर्व्वत्रश्रौतमन्त्रनिषेधएव नतुपौराणिकमन्त्रानिषेधोपिअश्रौतत्वात अतएव शूद्रः सुखमवाप्नुयादितिभारतवचनमपिसंगच्छते। नचश्रवणएव तद-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्वयःशङ्कोचापत्तेः ॥ वस्तुतोभविष्यपुराणंयदिस-
मूलंतदामैथिलानांनिबन्धोपष्टब्धआचारःशरणमि
ति नव्यास्तुभारतसंवादाच्छ्रुतितएवशूद्रस्यदग्धो-
पदेशादविद्वत्त्वेनस्त्रीशूद्रयोर्यागेनधिकाराद्भवि
ष्यपुराणीयवचनस्यामूलकत्वात् सकलनिबन्धा-
नुगृहीताचाराच्चस्त्रीशूद्रयोः पौराणिकमन्त्रेऽधिका
रएवेत्याहुः ॥ अमन्त्रस्यतुशूद्रस्यविप्रामन्त्रेणगृह्ण-
तइत्यत्रामन्त्रस्येतिविशेषणोपादानात् स्त्रीकर्तृके-
पिब्राह्मणैरेवमन्त्रः पठनीयः न्यायसाम्यादितिके-
चित्तन्न शूद्रस्येतिश्रुतेर्वैयर्थ्यापत्तेः । अत्रापिकुत ।
इतिवाक्यशेषात् गन्धादिग्रहणएवमन्त्रान्वयइति
केचित्तन्नअशंकोचात सर्व्वत्रैवतत्पाठस्ययुक्तत्वात्
एतद्वचनमप्याद्यश्राद्धबोधकमेवप्र करणादिति ॥०॥
पूर्णसंवत्सरेषण्मासेत्रिपक्षेवायदहर्व्वावृद्धिरापद्यत
इतिकात्यायनसूत्रात् । तथामुष्यंश्राद्धंमासिमा-
सीतिवचनात् सम्वत्सरान्तेसपिण्डनस्यमुख्यत्व-
मवगम्यतेतेनमुख्यकल्पशक्त स्यनानुकल्पाश्रयणम्
प्रभुः प्रथमकल्पस्ययोनुकल्पेनवर्त्तते । नसाम्परा-
यिकं तस्यदुर्म्मतेर्ज्जायतेफलम् ॥ इतिसामान्यनि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षेधात् किञ्च । प्रेतसंस्कारकर्म्माणिप्रेतश्राद्धानिषोडश । यथाकालन्तुकार्य्याणिनान्यथामुच्यतेहिसः । इत्यादिनिषेधात् ॥ मैथिलानांनियमतोद्वादशाहसपिंडनाचारोभ्रममूलकएवेतिगौडास्तन्मन्दम् । आनंत्यात् कुलधर्म्माणांपुंसांचैवायुषःक्षयात् । अस्थितेश्चशरीरस्यद्वादशाहः प्रशस्यतइतिव्याघ्रवचनेनसर्वापेक्षयातस्यैवप्रशस्तत्वात् । नचपरमगुरुलिखनविरोधः तल्लिखनस्यपक्षापेक्षयावक्तव्यत्वादिति ॥ एतत्सपिण्डीकरणमेकोद्दिष्टंस्त्रियाअपीतियाज्ञवल्क्येनसपिण्डनैकोद्दिष्टयोः पृथगुपादानादेतच्छ्राद्धद्वयंस्त्रियास्त्रियैवकर्त्तव्यमितिगौडास्तन्मन्दम् । द्वितीयेमातृणांप्रथमंश्राद्धमित्यादिवहुविरोधापत्तेः प्रथमेत्वनियमएव । हन्ततर्हिपार्व्वणेतस्याअधिकारः स्यात् नियमाभावादितिचेत् । भ्रान्तोऽसि । एवंहिस्त्रीमात्राधिकारेअपुत्रस्यतुयापुत्रीसापिपिण्डप्रदाभवेत् । इत्यादिनाविशेषविधानानुपपत्तेः ननुतर्हीतएव तस्यास्तत्राधिकारोऽस्त्विति चेन्नदुहितापुत्रवत्कुर्य्यान्मातापित्रोस्तु संस्कृता । अशौचमुदकंपिण्ड मेकोद्दिष्टन्तयोरपीतिविशेषवि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धानपराहतः । किंचपुत्रपौत्रदौहित्राभावेनपार्व्व-णमित्याद्यस्तमत्रविरोधाद्बोतिदिक् ॥ १॥ येसमाना द्दतिद्वाभ्यामेतजूझ्यंसपिण्डनम् । नित्यंनतुल्यंश्रेषंस्यादेकोद्दिष्टंस्त्रियाअपि ॥ अस्यार्थः । नित्य-मस्थावश्यकार्य्यमेकोद्दिष्टंपार्व्वणं चद्वयमेवसपि-ण्डीकरणस्योभयात्मकत्वादिति । प्रेतांशएकोद्दिष्टे-नपितामहाद्यंशपार्व्वणेनतुल्यंशेषमवशिष्टसंगजा-तम् एकोद्दिष्टंस्त्रिया अपीत्यत्रैकोद्दिष्टपदेनैकोद्दि-ष्टयोगात् प्राधान्याद्वासपिण्डीकरणमेवोक्त तच्च-स्त्रियाअपीतिकर्त्तव्यमितिकल्पतरुकारादयः ॥ श्रा द्धविवेकेतुएतत्सपिण्डीकरण मेकोद्दिष्टंस्त्रियाअपी तियाज्ञवल्क्येनसपिण्डीकरणैकोद्दिष्टयोः पृथगुपा-दानात् एतच्छ्राद्धत्रयंस्त्रियास्त्रयैवकर्त्तव्यमितिवि वनम् । तेननैमित्तिकमंगभूतंवावृद्धिश्राद्धंस्त्रियान-कार्य्यम प्रापकाभावादिति । तन्मन्दम् । नियमवि-वक्षायांहेतुत्वाभावात् प्रत्युतअन्वष्टकातथामातृ-श्राद्धंचैवमृताहनि । एकोद्दिष्टंपरित्यज्यत्रिषुनान्य-त्पृथग्भवेत् ॥ अन्वष्टकासुवृद्धौचगयायांचमृताह-नि । मातुःश्राद्धंपृथक् कुर्य्यादन्यत्रपतिनासह ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मातृणांप्रथमंश्राद्धं पितृणांतदनन्तरम् । ततोमाता-
महादीनांवृद्धौश्राद्धत्रयंस्मृतमितिवहुवचनविरोधा-
पत्तेः । अस्तुतर्हीतिएवतत्रविशेषश्रवणादनियमोप्य-
न्यत्रतत्स्यादेववाधकाभावादितिचेत् । भ्रान्तोऽ-
सि । उक्तयुक्त्यानियमोनिरस्तस्तद्विवक्षायांहेत्वभा-
वात् । किंचभार्य्यापिरड पतिर्दद्यात पत्येभार्य्या-
तथैवचेत्याद्यनेकवचनात्तासांश्राद्धाधिकारसिद्धे पा
र्व्वणादौपुत्रपौत्रदौहित्राभावेपार्व्वणं नभवतीत्या
पस्तम्बवचनेनतेषामेवपरतत्राधिकारेतस्याअनधि
कारः कल्प्यते । वृद्धिश्राद्धे तुस्यादेववाधकाभावा-
दतएव पितापितामहोभ्रातासकुल्योजननीतथेत्य-
नेनकन्यादातृत्वेतस्याः सिद्धे तत्तन्महादानेषुसंका-
चाभावादधिकारेचानिष्प्रत्यूहे तन्नैमित्तिकंतदंगभू-
तत्वाद्वृद्धिश्राद्धं कार्य्यमेव कर्म्मण्याभ्युदयिकेमंग-
ल्यवतिशोभनेइत्यनेनवाधितोगाधिकारस्यप्रधाना-
धिकारेणांगाधिकारेवाधकाभावादिति ॥ ० ॥ पू-
र्णसम्वत्सरेषण्मासेइति सूत्रेणसपिण्डनापकर्षेपिन
मासिकापकर्षोयावद्वचनंहिवाचनिकं इतिन्याय-
विरोधादितिजीवनः तदपिहेयम् सपिण्डीकरणा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्ताचज्ञेय।पिण्डक्रियाबुधैरितिवचनेनसपिण्डीकरणस्यचरमत्वेस्थितेमासिकापकर्षस्यवाचनिकत्वम्। किञ्चसपिण्डनापकर्षस्यव्यर्थत्वापत्तेः प्रेतत्वविमुक्तेरजातत्वादिति ॥ ० ॥ मातामहेजीवतिपुत्रिकापुत्रेणमातुः सपिण्डनंमातामह्यादिभिः त्रिभिस्सहकार्य्यम् । मातुः सपिण्डीकरणंपितामह्यासहोदितम् । यथोक्तेनैवकल्पेनपुत्रिकायानचेत् स्वतइत्यभिधानात् मातामहीप्रमातामहीभिः सहेतितद्विवरणात् ॥ मातामहेमृतेमातामहादिभिस्त्रिभिस्सहकार्य्यम् । मातुःसपिण्डीकरणंपितामह्यासहोदितम् पितुः पितामहेतद्वत् पूर्णेसंवत्सरेसुतैः ॥ मातुर्म्मातामहेतद्वदेषाकार्य्यासपिण्डतेतिवचनात् ॥ अत्रतुपितुः पितामहादीनांसपिण्डनकालात्यये असपिण्डितेनापि पित्रापितामहादिनावामातुः पितुर्व्वासपिण्डनंकार्य्यमेव असंस्कृतौनसंस्कार्य्यौपूर्व्वौ पौत्रप्रपौत्रकः पितरंतत्रसंस्कुर्य्यादितिकात्यायनोब्रवीत् ॥ पापिष्ठमपिशुद्धेनशुद्धं पापकृतापिवा । पितामहेनपितरंसंस्कुर्य्यादितिनिश्चयइतिवचनात् । अत्रचपितामहेनपितरमित्यादि सर्व्वमुपलक्ष-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णमेवाकांक्षायाः सर्व्वत्रतुल्यत्वात् पितुः पितामहादीनांसपिंडनाधिकारसत्त्वेचतत्कालसत्त्वेचापितृपितामहमपिण्डनानन्तरमेवसपिंडनंततः प्रभृतिवैप्रेतः पितृसामान्यमिष्यतेविंदतेपितृलोकंचततः श्राद्धंप्रवर्त्ततइत्यस्यसंकोचेहेत्वभावात् ॥ प्राच्यास्तुतेषांसपिण्डनकालसत्त्वेप्यसंस्कृतैरेयतैस्सहपितरं संस्कुयर्रादित्विशेषश्रुतेरितितन्मन्दम् परिशिष्टवचनस्य पितामहादीनामतीतसपिण्डनकालत्वपरत्वादन्यथावाधसापेक्षतापत्तेः अतएवदैवात्पितामहस्यासपिण्डितत्वेसत्यपिसंगच्छते किंचमलमासेशुक्लपक्षे पत्यौकृष्णपक्षेभार्य्यायांमृतायामब्दान्ते विसर्ज्जने प्राप्तेद्वयोर्भार्य्याया आदौविसर्ज्जनंस्यात् एतच्चनपत्युरविसर्ज्जितत्वादित्यादिनिवंधविरोधःस्यात् तन्मतेतस्या अप्यसपिण्डितेनापिभर्त्रासपिण्डनोपपत्तेः नचैवमेवास्तुशिष्टव्यवहारविरोधादिति वस्तुतस्तुवचनयोरसपिण्डितश्राद्धविधायकत्वमगत्यातत्रकल्प्यतेप्रकृतेतुसपिण्डनानंतरमपितत्संभवेवाधसापेक्षतापत्तेरिति अतश्चसपिण्डितानांपितामहादीनां प्रकृतक्रमेणैवोल्लेखः [redacted] तदीयप्रेतकृत्यएव तादृ-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शोल्लं खादिति । भ्रातृपितृव्यादीनांसपिण्डनंतत्पि-
त्रादिभिस्त्रिभिस्तत्पित्रादिपदेनोल्लिख्यकार्य्यम् आ
सिंचेत्प्रेतपात्रेणपितृपात्राणिवस्तुवदितिवचनात् ॥
कृत्रिमपुत्रेणपुत्रत्वकरस्यसपिण्डनं पुत्रत्वकरपित्रा-
दिभिस्त्रिभिरेवकार्य्यम् पुत्रत्वकर्य्यास्तत्पतिश्वशु
रप्रश्वशुरैस्त्रिभिरेवकार्य्यम् सर्व्वत्रचजीवन्तंप-
तितं चातिक्रम्यापरेणत्रिकपूरणंकार्य्यम् पूर्व्वेषामे-
वनिर्वपेदितिवचनात् ब्राह्मणादिहतेतातेपतितेसं-
गवर्जिते । व्युत्क्रमाच्चमृतेदेयंयेभ्यएवददात्यसा-
वितिवचनात यत्रपातित्यादिदूषितः सन्न्यासग्र-
स्तोवाजीवतिवापितातत्रापिमातुः सपिण्डनंपिता-
मह्यादिभिस्तिसृभिरेवकार्य्यम् पितृमातृसत्वेप्र-
माणवदेवकल्पान्तरव्यवच्छेदात् ब्राह्मणादिहतेता-
तेइत्यादिनातत्रापिपितामहैकोपक्रमकस्याद्युप्रवृत्तौ-
फलत्वात्त्रापिप्रतिपादनात् त्रिदण्डानिपितरिमृते-
तेनैवसहमातुः सपिण्डनमपवादकाभावात् दत्तक
स्यतुसपिण्डनेयस्यदत्तकोऽभूत तस्मिन्नसतितेनत-
त्पित्रातत्पितामहेनतत्प्रपितामहेनत्रिकपूरणंकार्य्य-
म् व्यर्पितिददतः स्वधेतिवचनात् ॥ अत्रचतुर्थीहो-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

मातृप्रागेवस्त्रियाः प्रायणेसपिण्डीकरणान्तानित-
स्याः श्राद्धानिपत्यातत्पितृगोत्रेणकार्य्याणिसांवत्स-
रिकाणितुस्वगोत्रेणैव संस्थितायान्तुभार्य्यायांस-
पिण्डीकरणान्तिकम् । पैतृकंभजतेगोत्रमूर्द्ध्वन्तुप-
तिपैतृकमितिश्रुतेः ॥ चतुर्थीहोममन्त्रेणत्वङ्मांस-
रुधिरेन्द्रियैः । भर्त्रासंयुज्यतेनारीतद्गोत्रातेनसा-
भवेदितिवृहस्पतिवचनात् एकगोत्रत्वमायातिस-
पिण्डीकरणेकृते । पत्नीपतिपितृणांचतस्मात्तद्गो
त्रगामिनीतिवचनाच्च एवन्तदानींपतिप्रायणेपि-
त्र्यायतौल्याद्विगोत्रयापिभार्य्ययाश्राद्धानिकार्य्याणी
ति परिणीतायास्त्वक्षतयोनेः स्वेच्छयैवद्वितीयपुं-
सिस्थैर्य्ये सर्व्वाण्यौदकादीनिद्वितीयपतिगोत्रेणैव
कामादक्षतयोनिश्चेदन्यंगत्वाव्यवस्थिता । तस्यान्य-
स्यसगोत्रासायन्त्वाश्रितवतीस्वयमितिवचनात् अ-
क्षतयोनेरेवंवलादन्येनग्रहणेप्रसवपर्य्यन्तं तत्पितृ-
गोत्रेणैवसर्व्वाणिश्राद्धानि द्वितीयेन पत्याकार्य्याणि
प्रसवोत्तरन्तु प्रथमपतिगोत्रेणैव पदेतुसप्तमेयातुव-
लात्काश्चिदूढाभवेत् । स्वामिगोत्रंभवेत्तस्यास्तत्र
भूयोविशिष्यते ॥ पैतृकन्तुप्रसूतायास्ततःपौर्विकभर-

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्तृकमितिवचनात् यावद्वचनंहिवाचनिकमितिन्यायात् । तदपत्यानान्तुजनकगोत्रतैवबाधकाभावादिति॥ परिणीतस्त्रियास्तुचतुर्थीहोममन्त्रेणपतिगोत्रताकृपृथग्गोत्रेजनयितुर्नाहरेद्धत्रिमःसुतः इतिवचनात् पित्रासहमातुः सपिण्डनेक्रियमाणेनपितामहाद्यन्वयः स्वेनभर्त्रासहैवास्याः सपिण्डीकरणं स्मृतमितिविशेषश्रुतेरितिप्राच्याःतन्मन्दम् गन्धोदकतिलैर्युक्तंकुर्यात्पात्रचतुष्टयम् अर्घार्थंपितृपात्रेषुप्रेतपात्रंप्रसेचयेत् येसमानाइतिद्वाभ्यामाद्यन्तुविभजेत्त्रिधा॥ इत्युक्त्वाएतज्ज्ञेयं सपिण्डनमितिवचनानुरोधेनत्रिकश्राद्धस्यवज्रलेपायितत्वात् नचेदंपितृसपिण्डनमात्रपरम् अव्यापकतापत्तेः अतएवापुत्रायांमृतायान्तुपतिः कुर्यात् सपिण्डनम् स्वश्वादिभिः सहैवास्यास्सपिण्डीकरणम्भवेदितिवचनमपिघटते ॥ किंचआदिशेत् प्रथमेपिंडेमातरंपुत्रिकासुतः द्वितीयेपितरंतस्यास्तृतीयेतुपितामहमितिपुत्रिकापुत्रप्रकरणेकंठतएवत्रितयान्वयस्यविहितत्वात्तस्माद्भर्तृपदंत्रिकोपलक्षकमिति ॥ दत्तकस्यतुसपिण्डनेयस्यदत्तकस्तमादायत्रिपुरुषीग्राह्या तस्मिन्जीवतितत्पिता-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋक्थगोत्रानुगः पिण्डोव्यपैतिददतः स्वधेत्यादि-
नानावचनस्वरसात् ॥ दत्तस्याविवाहेत्वस्तुगत्यायः
प्रपितामहादिस्तदानुपूर्व्वीकमेववाक्यं अपवादका-
भावात् किंतुदत्तकस्यगोत्रेणनोल्लेखः ऋक्थगोत्रेज
नयितुर्व्वाहरेद्वृत्रिमः सुतइतिस्मरणात् ॥ निषिद्धन-
क्षत्रेसपिण्डीकरणंनकार्य्यम् निषेधविरोधात् । य-
थाकालन्तुकार्य्याणिनान्यथामुच्यतेहिसइतिवचनाच्च
तथाचागत्यापितुरपिब्रह्मपुराणीयएवकल्पइतितत्व
म् ॥ मैथिलास्तुनिषिद्धनक्षत्रेपि सपिण्डनमाचरंति
तदयुक्तमुक्तयुक्तेरिति पक्षपरिग्रहानंतरंतुनिषिद्धका
लेपितदाचरणमनन्यगतिकत्वादिति ॥ त्र्यहाशौचेतु
चतुर्थदिनेआद्यश्राद्धं । त्रिपक्षादौसपिंडनन्नतुपंच-
मदिनेसद्यःशौचेतुशुद्धिदिनआद्यश्राद्धं त्रिपक्षादौ
सपिण्डनन्न तुशुद्धिदिनद्वितीयदिने एवंक्षताशौचा-
दावपिआनंत्यात्कुलधर्म्माणांपुंसाञ्चैवायुषः क्षया-
त् अस्थिरत्वाच्छरीरस्यद्वादशाहः प्रशस्यतइति-
व्याघ्रवचनस्याजहत्स्वार्थलक्षणयास्वस्वजात्युक्तशा
वाशौचान्ततृतीयाहोपलक्षकत्वादितिसुव्यक्तमेव ॥
सपिण्डीकरणेप्रारब्धेपिंडात्प्रागेवभक्तव्यंजनादौन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ष्टेपिण्डदानविभागसंयोजनादिकंविनैवसपिण्डन-
सिद्धिः अनन्यगतिकत्वात् नचपिण्डोऽनुपपद्यमानः
पाकंप्रयोजयत्विति वाच्यंपिण्डदानस्यांगत्वेनपाका
नुष्ठानाप्रयोजकत्वात् नह्यंगमनुष्ठानप्रयोजकम् अ
तएव वाजिनापचारेवाजिहोमलोपएवेतिसिद्धांतः॥
ननुनिरूप्यचतुरः पिण्डान्पिण्डदः पितृनामतः ये-
समानाइतिद्वाभ्यामाद्यंतद्विभजेत् त्रिधेतिशातात-
पवचनेन तथादत्वापिण्डमथाष्टांगंध्यात्वातंचशु-
भाशुभंसुवर्णरौप्यदर्भैस्तस्मिन्पिण्डन्ततास्त्रिधासुव
र्तुलांस्ततस्तांस्तुकृत्वापिण्डान्प्रपूजयेदिति ब्रह्मां-
डेविशिष्याभिधानात् सांगेफलसिद्धिरितिपिण्डाय-
पुनः पाकइतिचेन्नवाजिहोमेप्येवंकुसृष्टिप्रसंगादि-
ति॥ अर्घार्थंपितृपात्रेषुप्रेतपात्रमासिंचतीतिप्रेतस्य-
चरमोपदेशात् सपिण्डनेपिपितामहादिश्राद्धानन्तरं
प्रेतश्राद्धमितिगौडास्तन्मंदम्।येसमानाइतिद्वाभ्या-
माद्यन्तुविभजेत् त्रिधेति मुख्यंतुपितरंकृत्वेत्यादिव-
चनविरोधात् द्वादशाहिकसपिण्डनेकृतेपयमासि
ककरणानन्तरंक्षतेऽशौचेवाजातेनतावन्मासिकाचर
णं तदानीमधिकारिविशेषणस्याशौचस्याभावात्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

न्तापिक्षतादेः शेषसमापनं ऋष्यशृंगवचनबलादेत
त्कल्पस्यैतद्दिनसपिण्डनघटितस्यतथाप्यनिर्वाहात्
हन्त तर्हि क्षतादौसत्यपितत्सर्वं क्रियतांतत्कल्पस्य-
परिग्रहादितिचेन्न तद्गर्भहेतोः संकल्पस्याकरणात-
यथाकालमितिविशेषश्रवणाच्च ॥ अथप्रतिमासमा-
सिकाचरणउपक्रान्तेद्वितीयमासिकादौक्षतादौजाते-
यथातदन्तेकरणंतथेदमपिक्रियतामितिमैवम् तस्य-
हि क्षतान्तेकरणेऽपिनस्वस्वकालोऽतिक्रामतितत्कल्प-
स्यसंवत्सरनिर्वाह्यत्वा दयं चकल्पोद्वादशाहसमाप्य
एवातएव द्वितीयतृतीयमासिकादेः क्षतान्तेकरणमि
तिमुख्यः कल्पएवेतिप्रांचः ॥ अथद्वादशाहादिकल्पे
क्षतादिदूषितेकल्पान्तरमाश्रीयतामितिचेत् न निरपेक्ष
कसाधनावरुद्धे साधनान्तरान्वयस्यविकल्पंविनाअ
संभवात् अतएवयवारब्धप्रयोगेयवापचारेव्रीहिभि
र्नसमाप्यंतेतेषामर्थतस्त्यक्तत्वात् विकल्पेचोभय-
स्याशास्त्रार्थत्वादिति ॥ शातातपः । नवश्राद्धंग्राम
याचकान्नंसंग्रहभोजनम् । नारीणांप्रथमेगर्भेभुक्त्वा
चांद्रायणंचरेत् ॥ चान्द्रायणंनवश्राद्धे पराकोमासि-
केमतः । मासत्रयेऽतिकृच्छ्रःस्यात् षण्मासेकृच्छ्रएव

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हि ॥ आब्दिकेकृच्छ्र पादःस्यादेकाहः पुनराब्दिके । अतऊर्द्धं नदोषोऽस्तिशंखस्यवचनंयथा ॥ नवश्राद्धं दशाहादिकपिण्डाः । नवश्राद्धंदशाहानीतिवचनात् नवश्राद्धमेकादशाहाभ्यन्तरेश्राद्धचतुष्टयंच ॥ चतुर्थे पंचमेचैवनवमैकादशेतथा । यदत्रदीयतेजन्तोस्तन्नवश्राद्धमुच्यतइति ॥ इदन्तुचतुष्टयं ब्रह्मपुराणीयकल्पेनवश्राद्धमस्थिसंचयनादर्व्वाक अग्निहोतृकर्तृकं श्राद्धं तथा अस्थिसंचयनादर्व्वागाहिताग्नेर्द्विजन्मनः अयुग्मान्भोजयेद्विप्रांस्तन्नवश्राद्धमुच्यतइति नवश्राद्धमेकादशाहश्राद्धं च चांद्रायणंनवश्राद्धइतितदधिकृत्यैवकथनात् संग्रहेचंद्रसूर्योपरागश्राद्धे गर्भसीमन्तोन्नयनपुंसवनरूपगर्भसंस्कारकेमासिके एकमासपूर्त्तिकश्राद्धे मासत्रये द्वितीयतृतीयचतुर्थमासिकेषुभोजनेप्रत्येकमतिकृच्छ्रः प्रायश्चित्तं षण्मासइति इतः परमासषट्केश्राद्धभोजने प्रत्येकंकृच्छ्रः आब्दिकेद्वादशमासिकेसपिण्डनेचकृच्छ्रपादः एकाहः पुनराब्दिकेभोजनेएकाहोपवासः प्रायश्चित्तम् पुनराब्दिकंतुसपिण्डीकरणोत्तरदिनेयत्काम्यमेकोद्दिष्टन्तदुच्यतेपूर्व्वेद्युराब्दिकं श्राद्धमपरेद्युः पुनराब्दिकमिति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मनुश्चवचनात् एषुएवभोजनेषुश्राद्धेषुशेषान्नभोजनं-
यजमानस्यनिषिद्धं तस्यैवव्रतोच्छिष्टत्वात् एवंचप्र-
थमसाम्वत्सरिकेषुभोजनंशेषान्नभोजनञ्चनिषिद्धंआ
ब्दिकत्वात् मैथिलास्तुतृतीयसाम्वत्सरिकश्राद्धप-
र्य्यन्तंश्राद्धभोजनं शेषान्नभोजनंचनेच्छन्तितत्रनप्र-
माणमुपलभामहेप्रत्युतवस्त्रोपकरणादिविनियोगं-
मिषप्रत्यूहमाचरन्तिप्रथमसांवत्सरिकेपिभक्षणमाच
रन्तीति ॥ ० ॥ सव्रणः सूतकीसूयीमत्तोन्मत्तरज-
स्वलाः मृतवन्धुरशुद्धश्चवर्ज्यान्यष्टौस्वकालतइति-
वचनात् व्रणस्यस्वरूपतएव दूषकत्वमदृष्टोत्पत्तौ-
वीजाभावात् अतएव तद्दिनेनिर्व्रणीभावेश्राद्धाधि-
कारोनिष्प्रत्यूहएव स्वकालतइतिश्रुतेः एवं चतद्दि-
नेऽनधिकारापादकानिवचनानिनिर्मूलान्येवेतिदि -
क् ॥ ० ॥ सावनमासस्तुद्विधा त्रिंशदहोरात्रनिय-
तः त्रिंशत्तिथ्यात्मकश्च त्रिंशद्दिवसस्तुसावनोमासइ
ति तथाएकातिथिः कापितद्दादिभूतातिथिस्तृतीयं-
ति तिथिप्रवन्धइतिग्राहकयोरविशेषात् एवंचान्य-
दपिसावनमासप्रतिरूपकमेवेतिनिर्णयलिखनमेकदे-
शिमतानुसारेणस्वलिखनविरोधादेव यत्तुएकाति-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

थिः कापीत्यादिशक्तिग्राहकाद्दशम्यांपूर्व्वावधिभूतांतार्तीयीकदशम्यांसावनमासोभवतीतिगौडास्तन्मन्दम् द्वितीयएकादश्यां तृतीयस्तुद्वादश्यादित्रतएकादशतिथ्यधिकेनद्वादशमासेवर्षंस्यात् किन्नश्छिन्नमितिचेत सांवत्सरिकेक्षयतिथिविहितत्यवाधापत्तेः हन्ततर्हिद्वयात्मकतैवोत्तरतिथेरस्तु उभयथापितदादिपदवैयर्थ्यादिति ॥ नयोषिद्भ्यइत्यादेस्तुगोभिलीयानांवृद्धौगयायांवाकुत्रापिमातृणांश्राद्धन्नेतिगौडाः तत्रचमातृणांप्रथमंश्राद्धंपितॄणांतदनन्तरमित्यादिविरोधात् नचैतानिवचनानिछंदोगेतरपराण्येवएव मुभयत्रसंकोचापत्तेः किंचविशेषविहितातिरिक्तविषयतायाः सर्व्वथैववक्तव्यत्वात् अन्यथानषाण्मासिकेनवार्षिकयोरादश्राद्धस्यवाधापत्तेः एवं चसर्वत्रासंकोचएवरमणीयइति ॥ कृत्रिमपुत्रेणपितृत्वेनैवनिर्द्देशः कर्तव्योनतुमत्पुत्रत्वकरशवदेनदेशनाविरहात् द्वादशविधपुत्रकर्तृकेपिश्राद्धे पितृत्वेनैवरत्नाकरादौ देवतात्वप्रतिपादनात् पितुः पुत्रेणकर्तव्यापिण्डदानोदकक्रियाइत्यत्रपुत्रेणद्वादशविधपुत्रेणेतिविवरणात् ननुचास्यपुत्रत्वे-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पितस्य पितृत्वाभावादेवमिति चेत् न पितृपदल-
क्षणायास्तत्रालौकिकत्वेपिन्याय्यत्वात् किंचतेषां-
षड्बन्धुदायादाः षड्दायादबान्धवाः ॥ पूर्व्वंपूर्व्वः
स्मृतोज्येष्ठोजघन्योयोयउत्तरः क्रमादेतेप्रवर्त्तन्तेमृ-
तेपितरितद्धने ज्यायसोज्यायसोभावेजघन्योयोय-
आप्नुयादितिनारदवाक्यादावलौकिकेपिपितृपदप्र-
योगदर्शनात् तत्रपितृपदाप्रयोगेक्षेत्रजादीनामपि
तत्प्रयोगोनस्यात् लक्षणायास्तुल्यत्वात् स्वज-
न्यपुंस्त्वस्यपुत्रपदशक्यतावच्छेदकस्यावश्यकत्वाद-
न्यथापुत्रप्रतिनिधीनित्यादिविधिविरोधः स्यात् व-
स्तुतस्तुपुन्नामनरकत्राणकर्त्तृपुंस्त्वंशक्यतावच्छेदक-
मिति पितृपदलक्षणायाः सर्व्वथैववक्तव्यत्वादे-
वंचयत्रपितृव्यभ्रात्रादिर्व्वापुत्रः कृतस्तत्रापिपितृत्व
नैवानिर्द्देशोनतुपुत्रभ्रातृत्वादिनाउभयोरपिसाक्षाद्धि
तत्प्रोषितत्वादिति स्त्रीवैधस्नानेस्वपितृमातृणांत-
र्पणमविरुद्धमेवपुरुषषट्कस्त्रीषट्कतर्पणयोर्न्नित्य-
त्वात् पतिश्वशुरादीनांच स्वेच्छयाकाम्यत्वादतएवा
वतारणीप्रकरणेतथैवाचारोपीत्याहुः स्त्रीणामपिवै-
धकर्म्मणिद्विवासस्त्वं तदुक्तं पारिजातहरणपुष्पक-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्रतप्रकरणेहरिवंशेशुक्लमेवसदावासः प्रसस्तंचन्द्रसंभवे । अन्तर्व्वासांपरंचैवउपवासेव्रतेतथानराणामथनारीणामंशुकद्वयमिष्यते दैवेकर्म्मणिपित्र्यंचद्विवासस्त्वंप्रकीर्त्तितंअत्रनरपदं शूद्रपरंस्त्रीशूद्राणांद्विवस्त्रतामात्रनतत्रपसव्यकरणं तथैवछंदोगदारकृत्येप्रतिहस्तकलिखनात् युक्तंचैतत् यस्यैवसव्यविधिस्तस्यैवापसव्यविधानंयथापुरुषे स्त्रीणांसव्यविधिरेवनास्तीतिकुतोपसव्यप्रसंगः नचतुल्यन्यायतयाऽपसव्यविधानंस्यादितिवाच्यं एवंहिमुक्तकक्षत्वादेरभावप्रसंगादितिसांप्रदायिकाः वस्तुतस्तुस्त्रीणामपिस्वधाधिकारेसिद्धे प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणापित्र्यमानिधनात्कार्य्यं विधिवद्दर्भपाणिनेतिपरिभाषाबोधितापसव्यविधेर्बिं प्रत्यूहत्वात् अतएवव्यवहारोप्येवमेवेतितत्वं । स्वधास्थतर्प्पयतमेमत्पुत्रत्वकरीमित्यत्रप्रथमास्मच्छब्दार्थस्यान्यपदार्थेकर्म्मणिद्वितीयास्मच्छब्दार्थस्यच पुत्रत्वलक्षणेधर्म्मेन्वयान्नकदाचिदनुपपत्तिः कृञोहेतुताच्छील्यानुलोम्येष्विवतिसूत्रेणानुलोम्येर्थेटप्रत्ययः टिड्ढाणञित्यादिनाङीप्प्रत्ययइति मत्पुत्रत्वक

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रीसिध्यति एकोद्दिष्टानंतरमेववलिवैश्वदेवकर्मणी-
कार्य्यं निवृत्यप्रणिपत्याथपर्य्युक्ष्याग्निंसमंत्रवित् वै-
श्वदेवंप्रकुर्व्वीतनैत्यिकं पितृकर्मचेतिविशेषश्रुतेः
नित्यश्राद्धकरणेतुतत्प्रागेव वैश्वदेवबलिकर्म ॥ दे-
वभूतपितृब्रह्ममनुष्याणामनुक्रमात् इत्युत्सर्गक्रमवि
धेः षट्पुरुषश्राद्धानन्तरन्तुनित्यश्राद्धंनकार्यमेव ए-
कोद्दिष्टानंतरन्तुकार्य्यमेव नित्यक्रियांपितॄणांचके-
चिदिच्छन्तिसूरयः नपितॄणांतथाचान्येशेषंपूर्ववदा-
चरेदितिव्यवस्थितविकल्पश्रुतेः षट्पुरुषश्राद्धानन्त-
रन्तुनित्यश्राद्धस्यपार्वणेनैवसिद्धिरिति ॥ एकादशा-
हश्राद्धे कृतेसपिण्डनेचाकृतेप्यन्तरानित्यश्राद्धं पार्व-
णंचकर्तव्यमेव परंतुपितरमसपिण्डतमुपेक्ष्यपिताम
हादिकत्रिकंमातामहादित्रिकंचादायापवादकाभावा
त् ॥ वृद्धिश्राद्धं तुसपिण्डीकरणाधिकारिणासपिण्डी-
करणात्पूर्वन्नकार्य्यम् सहपिण्डक्रियांकृत्वाकुर्य्याद-
भ्युदयन्ततः तथैवकार्य्यमितिवचनात् तदनधिकारि-
णातुपुत्रोपनयनादौतदपिकार्य्यमेव सहपिण्डक्रि-
यांकृत्वेतिसमानकर्तृकताप्रतीतेरिति ॥ श्राद्धादौपशु
घातोनदोषाययज्ञार्थेपशवः सृष्टाः स्वयमेवस्वयंभु-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वायज्ञश्चकार्यः सर्वस्यतस्माद्यज्ञेवधोऽवधइतिवचनात् दैक्षपशुमालभेतेतिवत् निन्दावचनानि कामचारविषयाणीतितत्त्वम् । आद्यापूपैस्सदाकार्य्यामांसैरन्यातथाभवेत् शाकैः कार्य्यातृतीयाख्यादेषद्रव्यगतोविधिरित्यत्रअपूपैर्व्रृद्धिकामइतिहारीतवचनादपूपप्रधानद्रव्यत्वेप्रधानयोस्समुच्चयस्यानुक्तत्वेनापूपविधानेनप्रधानान्तरव्यवच्छेदएववाक्यार्थः शाकमांसयोस्तुपाणिभ्यामुपसंगृह्यस्वयमन्नस्यवर्द्धितमित्युपक्रम्यगुणांश्चसूपशाकाद्यान् पयोदधिघृतंमधुविन्यस्यप्रयतः सम्यक्भूमावेवसमाहितः । भक्ष्यंभोज्यंचविविधंमूलानिचफलानिचहृद्यानिचैवमांसानिपानानिसुरभीणिचउपनीयतुतत्सर्वंशनकैस्सुसमाहितः। परिवेषयेच्चप्रयतोगुणान्सर्वान् प्रदर्शयन्नित्यंतेनमनुनैवतयोर्गुणत्वाभिधानात् । गुणप्रधानयोः समुच्चयस्यचशास्त्रार्थत्वादत्रैवकंठतोभिहितत्वात् शाकमांसयोर्गुणत्वेनानयोरयोगव्यवच्छेदएववाक्यार्थइति नचानयोरपि विध्यंतरानुरोधादितिरहस्यम् । श्राद्धेमत्स्यमांसयोरग्निसाधितयोरेव दानंनत्वामयारभक्ष्यत्वात् यक्षरक्षः पिशाचान्नंमद्यंमांसंसुरांशव-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

म् तद्ब्राह्मणेननात्तव्यंदेवानामश्नतां हविरित्यत्रमनु
टीकायांमांसमिदमाममभक्ष्यम् मद्यादिसाहचर्य्यात्
शूद्रेणतुसर्व्वथाष्टकाश्राद्धेमत्स्यमांसमाममेवंदेयम् आ
मंशुद्रस्यपक्वान्नंपक्वमुच्छिष्टमुच्यते इत्यतिदेशेनतयो
स्तद्दोषनिरासात् अतएवशिष्टाचारोप्येवमेवेतिदि-
क् ॥ रौद्रंपशुमालभेत साण्डंगौर्वेतिशूलगवेश्रवणा
त् तथाततःप्रभृतिकाकुत्स्थपितरःकव्यभोजिनः अ
फलंभुंजतेमेषंसफलंनतुभुंजते इतिरामायणेवालिदा-
नश्रवणात् मेषएव विशेषश्रवणात्क्लीवंहीनांगमथ-
वाविद्धांलिंगंस्रवत्कफमितिपर्य्युदासात् सर्वत्रहव्ये
कव्येचसांडएवछागः प्रशस्तइतिदिक् ॥ देशविधा-
वन्यतःप्राप्तएवनित्यनैमित्तिकादौश्राद्धेदेशरूपगुण-
विधिर्लाघवात् गोष्ठेदशगुणेतिवद्वातुविशिष्टविधि-
र्लाघवात् विधेयगौरवात् फलमपिदेशरूपगुणस्यै
वतद्वद्देवगयायांतुद्वादशदैवतश्राद्धविधानात् अन्य
तः प्राप्तेरभावाद्वाक्यभेदेप्यगत्याविशिष्टविधिरेवे-
तिकेचित् पृथक्विधावसान्निध्येनगुणविधानासं-
भवादगत्यासर्वत्राविशिष्टविधिरेवेत्यन्ये । वस्तुत-
स्तुश्राद्धस्यपूजितोदेशोगयागंगासरस्वतीत्यत्रपूजि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तइत्यभिधानात् विविक्तेषुतुतुष्यंतिदत्तेनेहपिताम-
हाइत्यादेरेकवाक्यतया प्रकृतेलाघवाद्गुणविधिरेवा
तएव सोष्णीषाऋत्विजः प्रचरंतीतिलोहितोष्णीषा
ऋत्विजः प्रचरंतीत्यत्राग्रिमवाक्यम् लौहित्यरूप-
गुणमात्रविधायक मन्यथाविशिष्टविधानसंभवेउ-
ष्णीषद्वयविधिश्चस्यात् तस्माद्विशिष्टविधिकल्पने-
गौरवात् गुणविधिरेव नचैवंविशिष्टविध्युच्छेदःस्या-
दन्यथानुपपत्तेस्तत्रवीजत्वात् एवंचानन्यथासिद्ध-
व्यापारस्यगुणविधिहेतुत्वेसान्निध्यासन्निध्ययोरप्र-
योजकतयावक्तृतात्पर्य्यकल्पनेलाघवमात्रस्यैवगम-
कत्वात् अतएव गयायामप्यन्यतः प्राप्तएवामावा
स्यादिपार्वणगुणविधिरेवतत्रद्वादशदैवतत्वस्याप्रा-
प्तत्वात् पिंडदानंतुचैवंस्यात् सर्वस्थानेष्वित्यनेनतत्र-
तत्राभिधानादितिदिक् ॥ सम्यक्समाधानंकर्मकर्त्त-
व्यंकर्म्मकारिणा निःकामेनसदाकार्य्यंकाम्यं कामा-
न्वितेनवेत्यादिना निःकामेनेतिमुमुक्षुविषयम् तस्यै
वकामनाप्रतिषेधात् कामान्वितेनेतिरागिविषयम्
रागिणस्तुकामनादयेक्काचित् यएताराज्ञीरधीयीतत-
स्यपितरोघृतकुल्यांमधुकुल्यांक्षरंते तथापुत्राजानेय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एताभिरिष्टिंनिर्वपतितस्यपुत्रः पशुमान्वर्चस्वीअन्ना-
दोमेधावीत्यत्रोभयथाप्यक्लृप्ताधिकारिकतयैवानियो
ज्याकांक्षायांसकलार्थवादोपस्थापितसमुच्चितफल-
कामएकएवाधिकारीनियोज्यःस्वीक्रियतेलाघवान्न-
विकल्पेनगौरवादन्यत्राक्लृप्तत्वात् यत्रचैकस्मिन्नेव-
तत्तत्कर्म्मणितन्तत् संहितायांतत्तत्फलान्यर्थवादो-
पस्थापितानिश्रूयंतेतेषांविकल्पेनैवान्वयः । एवंसं-
हितोपात्तफलेनैवाधिकारलाभसंभवेफलां तरैर्निरा-
कांक्षत्वात् किंचान्यथातत्तत्संहितायांतत्तत्फलकथ-
नस्यवैयर्थ्यंस्यादधिकारिलाभविरहात् अतएवैकफ-
लान्येकैकंक्रतवआह्रियंते सर्वेभ्योदर्शपौर्णमासावि-
त्यत्रापिसर्वशब्दस्यप्रस्तुतवाचितया एकैकवाजपेया
दिफलस्यैवकामनाविषयत्वेन प्रकृततयातन्मात्रस्यै
वफलत्वंयोगसिद्धिन्यायादत एवनान्यदैच्छिक मप्र-
स्तुतत्वात् नचसमुच्चितफलकामनापि तस्योपस्था-
पकाभावेनानुपस्थितेः । किंचाग्निष्टोमादौतत्तएवा-
धिकारिणः क्लृप्तत्वेनसमुच्चितफलकामस्याधिकारक-
ल्पनेगौरवात यागान्तरेप्रवृत्त्यनुपपत्तेश्चनचवैजात्य-
स्यैवप्रवर्तकता तावन्मात्रस्यैवप्रवर्तकत्वात् ननुत-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्हिदर्शपौर्णमासयोर्य्योगान्तरापेक्षायांवैलक्षण्यानु-पपत्तिरितिचेत् अस्यत्वनिर्धारितफलकत्वमित्ये-ववैलक्षण्यमितिब्रूमः ॥ अतएवहिरण्यंसर्वकामद-मित्यत्रापिदानांतरोक्तफलानामन्यतमस्यैवफलत्व मेवं चपक्षत्यादिविनिर्द्दिष्टान्विपुलान्मनसः प्रि-यान् प्राप्नुदः पंचदश्यां तु सर्वान्कामान्समश्नुत इत्यत्राप्यन्यतमतिथिफलकामनैवाधिकारिविशेष-णम् समुच्चितस्यानुपस्थितेः । अन्यथाप्रवृत्तिस्वा भाव्यात्तिथ्यं तरेषुप्रवृत्त्यातद्बोधकवेदस्याननुष्ठान-लक्षणमप्रामण्यं स्यादितितत्त्वम् येतुपक्षत्यादिवि-निर्द्दिष्टानितिसमभिव्याहारात् शब्दादेवोपस्थित-तयातस्यैवाधिकारिविशेषणत्वममावास्यायामधि-कारसंदेहेतिथ्यंतरेच प्रवृत्तिरितिवदंति तेप्यपरीक्ष-काएव तथापिपक्षत्यादिविनिर्द्दिष्टानिति सर्वेभ्यो-दर्शपौर्णमासावित्यनयोरविशेषात् संदेहेचप्रवृत्तौ-मानाभावादिति । ब्रह्मचारिसहस्रेणवाणप्रस्थशते-नच गृहस्थानांसहस्रेणयतिरेकोविशिष्यते इत्यत्र-यतिर्योगी यतीनितिकात्यायनसूत्रात् सोपित्रिदं-डएव यतिस्त्रिदंडइतिमत्स्यपुराणात् विशेषस्य-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सामान्यपरत्वेलक्षणापत्तेः । एवंचाधुनिकानामेकदंडिपात्रकंश्राद्धंचिंत्यमिति । अनुपनीतनत्रैवर्णिकेनश्राद्धे वैदिकमंत्राः पठनीयाएव नैनंध्याहारयेद्ब्रह्मस्वधानिनयनादृत इतिमानवप्रतिप्रसवात् ततओंकारपूर्वकतापि तस्मादोमित्युदाहृत्ययज्ञदानतपःक्रियाःप्रवर्तंतेविधानोक्तास्सततंब्रह्मवादिनामिति भगवद्गीतासुयज्ञादिवैदिककर्म्ममात्रएवोंकारपूर्वकताप्रतिपादनात्ब्रह्मवादिनामित्यस्यवेदवादिनामित्यर्थकत्वात् अतएव त्रैवर्णिकेनानुपनीतेनवन्यधिकारिणापिवैश्वदेवहोमोनकार्य्यः । नस्त्रीजुहुयान्नानुपनीत इत्यापस्तंवसूत्रेणाविशिष्यनिषेधात् शूद्रस्यतत्राधिकारोनिरावाधएव दानंदद्याच्छूद्रोपिपाकयज्ञैर्य्यजेतचेतिविशिष्याभिधानात् अतएव सिद्धान्तेनापितत्करणमवाधितमेवेतिदिक् ॥ शूद्राणांमासिकं कार्य्यं वपनंन्यायवर्त्तिनाम् वैश्यवच्छौचकल्पंतुद्विजोच्छिष्टंचभोजनम् अत्रचद्विजभोजनानंतरं शूद्रोभुंजीतेत्यर्थः । उच्छिष्टपदस्य शेषेपिशक्तत्वात् अतएव प्रेतश्राद्धेयदुच्छिष्टं ग्रहेपर्य्युषितंचयत् दंपत्योर्भुक्तशेषं चनभुंजीत-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कदाचनेत्यत्रोच्छिष्टं पाकपात्र्यवशिष्टमितिनिबंधे-
विवरणम् नतुद्विजभुक्तावशिष्टं कवलाधारपात्रस्थि-
तमेवभुंजीतेत्यर्थः ॥ उच्छिष्टमगुरोरभोज्यमितिशा-
तातपाविरोधात् गुरुः पित्रादिरितितद्विवरणात् न-
शूद्रायमतिंदद्यान्नोच्छिष्टन्नहविःकृतम् नचास्योप-
दिशेद्धर्मंनचास्यव्रतमादिशेदित्यादिनामनुनानिषे
धाच्चेतिदिक् ॥ नित्येतुपार्वणादावाचारपरिप्राप्तंसं-
कल्पवाक्यंप्रयोक्तव्यमितिप्राचः तत्रनांदीमुखेवि-
वाहे च प्रपितामहपूर्वकम् वाक्यमुच्चारयेद्विद्वान-
न्यत्रपितृपूर्वकमित्येवापातत: संकल्पवाक्येप्रमाण-
मिवदृश्यते तथाप्येतद्वाक्यस्यराजाद्यलिखितत्वा-
दप्रमाणत्वमितितेषामाशयः । समूलत्वेवाक्रममात्र
विधायकत्वेवश्रुतत्वात् वस्तुतस्तु अतस्संवत्सरं-
श्राद्धंकर्तव्यंमासचिह्नितम् मासचिह्नन्तुकर्तव्यंपौष-
माघाद्यमेवहीत्येवप्रमाणं संकल्पं विनामासचिह्नि-
तत्वानुपपत्तेः ॥ ननुसांवत्सरिकेभवत्वेवंपार्वणेतुक-
थंस्यात् न्यायतौल्यादित्यवेहि किञ्चतस्यचांद्रमा-
सकर्तव्यत्वेनियतेतत्रापिपूर्ववदाकांक्षोदयेतन्निर्दे-
शस्यावश्यकत्वेनातएव मासपक्षतिथीनांचनिमि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्तानांचसर्वशः । उल्लेखनमकुर्वाणोनतस्यफलभाग्भवेदित्यपिसंगच्छते कामयेतुसर्वत्रसंकल्पःसकलसिद्धएव मन्वादौ च युगादौचमासत्रयफलंलभेदित्यादौ सर्वत्रनिमित्तमात्रस्यैवफलसमर्पकत्वं यत्रतत्रतन्मात्रनिर्द्देशः नतुमासादेरपिप्रयोजनाभावादतएव अद्यराहुग्रस्तेदिवाकरइत्येवशिष्टानांप्रयोगइति ॥ ० ॥ सन्न्यासिकर्तृकंश्राद्धं नात्मीयंकिंत्वात्मनोब्राह्मणसंप्रदानकत्यागवदतोनतिर्य्यगधिकरणविरोधः ॥ अतएवात्मनेपरमात्मनेजीवात्मनेनमइत्येवप्रयोगः ॥ वैश्वदेवविहीनन्तदशक्तावुदकेनतिवति तथातदप्यदैवंकर्तव्यमयुग्मान् भोजयेद्द्विजानित्यत्रोभयत्राप्यप्राप्तदैवश्राद्धनिषेधानुपपत्यादैविकान्यापार्वणेतिकर्तव्यताऽतिदिश्यते। दीक्षणीयादिष्वप्रयाजइतिनिषेधानुपपत्याप्रयाजमात्रपर्य्युदासेनतदितरदर्शपौर्णमासधर्म्मातिदेशवत्। तथाहिपार्वणेप्रकृतिभूतेपिंडादिदानं विकृतिभूतेनित्यश्राद्धादौतावन्निषिध्यते निषेधस्तुप्राप्तस्यैव प्राप्तिस्तुप्रकृतिवद्विकृतिरितिन्यायेननित्यश्राद्धेपार्वणधर्म्मातिदेशवाक्यबलादेव । अतिदेशश्चांगस्यैव प्रधान-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्यातिदेशासंभवात् नचविश्वेदेवश्राद्धमंगमेव ते-
षामारक्षभूतन्तुपूर्वन्देवं नियोजयेत् रक्षांसिहिविलु
पंति श्राद्धमारक्षवर्ज्जितमितिश्रुतेरिन्द्रवाहुवंधनव-
दस्यनैमित्तिकत्वात् प्रधानफलातिरिक्तफलकत्या
च्चेतिसंप्रदायः । हन्ततर्ह्यमावास्यापरपक्षमृतस्या-
प्येकोद्दिष्टे तस्यबाधः स्यात् । नस्यात् एकोद्दिष्टं तु-
यच्छ्राद्धं तन्नैमित्तिकमुच्यते इतिपरिभाषाबलादेव-
नैमित्तिकेकालकामावित्यादिश्रुतेस्तत्सम्बन्धस्यशा-
स्त्रार्थत्वात् । निषेधस्तर्हिकुत्रतद्भिन्नेष्विति गृहाण ।
अत्रचदृष्टान्तासिद्धिर्दर्शप्रयाजवदिति चिन्तामणि
लिखनादितिनवाच्यम् । तस्यमतभेदेनाप्युपपत्तेरि-
ति ॥ ० ॥ अपात्रकपार्वणादौयद्यपिनप्रमाणमस्ति
तथापिनित्येनैमित्तिकेयत्किंचिदंगहानावपिफलसि-
द्धिरितिसर्वशक्त्यधिकरणेसिद्धान्तितत्वात् । तथाहि-
काम्येलिङ्गकरणविषयकापूर्वाभिधानात् । तत्रचस-
र्वसंपत्तिरुचितैव नित्येतुसंध्यामुपासीतेत्यादौ प्रधा
नमात्रस्यैवविषयीभावप्रतीतेस्तत्रांगहानावपि फ-
लसिद्धिरितितत्रैवोक्तम । अतएवपात्राद्यंगहानाव
पिपार्वणादीनांनिर्विचिकित्संशिष्टैरनुष्ठानमिति हन्त

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रेतषोडशीतावत्कामया प्रेतत्वविमुक्तिरूपफलश्रुतेः काम्यापूर्वंच सर्वांगसंपन्नेनकर्म्मणाजन्यते । अपात्रेकेचकर्म्मणिवहुतरांगहानिस्तस्मात् प्रेतषोडशी-सपात्रैवकार्य्येति । अत्रोच्यते । तन्मतंहिमुनिवचनविरुद्धम् । तथाहि एकाहेद्वादशाथवेति तावन्मुनिवचनम् । तत्रचतुर्द्दशानांमासिकानांसपिण्डीकरणस्यच सपात्रत्वेसर्वथानघटते । नह्येतावान्प्रयोगराशिः सपात्रकोरौहिणाभ्यंतरेरौहिणसमाप्तिपर्य्यंतेनवाब्रह्मणापिकर्तुं शक्यतेतस्मात्तत्रापात्रकत्वेसर्वत्रापात्रकतैवास्तु नत्वर्द्धजरतीयंयुज्यते । ननुयावद्वचनंहिवाचनिकमितिन्यायेनतत्रतथास्त्वितिचेत् । न वाक्यार्थीभूतनियोगस्यैक्यादिति ॥ रामायणे । ततः पितरमुद्दिश्यब्राह्मणेभ्योददौधनम् महार्हाणिचवस्त्राणिगांचवाहनमेवच । भूषणानिचमुख्यानि-राज्ञस्तस्यौर्द्ध्वदैहिके । यद्यपीदंदानंनसंभवतिसंप्रदानाभावात् यस्मैप्रतिपाद्यते सनसंप्रदानंकारकत्वाभावात् संप्रदानस्यकारकविशेषत्वात् तथाप्युत्सृजंति उक्तदोषेणप्रोक्त दानत्वासंभवात् । रामायणवचनं भूरिदानपरम् एतच्चभूरिदानंक्षतांतेपि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्राद्धोत्तरसमयकर्त्तव्यत्वात् अत्रपितृगतस्वर्गः फलम् तदनुकूलप्रकरणेऽभिधानात् प्राच्यास्तुविश्वजिन्न्याये नफलकल्पनेगौरवादार्थवादिकमेवफलं पितृगतमन्वेतीतिवदंति । तन्मन्दम् तत्तदार्थवादिकफलस्यसर्वीयफलाकांक्षापूरणाक्षमत्वादिति ॥०॥ यत्रयागादौविशेषापुरस्कारेणफलमात्रंश्रूयते तत्रस्वगतफलवत्परगतफलकामोप्यधिकारीफलकामितयाधिकारस्योभयत्रतुल्यत्वात् ॥ ननुस्वरितञितः कर्त्तभिप्रायेक्रियाफलइत्यनेन कर्तृगतफलाभिप्रायएवात्मनेपदविधानात् अत्रचयजंतियाजकाः पचंतिपाचका इति प्रत्युदाहरणंवृत्तिकारोप्याह । तथाच स्वर्गकामोयजेतेत्यात्मनेपदं नस्यादितिचेन्न इदं सूत्रंहिकर्तृगतक्रियाफलाभिप्राये आत्मनेपदमेवेति विधायकमन्यत्रात्मनेपदनिवर्तकमुभयंवा । तत्राद्येऽन्यत्रात्मनेपदंस्यादेवानिषेधात् अस्त्रीकरोतिहिजगद्विजयेस्मरः स्त्रीरित्यादौविजयस्यक्रियाफलस्यकर्तृगामित्वेप्यात्मनेपदाभावाच्च । नद्वितीयः कमलवनोद्घाटनंकुर्वतेये इत्यादावभावात् नाविमुंचंतिसामर्थ्यंवाक्यार्थोपिपदानिनः यज्ज्वलन्ति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ह्निकाष्ठानितत्किंपाकंनकुर्वते । इतिभट्टपादैरकर्त्र-
भिप्रायेपिक्रियाफले आत्मनेपदप्रयोगकरणाच्च ।
अतएवनतृतीयोपि वस्तुतस्तु कर्त्रभिप्रायेक्रियाफल
इत्यस्यकर्तुरिष्टइत्यर्थः । तथाचान्यगतफलाभिप्रा
येप्यात्मनेपदमविकलमेव प्रत्युदाहरणेतुचेतनमा-
त्रस्याभिप्रेतत्वेनक्रियाफलाभिप्रायस्याप्यभावादत
एव नीलंवावृषमुत्सृजेदितिपितृगतफलबोधकं म-
त्स्यपुराणमपिसंगच्छते । अतएवकर्त्रभिप्रेतक्रि-
याफलत्वमात्र एवात्मनेपदमितितत्त्वचिंतामणिर-
पिसंगच्छतइतिदिक् ॥ ० ॥ अमावस्यायांपितृ-
भ्योदद्यादितिगोतमसूत्रेस्वतंत्रविधिबलाद्रात्रावपि-
श्राद्धप्रसक्तौरात्रौश्राद्धंनकुर्वीतेतिमानवोनिषेधः प्र-
सज्यप्रतिषेधएव अन्यथानकुर्वीतेतिविधिवैयर्थ्या-
पत्तेः पर्युदासापत्तेश्चेतिगौडाः तन्मन्दम् । कर्तृ-
भेदेनवैयर्थ्याभावात् नञः प्रसज्यप्रतिषेधार्थकत्वे-
वाक्यभेदापत्तेश्च । किंचऊर्द्धं मुहूर्तात्कुतपाद्यन्मु-
हूर्त्तंचतुष्टयमित्यादिवचनानां तथापर्युदासबोध-
कानांगोतमसूत्राणां च सर्वेषामेकवाक्यतास्यादन्य-
थात्वदुष्करीत्याभिन्नाभिन्नार्थकत्वेवाक्यभेदः स्या-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दिति ॥ ० ॥ कन्यांगतेसवितरियान्यहानितुषोडश क्रतुभिस्तानितुल्यानितेषुदत्तमथाक्षयम् ॥ अत्रषोडश इति तिथिवृद्धिपक्ष एव यद्वाश्राद्धन्तुप्रौष्ठपद्यां वैकृत्वाक्रतुफलंलभेदितिश्रुतेः प्रौष्ठपद्यासहषोडशत्वम् केचित्तु कन्याषोडशांशरूपकाम्यश्राद्धबोधकमिदम् । अतऊर्द्धं न्तुकन्यायायान्यहानितुषोडशेतिसूर्यसिद्धान्तादित्याहुः । अश्वयुक्कृष्णपक्षेतु श्राद्धं देयंदिनेदिने इत्यत्रदिनपदंन तिथिपरम् लक्षणापत्तेः ननुदिनपदस्य तिथावौपसन्दानिकीशक्तिरेव उपसंदानंतु । अश्वयुक्कृष्णपक्षेत्विस्यादौदिनेदिनइति । एवंतर्हि अश्वयुक्कृष्णपक्षेनद्यांदिनेदिनेपितृंस्तर्प्पयेदित्यत्रापि दिनपदस्यतिथावौपसंदानिकशक्त्यापत्तेः किन्नश्छिन्नमितिचेत् जिधातोर्जयसामान्यशक्तस्यप्रोत्तरजित्येन विशेषशक्तिः कल्प्यतेफलबलात् प्रकृतेतुदिनतिथ्योस्सामान्यविशेषाभावात् हंततर्हिप्रस्थितइत्यादौकागतिस्तत्रापिसामान्यविशेषाभावेप्यगत्याधातोरेवतदर्थेशक्तिःकल्प्यते अनेकार्थाहिधातवइत्यभियुक्तस्मृतेः लाघवाच्च उपसर्गस्यतुतात्पर्य्यग्राहकत्वमि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्ययेत्रौपसंदानिकीशक्तिर्हि नपदस्यतदुपसंदानेपिति थिप्रत्यायकत्वाभावात् किंचौपसंदानिकीशक्ति-र्धातोरेवसर्वत्रतथैवकल्पनात । अन्यत्रौपसंदानि-कशक्तेरकल्पनादितिदिक ॥ ० ॥ त्रिभागहीनंपक्षं वात्रिभागंत्वर्धमेववेत्यत्रत्रिभागादिविकल्पः शा-क्त्यपेक्षया अन्यथासंभवतिलघूपायेगुरूपायेप्रवृत्ते रननुष्ठानलक्षणमप्रामाण्यं पक्षादिविधेरापद्येत । नचातएवफलभूमानित्यत्वादिति अतएवोर्द्धंवाच तुर्थ्यायदहरसंपद्यतइत्यादिकात्यायनवचनात स-कृत्करणंतत्पक्षचतुष्टयावरुद्धाश्विनापरपक्षेतरापरप क्षविषयम् ब्राह्मणकौडिन्यन्यायात् येतुऋजुया-ज्ञवल्क्यवचनानुरोधादाश्विनापरपक्षंप्यत्यंताशक्त-स्यसकृत्करणमाहुस्तदसत् पूर्वोक्तवाधविरोधादिति पक्षचतुष्टयेपिचतुर्द्दशीत्यागः । आहवेषुविपन्नानां जलाग्निभृगुपातिनाम् चतुर्द्दश्यांभवेत्पूजाअमावास्या यान्तुकामिकीतिकन्यागतापरपक्षप्रकरणस्थदेवीपु-राणवचनाद्विशेषविधिमहिम्ना शेषविधिसिद्धेरि-तिप्रांचः ॥ नव्यास्तु चतुर्द्दश्यांपार्वणंवज्र्यलेपायि-तमेव । प्रथमप्रवृत्तानिरपेक्षाहरहः श्रुत्यातस्याद्रा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गालिंगनात् विशेषवचनानान्तु चरमप्रवृत्तकाम्प-विध्यनालिंगितचतुर्द्दशीश्राद्धविषयकत्वात् । कृष्णपक्षेदशम्यादौवर्जयित्वाचतुर्द्दशीमित्यादिवचनादस्तुतथातन्निषेधइतिचेत् मैवंदिनेदिनइतिनित्यविधेर्विशेषविषयत्वेनलघुप्रवृत्तिकत्वात् । मनुवचनस्यसामान्यप्रवृत्तस्य बिलंबितप्रवृत्तिकत्वादिति । श्राद्धदः पंचदश्यान्तुसर्वान्कामान्समश्नुयादित्यत्रसर्वशब्दस्यप्रकृतवाचितया प्रस्तुतस्यैकैकतिथिकफलस्यकामनाविषयत्वेन तस्यैवामावास्याश्राद्धेपि फलत्वन्नतुमिलितस्य । अतएवैकैकस्मैफलायान्येक्रतवआह्रियन्ते सर्वेभ्योदर्शपौर्णमासावित्यत्रोपस्थितफलेष्वन्यतमफलंदर्शपौर्णमासयोर्न्नतुक्रत्वंतरवन्निर्धारितैकफलवत्त्वम् । नचामिलितफलवत्त्वंमिलितानुपस्थितेरितिसिद्धांतस्तथेहापीतिकेचित् तन्न । तत्रैकैकस्यैव प्रकृतत्वेनोपस्थितत्वादस्तुतथा । प्रकृतेतुपक्षत्यादिविनिर्द्दिष्टान्विपुलान्मनसः प्रियान् इत्यादिनामिलितस्यैवदर्शश्राद्धे फलत्वे नप्रतीतेर्न्यायावतारायोगादिति ॥ भौजंगीतिथिमासाद्ययावच्चन्द्रार्कसम्भवं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्रापिमहतीपूजाकर्त्तव्यापितृदैवते ॥ ऋक्षेपिण्ड-
दानन्तु ज्येष्ठपुत्रीविवर्जयेदितिदेवीपुराणम् । भौ-
जंगी पंचमी ज्येष्ठपुत्रीविद्यमानज्येष्ठपुत्रकः । अ-
यंतुश्राद्धकरणनिषेधएवेतिनाशंकनीयम् पिण्डपद-
लक्षणापत्तेः । किंतुपिंडदानमात्रनिषेधस्तत्रापिम-
घानिमित्तकश्राद्धएव नतुतदधिकरणकएव मघा-
धिकरणकसपिण्डनादौतत्पय्युदासापत्तेरिति ॥ द्र-
व्यब्राह्मणसंपत्तिर्विषुवत्सूर्य्यसंक्रमः । व्यतीपातो-
गजच्छायाग्रहणंसूर्य्यचंद्रयोः । गजच्छाया योगो-
मघात्रयोदश्योः कुंजरच्छायसंज्ञकः भवेन्मघायांसं-
स्थेचशशिन्यर्क्के करेस्थिते इत्यनेनोक्ता अत्रतृतीय
पादोर्थवादः ॥ एतच्चश्राद्धं निषिद्धसायाह्नादावपि-
काय्र्य्यमेवेतिकेचित्तन्न वाधस्यापेक्षाविध्यापत्तेः प्र-
सक्तिप्रसवाभावाच्च ॥ इदन्तु गजच्छायाश्राद्धमामा-
न्नेनैवकार्य्यमितिश्राद्धपल्लवमनादेयम् अमानकत्वा
त् । तत्रपाकानिषेधात् । सूतकेमृतकेचैवग्रस्तयो-
श्चंद्रसूर्य्ययोः छायायांकुंजरस्याथभुक्त्वातुनरकं-
व्रजेदितिभोजननिषेधस्यप्रेतश्राद्धभोजननिषेधवत्
पाकावाधकत्वात् आपद्यनग्नौतीर्थेचग्रहणेचंद्रसू-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यंययोः आमश्राद्धं द्विजैः कार्यंयशूद्रेणतुसदैवही-
तिपरिसंख्यानरहितत्वाच्च यावच्चगजच्छायायोग-
स्तावन्नब्राह्मणेनभोक्तव्यम् सूतकेमृतकेचैवेत्याद्यु-
क्तवचनमुक्त्वा प्रमादाद्ब्राह्मणस्तत्रभुक्त्वाचांद्रायणं
चरेदितिनिषेधादतःश्राद्धानधिकारिणस्तत्पूर्वंभोज
नमविरुद्धमेव । अत्रचब्राह्मणपदमुपलक्षणम् सू
तकादिपदसमभिव्याहारादिति । कृष्णपक्षेदशम्या
दीवर्जयित्वाचतुर्द्दशीम् श्राद्धेप्रशस्तास्तिथयोय-
थैतानतथेतरा इतिमनुवचनमसंकोचादेवकृष्णप-
क्षमात्रस्तावकम् । तेनाश्विनापरपक्षेपितिथय-
एवश्राद्धकालएकमूलकतानुरोधादितिभ्रमोहेयः अ-
स्यात्पविषयत्वेनकृष्णपक्षस्तावकत्वाभावात् म-
च संकोचात्सकृत्करणस्तावकतैवास्तु महाविषय-
त्वात् तस्मात् कृष्णपक्षांतरेदशम्यादिकल्पवि-
धायकतैव अतएवकृष्णपक्षांतरेपिशक्तस्यप्रतिपदा-
दिरशक्तस्य पंचम्यादिरशक्ततरस्यदशम्यादिरश-
क्ततमस्यामावास्यामात्रमितिसिध्यति हंततर्हिच-
तुर्द्दशीपर्युदासएवाश्विनापरपक्षे नस्यात् भिन्न-
विषयत्वादितिचेत् । भ्रांतोसि । रात्रौश्राद्धं नकु-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वीतितित्वल्पर्य्युदासे संकोचाभावादिति। अमावास्यायाष्टकावृद्धिः कृष्णपक्षोयनद्वयमित्यत्रामावास्यायाःपृथगुपन्यासादाश्विनापरपक्षोपिस्वतंत्रविधिवलात् कल्पांतरानाचरणेपिसामान्यंस्यादेवेतिश्राद्धविवेकस्तन्मन्दम् यथासकृत्करणविधेरविरोधेन पक्षांतरविषयत्वं तथास्वतंत्रविधेरपीति॥ गोतमः। अथश्राद्धममावास्यायांपितृभ्योदद्यात् पंचमीप्रभृतिवापरपक्षस्ययथाश्रद्धंसर्वस्मिन्वा द्रव्यदेशब्राह्मणसन्निधौवाकालनियमः शक्तितः शक्तिःश्राद्धसामग्रीतदपेक्षानियमस्तेनाशक्तः-पंचम्यादितोप्यकरणेनप्रत्यवायीभवतीत्यर्थः अत्रचत्रयोदशीश्राद्धमारभ्यापरपक्षकेणप्रसंगेनकार्य्यमन्यत्नतुस्वातंत्र्येणेतिद्रष्टव्यम्। केचित्तु अत्रापरपक्षामावास्याश्राद्धमप्येवमित्याहुस्तन्न अश्वयुक्कृष्णपक्षइतिविशेषमुखेनसर्वतिथीनांग्रहणालिंगनादमावास्यायां पितृभ्योदद्यादिति सामान्यविधेस्तदितरपरत्वादन्यथाविध्यनुवादवैषम्यापत्तेः पार्वणकालत्वेनास्याः प्राप्तायाअन्यमासप्राप्तानामालिंगनात् ननुपक्षविधेरमावास्यातिरिक्तपरत्व-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मस्तु तद्विधेरनित्यत्वेनविनिगमकाभावात् विध्यनुवादवैषम्यापत्तेरविशेषादितिचेत् उच्यते पक्षविधेस्तदितरपरत्वेदिनेदिन इतिवीप्सावाधस्तस्याअशेषानेकव्यक्त्युपस्थापकत्वात् । तथाचवीप्सायाद्रागेवाश्विनापरपक्षावच्छिन्नाः कृत्स्ना-एवकालाविधीयन्ते अमावास्याविधेरेवतदितरपरत्वमितिसुष्ठूक्तं पितामहचरणै र्विध्यनुवादवैषम्यापत्तेर्म्मासिमासिवोशनमित्यस्य सकलकृष्णपक्षपरत्वादिति नचप्रकारभेदान्नदोषोऽप्रयोजकत्वात् अगृहीतग्राहित्वरूपप्रामाण्यस्यतथात्यभावादिति ॥ विषशस्त्रश्वापदाहितिर्यग्बाह्मणघातिमां चतुर्द्दश्यां भवेत्पूजा अन्येषान्तुविगर्हिता इति घातोस्यास्तीतिघाती तेनश्राद्धार्हत्वेसतिविषादिब्राह्मणान्तान्यतमहेतुकमरणवतामित्यर्थः । नतुब्राह्मणघातकानामित्यर्थः विषादीनामनन्वयात् ब्राह्मणेनतुपरिचीयहतानान्तथाविधानामपिश्राद्धन्नकर्तव्यम् । अत्रव्याधिनायौवनेपिमृतानामयौवनेपिशस्त्रादिमृतानामुभयेषामपिचतुर्द्दश्यांश्राद्धम् उभयोः पृथगुपादानात पुंसःस्त्रियाश्चवि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शेषाश्रवणात् नचतेषान्दद्यादितिलिंगानिर्द्देशान्नै वमितिवाच्यं उद्देशमात्राकांक्षाप्रवृत्तत्वेनालिंगावि शेषेतात्पर्य्याभावात् युवानश्चगृहेयस्यमृतास्तेषांप्र दापयेत् शस्त्रेणवाहतायेवैइत्यादिषुपुमान्स्त्रियेत्येकशेषेणापिप्रयोगसंभवाच्च ॥ एकोद्दिष्टविधिना चैतच्छ्राद्धंकार्य्यम् चतुर्द्दश्यान्तुयच्छ्राद्धमित्यादेः । अत्रचयथोक्तेननुगमापत्यारोगव्यतिरेकमृतत्वमनुगमकममीषांप्रयोजकमस्तु । तेनप्रसवमृतायाः क्ष तपत्यनुमरणायाश्चशस्त्रहतश्राद्धंनत्वग्निमरणेनैव त त्प्रापितस्य प्रमादादग्निमृतपरत्वात् नचनयोषिद्भ्यः पृथक्दद्यादवसानदिनादृत इतिवचनाविरोधान्नैवमितिवाच्यम् सामान्यमुखप्रवृत्तस्याविशेष विध्यालिंगितैतच्छ्राद्धविषयत्वात् । अन्यथापुंसो ऽपिनस्यात्अर्वाक्संवत्सराद्वृद्धौ पूर्णेसंवत्सरेतथा । येसपिंडीकृताः प्रेतास्तेषांतुनपृथक्क्रियेतिनिषेधात् वस्तुतस्तु यावद्वचनांहिवाचनिकमितिन्यायेनात्राननुगमस्यादोषत्वादिति ॥ पाश्चात्यास्तु । एतन्नवम्यांमातुः पितुश्चमरणतिथिसजातीयातथाचाश्वि नापरपक्षेश्राद्धमाचरंति तत्राद्यदेशाचारोमूलम् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वितीये आषाढ्याः पंचमेपक्षेकन्यासंस्थेदिवाकरे । मृताहनिपुनर्यो वैश्राद्धंदास्यतिमानवः ॥ तस्यसंवत्सरंयावत् प्रीताःस्युःपितरोध्रुवमितिनागरखंडधृतवाक्यंप्रमाणयंति ॥ ०॥ अमावास्यांयत्क्रियतेतत्पार्वणमुदाहृतम् । क्रियतेवापर्वणियत्तत्पार्वणमितिस्थितिः ॥ अत्रामास्थायांवाशब्दरुक्तनाविश्वदेवपूर्वकषण्मात्रोद्देश्यकश्राद्धत्वंपार्वणत्वमतएवद्वादशदैवते नवदैवतेवागयाश्राद्धे साग्न्यौरसकर्तृकत्रिंपंडकक्षयाहश्राद्धेवा न्यत्रवानातिव्याप्तिरिति। अहन्यहनियच्छ्राद्धं तन्नित्यमितिगीयंते । वैश्वदेवविहीनंतदशक्तावुदकेनतु इत्यत्राहरहः क्रियमाणंयच्छ्राद्धं तन्नित्यमित्येकंलक्षणं । अन्नाद्यभावेतर्पणतोपियस्यश्राद्धस्यसिद्धिस्तन्नित्यमितिद्वितीयंलक्षण मेव नतुद्रव्यविधिरयम् । यएवंतर्पयेदद्भिः पितॄन्स्नात्वाद्विजोत्तमः तेनैवसर्वमाप्नोतिपितृयज्ञक्रियाफलमितिमनुवचनैकवाक्यतावलात् नचदद्यादहरहः श्राद्धमन्नाद्येनोदकेनवेत्यादिविरोधः । तत्रापिप्रकृतव्याख्यानेनैवसंगतेरितिदिक् ॥ औरसपुत्रिकापुत्रक्षेत्रजदत्तकानांचतुर्णांपार्वणाधिका-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रइतिनिर्बधारः ॥ वस्तुतस्तुपारशवस्यापिपार्वणे-
धिकारएव पितरिदंतेर्घ्यमित्यादिसूत्रसिद्धसामग्री-
संभवात् ॥ ब्राह्मणेननकर्त्तव्यंशूद्रस्यत्वौर्द्धदैहिक-
म् शूद्रेणवाब्राह्मणस्यविनापारशवंक्वचित् इत्या-
दिवचनाच्च ॥ एवंपौनर्भवस्याप्यधिकारएवक्लीवं
विहायपतितंयापुनर्भजतेपतिम् । तस्यांपौनर्भ-
वोजातोव्यक्तमुत्पादकस्यसइतिवचनात् ॥०॥ अथा
भ्युदयिककालाः ॥ कन्याविवाहः पुत्रस्यप्रथमवि-
वाहः नामकरणंचूणाकरणं सीमन्तोन्नयनंनवगृह-
प्रवेशश्च कन्यापुत्रविवाहेचेत्यादिवचनैकवाक्यत्वा
त् । यदितुपितारोगादिवशान्नकरोति तदापुत्रवदेवा
भ्युदयिकं संस्करणीयपितृवदन्यैरपिकार्य्यम् अ-
ष्टौसंस्कारकर्म्माणीत्यादिश्रुतेः कन्यायाश्चविवाहे-
कन्यादानकर्त्ताकन्यावच्चकरणीयम् कथितवचनादे-
व पुत्रस्यविवाहे पितृवदन्यकर्तृकमाभ्युदयिकंना-
स्त्येव तद्धिपुत्रविवाहमात्रनिमित्तकम् तेनपितृमा-
त्राधिकारिकमेव अथ तस्याभावेतुतत्क्रमादितिव-
चनेनपितुरसंकोचान्नामकरणादिवत्पुत्रविवाहेपि -
परकर्तृकमाभ्युदयिकमायातीतिचेन्न पुमाँस्त्विये-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ति सुतसंस्कारेत्यत्रसुतासुतपदयोर्विगृहीतयोरेक-
शेषेपूर्वपादत्रयार्थान्वयस्य सर्वत्राबाधितत्वात् च
तुर्थपादान्वयस्तु पुत्रविवाहातिरिक्तेसर्वत्र योग्य-
ताबलात् वस्तुतस्तु चतुर्थपादान्वयोनपुत्रविवा-
हेप्रापकाभावात् नहिपितापितामहोभ्रातेतिवच-
नप्रयुक्तकन्याविवाहवत्परेषांतत्राधिकारः श्रूयते-
नामकरणादौप्रधानाधिकारवदंगेधिकारबोधनात् ।
नैमित्तिकेतुसुतरामतएवापुत्रस्य कन्याविवाहे त-
दीयमाभ्युदयिकं कन्यावच्चकन्यादानाधिकारिणा-
कार्य्यमितिनिबन्धारएकवाक्यतयालिखन्तीतिदि-
दिक् ॥ गौडास्तु स्वविवाहेनैमित्तिकमंगीभूतंवरक-
र्तृकमाभ्युदयिकंश्राद्धमिति तन्मन्दम् तथाहिपित-
रिजीवतिमृतेवानोभयथाप्रापकाभावात् नचस्व-
पितृभ्यः पितादद्यात्सुतसंस्कारकर्म्मणि पिंडानो-
द्वाहनात्तेषांतस्याभावेतुतत्क्रमात् ॥ तथा ॥ अष्टौसं
स्कारकर्म्माणिगर्भाधानमितिस्वयं पिताकुर्य्यात्तद-
न्योवातदभावेतुतत्क्रमादित्येतत्प्रापकमस्तु एतयो-
रुपनयनादिवत् संस्कर्तृकर्तृकश्राद्धक्रमविधायक-
त्वात् स्वविवाहेपरेषांसंस्कर्तृकर्तृत्वाभावात् अ-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तएवावश्यकार्य्याः संस्काराःपैतृकादैवतह्वनादित्य-
त्रसंस्काराउपनयनान्ताविवक्षिता इतिसिद्धान्तः
ननुतथापिनानिष्ट्वातुपितॄन्श्राद्धे कर्म्मवैदिकमाच-
रेदित्ययंवप्रापकमस्तु अस्यापिश्राद्धवत्कर्म्मपरत्वा-
त् प्रकृतेतस्याविचार्य्यत्वात् नचयज्ञोद्वाहादिमंग-
लइत्येवविधायकमितिवाच्यं अस्यकन्यापुत्रवि-
वाहेचेत्यादिवचनैकवाक्यतयाकृष्यन्तरोक्तकन्या-
पुत्रविवाहविषयत्वात् ॥ किंच नान्दीमुखेभ्यः
श्राद्धन्तुपितृभ्यः कार्यंप्रमृद्धयेततोविवाहः कर्तव्यः
शुद्धःसुतफलप्रदइत्यादिकाम्यश्राद्धबोधकवाधित-
त्वात् । तस्याभावेतुतत्क्रमादिति तस्याभावेतस्य-
संस्कर्तृत्वाभावे इत्यस्यैवतदर्थत्वात् पिताकुर्य्या-
त्तदन्योवेत्यनास्थावाचिवाशब्दस्वरसात् प्रथमंपि-
तृशब्दस्यैवस्फुटमुपात्तत्वेन संस्कर्तृत्वाभावस्यैवो-
चितत्वात् कर्तृभेदेनदेवताभेदाभावाच्च तस्याभा-
वेप्रायेणइतिकेचित् तन्नसकलनिबन्धविरोधात् ।
यद्यपिनानिष्ट्वातुपितॄन्श्राद्धे कर्म्मवैदिकमाचरे-
त् इतिवचनात् संस्कर्तुरेवपित्रादयः प्रतीयन्ते
तथापितदभावेतुतत्क्रमादित्येकवाक्यतया संस्कर-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णीयपितृसंबन्धिनएवपित्रादयोलभ्यन्ते यत्तुसंस्क-
र्तापिपितैवश्राद्धंकुर्यात् तद्बीजभूतसंस्कारस्यस-
त्वादितिचेन्न अष्टावित्यादिवाक्येनपितृसत्वेप्यन्य-
स्यसंस्कारकत्वेसिद्धे तत्क्रमादित्यनेनच तस्यश्रा-
द्धाधिकारस्यापिसिद्धेरिति ॥ पितुरसत्वेतुमाणव-
कवत् कन्यावच्चश्राद्धंकुर्यादित्याह कात्यायनः ॥
स्वपितृभ्यःपितादद्यात् सुतसंस्कारकर्म्मणिपिंडा-
नोद्वाहनात्तेषांतस्याभावेतुतत्क्रमात् । अस्यार्थः
तस्याभावेसंस्करणीयपितुरभावे तेषांपितृणांप्रकृते
दानेप्राप्ते तत्क्रमात् संस्कार्यत्रक्रमात् अन्यथाव्य-
वच्छेदोनस्यात् नतुतस्मिन्प्रमीतेतद्वदेवकार्यत्रमि-
तितदर्थः पूर्वकल्पव्यवच्छेदकतुशब्दस्वरसविरोधा-
त् तस्याभावेत्विवितिवचनात् वृद्धौसपिंडनस्यवैय-
र्थ्यापत्तेश्च नचैवमेवास्तु तथासतिहियदहर्वावृद्धिरा
पद्यतेइत्यनेनोक्तः सपिंडनकालोनस्यादेव नत्व-
सपिंडक्रियांकृत्वाकुर्यादभ्युदयन्तत इतिहारीत-
वचनेननान्दीमुखाधिकारस्यैवफलत्वान्नापितुरन्त-
र्भावस्येतिवाच्यं ब्राह्मणादिहतमित्यादिपरिसंख्या-
नवोधितपितामहोपक्रमकश्राद्धविरोधापत्तेरिति ०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अतएवतस्यकन्याविवाहेतदीयमाभ्युदयिकमितिनि
बन्धारः ॥ अतएवयोनामादिकर्तापितृहीनस्य सत-
दीयंपितरमारभ्याभ्युदयिकश्राद्धंकुर्यादितिवर्द्धमा-
नोपाध्यायचरणालिखन्तिस्म ॥ केचित्तुपूर्वप्राप्ता-
नांषण्णांमध्येव्यवयुत्यानुवादक्रमेण पंचाप्यनुप्रा-
प्ताः पिता तत्क्रमादित्यनेनविधीयतेतदन्तर्भाव-
बलेनच वृद्धप्रपितामहस्त्यज्यते मातृमातामहाद-
यस्तुसंस्करणीयपितुरेव तेषामित्यनेनस्वपितृभ्य-
इतिपितृपदस्मारिताः संस्करणीयपितृसंबन्धिनए-
वपित्रादयः प्रत्यवमृष्यन्त इतिवदन्ति तन्नतत्क्र-
मादित्यनेनप्रधानतयापितृहीनस्यैवप्रत्यवमर्षेवते-
रेवयुक्तत्वात् किंचसंस्करणीयपितुरभावेतेषांस्वपि-
तुः पितृणांप्रकृतेदानेप्राप्तेसंस्कार्यप्रपितृक्रमस्या-
र्थंतएवलाभेतत्क्रमादित्यस्यवैयर्थ्यापत्तेः ॥ त-
त्पदेनप्रस्तुतस्यसुतस्यप्रत्यवमर्षएवलाघवादेकसंब
न्धिनएव पित्रादयः प्रतीयन्तइति ॥ नन्वेतद्वचने-
पिअष्टावित्यादिवचनात् संस्कर्तृत्वाभावपरतैवा-
स्तु निर्वीजाध्याहारापत्तेः श्राद्धार्हस्यापिपितुस्त्या
गापत्तेः वृद्धौसपिंडनवैयर्थ्यापत्तेश्चेति ॥ अत्रापिषड-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रहिताभ्युदयिकेप्रमाणंस्मरन्ति ॥ यत्क्रियांदेश-
कालौचद्रव्यब्राह्मणसंपदः पंचैतान्विस्तरोहन्तित-
स्मान्नेहेतविस्तरं पूर्वाह्लादिमुहूर्तंकर्तव्यमंगलकर्मका
लातिक्रमादिदोषभयात्संक्षिप्तमपिफलमूलादिभि-
र्यथालाभंपिंडरहितमपि श्राद्धमाचार्यामन्यन्त
इत्यर्थः ॥ तथाचभविष्यपुराणे ॥ पिंडनिर्वपणंकु-
र्यान्नवाकुर्याद्विचक्षणः वृद्धिश्राद्धे कुलाचारदेश-
कालाद्यवेक्ष्यहि अग्नौकरणमर्घ्यंचावाहनंचावने-
जनम् पिंडश्राद्धे प्रकुर्वीतपिण्डहीनेत्रवर्जयेत् पिं-
डनिर्वापरहितंयत्र श्राद्धं प्रदीयतेस्वधावाचनलोपो-
स्ति विकिरस्तुनलुप्यते ॥ अक्षय्यादक्षिणास्वस्ति-
सौमनस्यमथास्त्विति अक्षय्योदकदानंच आशीः
प्रार्थनमेवचपिंडहीनेप्रकुर्व्वीतश्राद्धे चापिविचक्षण-
इति ॥ ० ॥ आभ्युदयिकेमात्रादिपिंडोत्तरंपि-
त्रादित्रिकपिंडास्ततो मातामहादित्रिकपिंडादेया
इत्येवक्रमः अत्रवदन्ति प्रदक्षिणमुपचारइतिका-
त्यायनसूत्रात्प्रदक्षिणक्रमेणैवपिंडानांदानेसिद्धे मा
त्रादिपिंडानांदक्षिणे पित्रादिपिंडत्रयदानं तद्दक्षि-
णेमातामहादिपिंडानांदानमिति तदयुक्तं प्राग-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रेष्वथदर्भेषुपितृनामन्त्रपूर्ववत् अपः क्षिपेन्मूलदेशे ऽवनेनिक्ष्वेतिनिस्तिलाः द्वितीयंचतृतीयंचमध्यदे- शाग्रदेशयोःमातामहप्रभृतींस्तुतेषामेवांहित्वामतइति परिशिष्टेविशेषाभिधानात् तेषांपित्राद्यवनेजनस्था नानांवामतउत्तरतोमातामहाद्यवनेजनस्यानेसिद्धे- यथावनिक्तंपिंडान् दद्यादितिकात्यायनसूत्रात्तत्रै- वतद्दानेनियतेवामत्वस्यैवसिद्धेः एवंमात्रादिपिंडा- नामपिप्रवामतैव एकत्रनिर्णीतइतिन्यायात् ननु- प्रत्यङ्मुखोपविष्टामांपितृणांब्राह्मणानांवावामत इ त्यस्यार्थस्तेनप्रकृतक्रमलाभइतिचेत् भ्रांतोसितेषा- मित्यनेन पूर्वप्रक्रांतानामास्तरणकुशानामवनेजन- स्थानांवाप्रत्यवमर्षौचित्यात् किंचउदङ्मुखेषुप्रा- ङ्मुखोवाप्रत्यङ्मुखेषूदङ्मुखोवादद्यादिति श्रुतेः प्रत्यङ्मुखतायांमानाभावादितिदिक् ओमद्यका- र्तिक्यांचैत्र्यांवामुककर्मांगभूतमाभ्युदयिकश्राद्धं म- हंकरिष्यइतीष्टयादौसंकल्पवाक्यं कन्यापुत्रविवा- हादेतुनैमित्तिकमाभ्युदयिकं तेनओमद्यपुत्रविवाह कर्मण्याभ्युदयिकश्राद्धमहंकरिष्यइतिनिमित्तसप्तमी सहितंवाक्यंकार्य्यम् यत्तुनांदीमुखेविवाहेचप्रपिता-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महपूर्वकं वाक्यमुच्चारयेद्विद्वानन्यत्रापितृपूर्वकमिति-
वचनात्कन्यादानवाक्यं यथाप्रपितामहपूर्वकंक्रियते
तथाभ्युदयिकसंकल्पवाक्यमपि कार्य्यमन्यत्रतुपार्व
णादौपितृपूर्वकमेवसंकल्पवाक्यं प्रयोजयन्ति तन्नए
तद्वाक्यस्यकल्पतरुपारिजातादिभिरलिखितत्वेननि-
र्मूलत्वावधारणात् समूलत्वेवाइदमेववाक्यंसंकल्प-
वाक्येप्रमाणमिति कथंशिष्टाचारपरिसमाप्तः संक-
ल्पइतिसकलनिबंधकृतोलिखन्तिस्म कथंवामुकपा-
र्वणमहंकरिष्यइतिसंकल्पवाक्यंलिखन्तः श्रीदत्तो-
पाध्यायाः पुरुषत्रयोल्लेखंजगुरिति ॥ कन्यादानवा-
क्यंतुतत्प्रपितामहपूर्वकत्वं तत्पैतापौत्रीमनुक्रमेदिति
तत्प्रकरणस्थवाक्यबलादिति तदर्थश्चपितृनिर्देशान-
न्तरंपुत्रनिर्देशः कार्य्यः तेनप्रपितामहपूर्वकतयाप्र
थमंप्रपितामहनिर्देशस्ततस्तत्पुत्रनिर्देशइतिसिध्य-
ति अत्रत्रैवार्षिकादिपदवदुभयपदवृद्ध्यापैतापौत्री
तिसिध्यति ॥ दानंत्वद्भिरेवकार्य्यं नतुतिलादेरपि
तत्रप्रवेशः अद्भिरेवद्विजाग्र्याणां कन्यादानंप्रशस्य-
तइति मनुवचनादिति तडागादौप्रतिनिधिनास्वपि
तृणामेवनान्दीमुखश्राद्धंकार्य्यं नानिष्टातुपितृभ्रा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्धे कर्म्मवैदिकमाचरेदित्यनेन स्वपितृणामेवपदि-
न्यायेनोपस्थितत्वात् संस्कारजनकेनामकरणादौ-
कन्याविवाहे माणवकपितृवत्कन्यापितृवंश्च माण-
वकवत्कन्यावश्चेतिवातत्पितृणामेव श्राद्धंस्वपितृभ्यः
पितादद्यात्सुतसंस्कारकर्म्मणि पिण्डानोद्वाहनात्ते-
षांतदभावेतुतत्क्रमादिति विशेषश्रुतेरिति छंदो-
गानांवृद्धिश्राद्धे गन्धादिदानेयेचात्रेतिस्वधेत्यंतोऽवि
कृतएवपाठोनतुतत्राप्यूहोहेत्वभावात् नचत्यागा-
र्थकतैवहेतुरितिवाच्यंसमस्तमन्त्रस्यैव त्यागार्थक-
त्वात् एवमेवकृत्यप्रदीपेपितामहचरणालिखन्ती-
ति यद्यपिनान्दीमुखान्पितॄन्हमावाहयिष्यइति-
पृच्छति नांदीमुखाः पितरः प्रीयन्तामित्यक्षय्य
स्थानेइतिकात्यायनसूत्रे तथाश्वलायनकारिकायां-
पितॄनितिपदात्पूर्वंपठेन्नान्दीमुखानिति कण्ठतएव-
नान्दीमुखपदस्यपूर्वंनिपातः श्रूयतेतथापिवैदिक-
प्रयोगएवायंनियमोनतुलौकिकत्यागवाक्येपि पितॄ
न्नान्दीमुखान्नामतर्पयेत्पितृपूर्वकामिति[illegible]
रसात् एवमेवसर्वानुमतः प्रयोगोपीति [illegible]
त्रिविधाप्रोक्ताविद्वद्भिः कर्म्मकारिणाम् [illegible]

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परोक्षाच्चतृतीयाचयथाक्रिया अक्रियेतियथोक्ताकांक्ष
याविरहः साचत्रेधाक्रियाविरहात् परोक्षाचरणात्
स्वोक्तक्रमविरहाच्चतत्राद्येसएवाह प्रधानस्याक्रिया
यत्रसांगंतत्क्रियतेपुनः तदंगस्याक्रियायान्तुनावृत्ति
र्नापितत्क्रियातत्क्रियातदंगमात्रंक्रियासापिनास्ति
किन्तुयोगियाज्ञवल्क्योक्तं विष्णुस्मरणमात्रंतत् द्वि
तीयेत्वाहसएवस्वशाखाश्रयमुत्सृज्यपरशाखाश्रय
न्तुयः कर्तुमिच्छतिदुर्म्मेधामोघन्तस्यतुतत्कृतमि-
ति इदन्तुतत्कर्म्मणः स्वशाखीयत्वेसतीतिबो-
द्धव्यं अन्यथातुपरशाखीयमपिग्राह्यमित्याह स-
एवयन्नाम्नातंस्वशाखायांपारक्यमविरोधियत् । वि-
द्वद्भिः स्तदनुष्ठेयमग्निहोत्रादिकर्म्मवत् यत्रतुस्व-
शाखायांस्तोकाभिधानंतत्राकांक्षापूर्वकं वाक्यमन्य
दीयमपिग्राह्यं स्मृतिशास्त्रविकल्पन्तुआकांक्षापूरणे
सतीतिश्रुते अथश्राद्धाधिकारिणः अधिकारानुक्रमो
शंखः भार्य्यापिण्डंपतिर्दद्यात् पत्येभार्य्यातथैवच-
श्वश्र्वादेस्तुस्नुषाचैवतदभावेसपिण्डकः अत्रश्वश्र्वादे
रित्यादिपदात् श्वशुरपरिग्रहः । तेनयथाश्वश्रूश्वशु
रयोः श्राद्धे स्नुषायाअधिकारः तथास्नुषायाः श्रा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्धं देवरादिसत्त्वेश्वश्रूश्वशुरयोः परस्परमधिकारस्तथै-
वचेतिवचनादितिपारिजातः तन्न तथैवचेत्यस्य-
प्रकारमात्रवाचकत्वात् अप्रकारार्थकत्वेनद्याजला
न्वयमत्पूर्वंत्रैवान्वयात् ॥ औरसेविद्यमानेकृत्रिमपु
त्रेणपुत्रत्वकरस्यश्राद्धं नकार्य्यं प्रापकाभावात् ननु-
पितुः पुत्रेणकर्तव्यापिण्डदानोदकक्रियेत्यत्रपुत्रेण-
द्वादशविधेनेतिरत्नाकरव्याख्यानात् । पुन्नामनर
कत्राणकर्तृ पुरुषत्वस्य पुत्रपदप्रवृत्तिनिमित्तस्यस-
त्त्वादस्त्वधिकार इतिचेन्न क्रमेणैतान्निर्द्दिश्य पि-
ण्डदोंशहरश्चैषां पूर्वाभावेपरः परइति याज्ञव-
ल्क्यवचनविरोधात् तत्कथमौरससत्त्वेपिपुत्रिका-
पुत्रक्षेत्रजदत्त्रिमकर्तृकश्राद्धं विशेषवचनादित्य-
वेहि अतएवकात्यायनः कुर्य्यान्मातामहश्राद्धं नि
यमात्पुत्रिकासुतः उभयोरर्थसंबन्धात् सकुर्य्या-
दुभयोरपि । बौधायनोपि । सएवद्विपिताद्विगो-
त्रश्चोभयोरपिस्वधारिक्थभागिति बृहस्पतिरपि
अथयदिस्वस्वभार्य्यायांस्वमपत्यंनस्यादथयदिस्या-
दुभाभ्यामेवदद्युः उपपन्नोगुणैस्सर्वैःपुत्रोयस्यतुद-
त्त्रिमः सहरेतैवतद्रिक्थंसंप्राप्तोप्यन्यगोत्रजः रिक्थ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गोत्रेजनयितुर्नहरेत्कृत्रिमः सुतः ऋक्थगोत्रानुगः पिंडोव्यपैतिददतःस्वधा मेवंच कात्यायनोक्ते नियमादिति॥ तथा बौधायनवचनेपि उभयोरपिस्वधाऋक्थभागितिश्रवणात् बृहस्पतिवचने चा थयदिदद्यात्तुभाभ्यामेवदद्यादितिकंठतएवश्रवणात्कृक्थ गोत्रानुगः पिण्डोव्यपैतिददतःस्वधामितिवाक्यादौरसेपुमत्पन्नेज्यैष्ठ्य तेषांनिवर्त्तत इतितत्प्रकरणेतन्मोऽपव्यु दासाच्च त्रयाणामधिकारस्यानिष्प्रत्यूहत्वात् किंचअपुत्रेणसुतः कार्य्यो यादृक्तादृक्प्रयन्ततः पिण्डोदकक्रियाहेतोर्नामसंकीर्त्तनस्यचेति हेतुमन्निगदस्वरसेनौरससत्वेपूर्वोपात्तस्यापि कृत्रिमपुत्रस्यसन्निहितप्रोषितत्वेन कार्य्यानिर्ज्जकत्वादौरसपुत्रेणैवतत्सिद्धेः तथाचकृत्रिमपुत्रसत्वे भार्याशिशुपुत्रवतःप्रमीतस्य षोडशश्राद्धानिभार्य्ययैव कार्याणि तदभावएवतदुपादानस्यन्याय्यत्वेन तदुत्पत्तिमात्रेणैवतस्य पिण्डदत्वनिरासादतएवशिष्टाचारोप्येवमेवेतिदिक् ॥ देवलःचतुर्वर्णेषुचारिष्वाश्रमयोःपूर्वजन्मतः यस्यजातस्यसमयाः पश्यन्तिप्रथमं मुखं । सन्तानः पितरश्चैव तस्मिन्सर्वेप्रतिष्ठिताः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मनुः। सदृशस्त्रीषुजातानां पुत्राणामविशेषतः न-
मातृतोज्यैष्ठ्यमस्ति जन्मतोज्यैष्ठ्यमुच्यते। और-
सादीन्पारशवान्तानभिधायनारदः पूर्वंपूर्वंस्मृतो-
ज्येष्ठोजघन्योयोयउत्तरः क्रमादेतेप्रवर्तन्तेमृतेपि-
तरितद्धने। देवलः। पुत्रिकायांकृतायान्तुयदिपु-
त्रोनुजायते समस्तत्रविभागस्स्यात् ज्येष्ठतानास्ति-
हिस्त्रियाः तदेतेषांवचनानांपर्यालोचनयासदृ-
सस्त्रीषुवैकस्त्रीणांवाजातानामग्रजएवज्येष्ठस्तुल्य
मातृकयोः समकालप्रसूतयोः प्राथमिकपितृसाक्षा-
त्कारविषयएवज्येष्ठोदैवाद्युगपत्साक्षात्कारविषय-
त्वेचगुरोरिच्छया मृतेज्येष्ठेवर्तमानापेक्षयाग्रजए-
वानन्यगतिकत्वात् यमजयोरग्रजएवज्येष्ठोद्विजा-
सुपश्चाज्जातोपि ब्राह्मणीसुतएववर्णोत्कर्षादेवमेव-
क्षत्रियावैश्यापुत्रयोरपिक्षत्रियापुत्रएवज्येष्ठः पुत्रि-
कापुत्रादिषुपारशवान्तेषुपश्चादुत्पन्नोप्यौरसएवज्ये-
ष्ठः एतस्मिन्नेवतुपुत्रेबाधकाभावेसतिपुत्रान्तराखं
डितयोनिसमुत्थत्वात् पुत्रिकापुत्रादिषुसर्वेषु पा-
ठिकक्रमसिद्धएवज्येष्ठस्तेनात्राननुगमोनदोषोवाच-
निकत्वात॥ एवंचसर्वेषांतुमतंज्ञात्वा ज्येष्ठेनैके-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नयत्कृतं । द्रव्येणचाविभक्तेनसर्वैरेवकृतंभवेदि-
ति । अत्रप्रयोगोपसंहारसमर्थस्य तस्यैवश्राद्धा-
धिकारइतिनिर्गलितम् । द्विजपुत्रास्तुसर्वेऔर-
साः पारशवस्यैवमगत्योपादानादिति ॥ ननुच-
अपुत्रेणसुतःकार्य्यो याहृक्ताहृक्प्रयत्नत इत्यादि-
स्वरसात् सर्वेतेनैवपुत्रेणपुत्रिणोमनुरब्रवीत् इत्या-
द्यतिदेशाप्रवृत्तौभ्रातुः पुत्रद्वादशविधपुत्रेषुचासत्सु-
पौत्रेविद्यमानेपि पुत्रकरणमस्त्यतिचेत् नैवम् ।
पुत्रकरणंहिअपत्यमुत्पादनीयमिति नित्यविधि-
परिपालनार्थम् पिण्डोदकक्रियार्थंवानतयोरपि-
पौत्रेणैवतत्सिद्धेः अतएवपुत्रेषु चासत्सुपौत्रेसति-
पितामहः पितुः पश्चात्पंचत्वंयदिगच्छति पौत्रेणै-
कादशाहादिकर्तव्यं श्राद्धषोडशमितिकात्यायनो
प्याहप्रपौत्रसत्वेप्येवंतथाच यस्मिन्सति पिण्डादि-
क्रियानिर्वहतिनित्यविधिपरिपालनन्तुनभवति त-
स्मिन्सत्यपिकृत्रिमपुत्रकरणंशास्त्रार्थः ननुकथंत-
र्हिपौत्रसत्वेऔरसस्योत्पन्नस्येयत्नःतस्यसर्व्वाभ्यर्हि-
तत्वात् पुत्रः पौत्रः प्रपौत्रोवेतिक्रमनिर्देशस्वरसा
त् कृत्रिमादयस्तु नौरससमाः पुत्राः पुन्नामनर-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कन्यात्वेऽपि सन्तानानिर्वाहकत्वात् अतएवाऽयं-
विनायथातैलंसद्भिःप्रतिनिधीकृतम् इत्याद्यौर-
सापेक्षयाकृत्रिमाद्यपकर्षकथनम् नचपौत्रसत्वेपि-
पुन्नामनरकत्राणार्थं पुत्रकरणमावश्यकमितिवाच्यं
पुत्रंविनापौत्रस्यासम्भवेनतत्पुत्रवत्तयैवपुन्नामन -
रकत्राणसिद्धेः अतएवतदुत्पत्तौयतेतसइतिपुत्रो-
त्पत्तौविधिः तस्योत्पत्त्यैवपुन्नामनरकत्राणपितृ-
ऋणनिस्तारयोः संभवात् अपत्यमुत्पादनीयमि-
तिविधेरपिततएवनिर्व्यूढत्वादिति ॥ ० ॥ बहूना-
मेकजातानामेकश्चेत् पुत्रवान्भवेत् । सर्वेतेनैवपु-
त्रेणपुत्रिणोमनुरब्रवीत् ॥ तथाबह्वीनामेकपत्नीना-
मेकाचेत्पुत्रिणीभवेत् सर्व्वास्तेनैवपुत्रेणपुत्रिण्यो
मनुरब्रवीत् इत्युभयत्रापि पुत्रत्वातिदेशः पुत्रि-
णीत्वातिदेशएवोपसंहारादितिपरमगुरवः अन्ये-
तुतेनपुत्रेणेतिश्रवणादुभयत्रापिपुत्रत्वातिदेशएवे -
ति ॥ अपरेतुविनिगमनाविरहादुभयातिदेशएवे-
त्याहुः ॥ तन्नद्वितीयः एवंसतिपुत्रत्वातिदेशस्यो
भयस्याप्यनारम्भ्यत्वापत्तेः प्रथमप्रतीकेनैवकृतकृ-
त्यत्वात् अश्रवणात् अतएवनतृतीयोऽपि एकेनैव-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्निष्पन्नत्वात् ॥ वस्तुतस्तु सपत्नीपुत्रे पुत्रत्वन्नातिदिश्यतेऽश्रवणात् किन्तु सपत्नीमातरि पुत्रिणीत्वं एतेन तेन पुत्रेण पुत्रिण्य इत्यभिधानात् तस्य पुत्रत्वमतिदिशदेव वाक्यं तासां पुत्रिणीत्वमप्युपदिशतीति परास्तम् अतिदेशोपदेशरूपार्थभेदेन वाक्यभेदापत्तेश्च नचतेन पुत्रेणेति पुत्रत्वातिदेशः पुत्रिण्य इति च तत्सम्बन्धविधानमात्रमिति वाच्यम् तत्सम्बन्धस्य प्रमाणान्तरसिद्धतया विधानायोगात् अन्यतः प्राप्तेशास्त्रानारम्भात् तस्माद्यथा स्त्रीयेन धनेन धनीत्यत्र द्वाभ्यामपि धनशब्दाभ्यामेकस्मिन्नपि धने विहिततद्धनसम्बन्धो वाक्यार्थः तथा तेन पुत्रेण पुत्रिण्य इत्यत्रापि द्वाभ्याम्पुत्रपदाभ्यामुपस्थापितस्य सपत्नीपुत्रस्य जनकत्वलक्षणस्सम्बन्धो वाच्यतार्हः स च तदजनन्यान्तरस्याम्बाधित इति सूक्तम् पुत्रिणीत्वातिदेशोयमिति ॥ ० ॥ यद्यपि स्त्रीश्राद्धे दुहितुरधिकारः कण्ठतोपि कथितस्तथापि दुहिता पुत्रवत्कुर्य्यान्मातापित्रोस्तु संस्कृता अशौचमुदकम्पिण्डमेकोद्दिष्टन्तयोरपीति वचनात् सपत्नीपुत्रानन्तरं दुहितुरधिकार इति अत्र संस्कृतेति विशेषश्रवणादसंस्कृताया

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्सुतरामधिकारएकगोत्रत्वात् श्राद्धविवेकेतुपुत्रा-
नन्तरमेवदुहितुरधिकारइत्युक्तम् पुत्रवदितिश्रुते-
रिति तन्नतस्यप्रकारार्थकत्वात् पुत्रिणीत्वातिदे-
शविरोधापत्तेश्चेतिदिक् अनूढायास्तुपूर्वक्रिया-
तस्यास्सपिण्डीकरणनिषेधात् किञ्चतस्याःश्राद्ध-
स्यावश्यकतायांमानाभावेनब्रह्मपुराणीयकल्पेप्यधि
काराभावात प्रत्युततत्श्राद्धमशुद्धौत्वित्यादिनाजा
त्युक्त शावाशौचमुपक्रम्यैवतस्यकथनाच्चेति नचैवं
मित्रबन्धुसपिण्डेभ्यस्त्रीकुमारीभ्यएवच दद्यात्तुमा
सिकंश्राद्धं साम्बत्सरमतःपरम् इत्यादिविरोधः तस्या
नेकवचनपर्य्यालोचनयानूढापुत्रमात्रविषयकत्वाद-
तएवदत्तानाञ्चाप्यदत्तानांकन्यानांकुरुते पितेत्यत्राद
त्तानां पूर्वक्रियापरतयासङ्कोचः पितुरेवाधिकार
श्चेति ये तुएष्टव्याबहवःपुत्राश्शीलवन्तोगुणान्विताः
तेषांवैसमवेतानांयद्येकोपिगयाम्ब्रजेदित्यत्रसमवेता
नामविभक्तानामितिव्याख्यायगयाश्राद्धे विभक्ता
नामपिपृथगधिकारइतिवदन्तितेभ्रांताःभ्रातृणामवि-
भक्तानामेकोधर्म्मः प्रवर्तते विभागेसतिधर्म्मोयम्
भवेत्तेषामपृथक्पृथक् यद्येकजाताबहवः पृथक्जा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ताः पृथक्क्रियाः सम्यक्कर्म्म गुणोपेतानचैतत्कृत्यस
न्तताः इत्यादिनारदवचनबलात् बाधसापेक्षाति-
व्याप्तेः किन्तुसमवेतानामित्यस्यतदर्थकत्वे प्रमा-
णाभावेनमिलितानामित्यस्यैवतदर्थकत्वात् लिखि
तवचनादेवसंसर्गानन्तरन्नपृथगधिकारइतिद्रष्टव्यम्
पुन्नाम्नोनरकाद्यस्मात्पितरन्त्रायतेसुतः मुखसन्दर्श
नेनापिपुत्रोत्पन्नीयतेतसः ऋणमस्मिन्सन्नयति-
अमृतत्वञ्चविन्दति पितापुत्रस्यजातस्यपश्येच्चेज्जी
वतोमुखम् यत्रक्वचनजातेनपितापुत्रेणनन्दतीत्या
दिवचनवलादौरसएवपुत्रपदंशक्तम् तेनसवर्णत्वेस
तिस्वजन्यपुंस्त्वमेवशक्यतावच्छेदकमितिक्षेत्रजादा
वन्यत्रलक्षणेतिकेचित् अन्येतुआज्यंविनायथातै
लंसद्भिःप्रतिनिधीकृतम् तथैकादशपुत्रास्तुपुत्रिकौ
रसयोर्विनेति तथाक्षेत्रजादीन्सुतानेतानेकादशय
थोचितान् पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनी
षिण इत्याभ्यामेकादशानांप्रतिनिधित्वंकण्ठतो-
दर्शितं प्रतिनिधित्वञ्चयवगोधूमयोरिव तद्भिन्न
त्वेसत्येवतत्कार्य्यकारित्वमतएवतदुभयान्यतरत्वंश
क्यतावच्छेदकमित्याहुः यस्तुतस्तुत्रयोदशान्यतम-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वेसतिपुन्नामनरकत्राणकर्तृपुरुषत्वमेवशक्यतावच्छे-
दकमतएवसपत्नीपुत्रभ्रातृपुत्रयोरपिव्याप्तिन्नैरतएव-
त्रयोदशानामपिपुत्रत्वमविकलमेवेतिप्रथमोद्विती-
यस्तृतीय इत्याद्यनेकसूत्रे पुत्रान्द्वादशयानाहमनुः
स्वायम्भवोनृणाम् पुत्रास्तुद्वादशप्रोक्तामनुनायेन
पूर्वशःतथापारशवस्त्रयोदशइत्यत्र सर्वत्रतेषांसर्वे-
षामपिपुत्रत्वेननिर्द्देशात् पितरंत्रायतेइत्यस्यैवप-
रंशक्तिवीजत्वेनोपादानात्तस्यचसर्वत्रैवसत्वादन्य-
थापुत्रित्वातिदेशानुपपत्तेः बहुवाधापत्तेश्चे ति कथ-
न्तर्हितदुत्पन्नावित्यादिकथनं तस्यसर्वस्मादभ्यर्हित
त्वादतएवप्रतिनिधित्वमपितयोरपेक्षयाकिञ्चिन्न्यू-
नत्वमपितुनतद्भिन्नत्वमपि । पुत्रान्द्वादशयानाह-
मनुः स्वायम्भवोनृणाम् सन्तानकारिणस्तेषामौर-
सः पुत्रिकातथेतिशब्दतएवाभिधानादितिदिक् ए-
वञ्चपितरत्रावनेनिक्ष्व पितामहात्रावनेनिक्ष्वप्रपि-
तामहावनेनिक्ष्वेतिश्रुत्या तथा पितरिदन्तेऽर्घ्यम्
पितामहेदन्तेऽर्घ्यम्प्रपितामहेदन्तेऽर्घ्यमितिश्रुत्याच-
देवतात्वनिर्णयाद्वाचनिकत्वादौरसेनपुत्रिकापुत्रेण-
क्षेत्रजेनदत्रिमेणैवचपार्वणंकार्यन्नामिति । मृतेपि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तरिपुत्रेणक्रियाकार्य्याविधानतइतिवाक्यात् कृत्रिमादिनापिपितृपदेनैवश्राद्धानिकार्य्याणि पुत्रेणद्वाशविधपुत्रेणेतिरत्नाकरव्याख्यानात् लक्षणायाअलौकिकत्वेनन्याय्यत्वात् शब्दान्तरस्याश्रुतत्वात् क्षेत्रजादावश्यवक्तव्यत्वाच्च यत्रचवहवओरसपुत्रास्तत्रापिप्रेतश्राद्धे ज्येष्ठएवाधिकारीप्राथम्यात् कपालाधिकरणन्यायात् नतुसर्वैर्व्यविनिगमनापत्तेः यत्तुज्येष्ठेक्षतादिनादूषिते तत्कनिष्ठस्यपुत्रत्वेनस्वरूपयोग्यस्य विहितकालीनाधिकारिज्येष्ठाभावरूपायाःसहकारियोग्यतायास्सत्वात् ज्येष्ठसत्वेपितदधिकाराभावेनविशेषणाभावायत्ताविशिष्टाभावसत्वात् कर्तृत्वमस्त्वितिचेन्न ज्येष्ठत्वेनाधिकारात् राज्ञइवराजसूये अधिकृतस्यैवकर्तृत्वात् नचपुत्रत्वेनाधिकारिताव्यविनिगमनापत्तेरुक्तत्वात् नचतस्याशौचेनाधिकार्य्यन्तरकल्पनावीजाभावात् अथाशौचान्तदिनआद्यश्राद्धस्य विहितत्वात्तद्दिनेतस्यावश्यकतयातेनैवकनिष्ठाधिकार आक्षिप्यतइति चेत्नहिविधिरेवनियमाविधिस्तयोर्भेदात् ऋष्यशृङ्गेणदेयेपितृणामित्यनेनाशौचान्तश्राद्धस्योपदेशाच्चअ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तएवदेशान्तरितेपि ज्येष्ठेकनिष्ठाधिकारः परास्तः पुत्रत्वेनस्वरूपयोग्यतायां देशान्तरितज्येष्ठत्वेनसहकारियोग्यतायाम्मानाभावात् किञ्च तन्मतेकनिष्ठेनश्राद्धेकृतेज्येष्ठेनपुनस्तत्करणम् प्रेतत्वनाशाय प्रायश्चित्तायवा नाद्यः ध्वस्तस्यध्वंसानुपपत्तेः नापरो धिकारिणैवश्राद्धस्यानुष्ठितत्वेनाकांक्षाविरहात् वस्तुतस्तु वहवःस्युर्यदापुत्राः पितुरेकत्रवासिनः सर्वेषान्तुमतंकृत्वाज्येष्ठेनैकेनयत्कृतम् द्रव्येणचाविभक्तेनसर्वैरेवकृतम्भवेदिति मरीचिवचनादेवाविभक्तवहुपुत्रसत्वेपिज्येष्ठस्यैवाधिकारः एवम्विभक्तवहुपुत्रसत्वेपि सपिण्डीकरणंयावत्प्रेतश्राद्धानिषोडश पृथक् नैवसुताःकुर्युः पृथक्द्रव्याअपिक्वचित् इतिहारीतवचनादेवविभक्तवहुपुत्रसत्वेपिज्येष्ठस्यैवाधिकारइतिप्रमितेः अथैतद्वचनाभ्यामत्रज्येष्ठस्यैवाधिकारसिद्धेः पितुः पुत्रेणकर्तव्यापिण्डदानादिकक्रियेत्यत्रापिपुत्रपदं ज्येष्ठपुत्रपरमेव एकमूलकल्पनालाघवात् नचैवम्पतितादिज्येष्ठेऽ्यातिप्रसंगः ज्येष्ठस्यापिप्रयोगोपसंहारसामर्थ्येसत्येवाधिकारात स्वर्गकामोऽग्निष्टोमेनयजेतेत्यत्र व ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवम्भूतत्वकनीयसोधिकारः नचैवंक्षताद्यशौचादावपीतिज्येष्ठएवप्रसङ्गः तत्रदेयेपितॄणांश्राद्धे इत्यनेनतस्यैवाशौचान्तेतदनुष्ठाननिर्देशात् ननुचाविभक्तानामपिकनीयसामधिकारएव किन्त्वनुमतिद्वारैवतेषांकर्तृत्वम् सर्वेषान्तुमतङ्कृत्वेतिवचनात् विभक्तानान्तुसुतरामधिकारः कथमन्यथातेषाङ्कथनमिति पृथक्नैवसुताः कुर्युः पृथक्द्रव्याअपिक्वचिदितिवचनेननिषिध्यतइति मैवम् ज्येष्ठकर्तृक प्रयोगोपसंहारेतत्समर्थस्यैव ज्येष्ठस्याधिकारात् नह्यन्यत्कर्तृकेप्रयोगेऽन्यस्यकर्तृत्वंसम्भवति तस्मात्सर्वैरेवकृतम्भवेदितिमुख्यकर्तृत्वानुपपत्तेः नज्येष्ठस्तुतिमात्रन्तत् सर्वेषान्तुमतमित्याविभक्तधनत्वपक्षप्राप्तस्यैकपाकेनवसतामित्यादिवचनेश्राद्धस्यसकृत्करणस्यानुवादएव नतुसर्वकर्तृत्वविधिरसम्भवात् एवंप्रेतत्वविमुक्तिफलस्यावश्यक ज्येष्ठप्रयोगादेवसिद्धेरर्थप्राप्तस्यैव विभक्तकनीयसां पृथक्नैवसुताः कुर्युरित्यनुवादएव तस्मात् सुष्ठूक्तं ज्येष्ठएवाधिकारीति श्राद्धे आविकंमागमौष्ट्रंच सर्वमेकशफञ्चयत् माहिषञ्चामरञ्चैव पयो-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वर्ज्यँ विजानता एवञ्चात्रमाहिषीदुग्धनिषेधात् तद्ध-
र्मोपि निषेधइति केचित्तन्न यावद्वचनंहिवाचनिक-
मितिन्यायबिरोधात् अतएवतद्विकाराअनिषिद्धा-
इतितत्वम् ॥ एवम्भगवन्नैवेद्येविष्णुःनाभक्ष्यंनैवेद्यं
नैवेद्यार्थे भक्ष्येअप्यजामहिषीक्षीरे पञ्चनखमां-
सानिदद्यादितिशेषः माहिषीमेषीच्छागीनां दुग्ध
दधिघृतान्यपेयानि तदुक्तं वराहपुराणे यद्यन्नममो
पभोग्यानिगव्यंदधिपयोघृतम् । आविकंमाहिषं-
छागमयज्ञीयमुदाहृतम् । इज्यतइतियज्ञः विष्णुः
अयज्ञीयमवैष्णवंमाहिषमाविकंछागमिति दुग्धद-
धिघृतमित्यस्यविशेषणम् ॥ षट्कयोरेवहारीतोक्त-
लक्षणपाते माधवादिषट्कएवमलमासइति वर्षक्र-
त्येअत्रचघटकन्यागतेसूर्य्ये वृश्चिकेवाथधन्वनि मकरे
वाथ कुम्भेवानाधिमासंविदुर्बुधाः इत्यनेनोक्तएकः
षट्कोऽपरश्चमाधवादारभ्य परिशिष्टश्चैत्रान्तइति-
सर्वंरमणीयम् श्राद्धचिन्तामणौ इदन्तुतुलादिष-
ट्कएवनत्वन्यदेतिद्रष्टव्यमिति । अत्रषट्कयोरेव-
लक्षणपातेमाधवादिषट्कएवमलमासः एकत्रमा-
सद्वितयंयदिस्यादब्दोधिकन्तत्रपरोधिमासइतिश्रुतेः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

घटकन्यागतेसूर्य्ये इत्युक्तवचनवलात् तुलादावेव-
लक्षणपाते तत्रापिमलमासः दशानांफाल्गुनादीनां
प्रायोमाघस्यचक्कचित् नपुंसकत्वमभवतिनतुपौष-
स्यकुत्रचिदितिवचनात् । नचसर्वत्रोत्तरस्यैवमल-
मासत्वनियमः घटकन्यागतइतिवचनोक्तनिषेधस्तु
पूर्वस्येति वाच्यम् घटादिविशेषनिषेधानुपपत्तेः
ज्योतिषे असंक्रान्तमासोधिमासः स्फुटः स्याद्वि-
संक्रान्तमासः क्षयाख्यः कदाचित् अयंक्षयाख्यः
कर्म्मार्हएवापवादकाभावादितिसाम्प्रदायिकाः के-
चित्तु यस्मिन्मासेनसंक्रान्तिः संक्रान्तिद्वयमेववा
संसर्प्पाहस्पतीमासा वधिमासः प्रकीर्तितः इति
पठित्वाद्विसंक्रान्तस्यमलमासस्यच रविणालंघित-
स्यापि त्रयाणामपिवहुवचनविरोधात् कर्म्मानर्ह-
त्वंप्रवदन्ति तन्न तद्वचनस्यनिर्म्मूलत्वात् प्रत्युतम-
लंवदन्तिमासस्यमासंमासविदोधिकम् नेहेतात्रवि-
शेषेज्या अन्यत्रावश्यकाद्दविधेः तथा मलिन्मुचस्तु
मासोवैमलिनः पापसम्भवः गर्हितः पितृदेवेभ्यः
सर्वंकर्म्मसुतन्त्यजेदित्यादिनापापसम्भूतस्यैवकर्म्मा
नर्हत्वादिति ॥ एकादश्यांतुशुक्लायामाषाढे भग-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वान्हरिः भुजंगशयनेशेतेयदाक्षीरार्णवेसदेतिवच-
नादेकादश्यामेवहरिशयनमितितत्वम् । केचित्तु
क्षीराब्धौशेषपर्य्यंक आषाढ्यांसंविशद्धरिः निद्रांत्य
जतिकार्त्तिक्यांतयोस्तं पूजयेत्सदेतिवचनादाषाढ़ी
पदस्य पूर्णिमाशक्ततयाषाढ्यामेवहरिशयनमिति
वदन्ति तन्मन्दम् । आषाढ़ीपदस्यपूर्ववाक्यैक-
वाक्यतयायोगेन तदेकादशीपरत्वादेकमूलकतानु-
रोधात् योगार्थस्यचैकवाक्यतयालघूपस्थितिक-
त्वात् अतएव तप्तेपयसिदध्यानयतिसा वैश्वदे-
व्यामिक्षाभवतिवाजिभ्योवाजिनमित्यत्रवाजिपदं -
नामिक्षारूपान्नवतांविश्वेदेवानामेववाजिनेपिदेवता
त्वन्नतुरुढ्यर्थानामश्वानां प्रकरणानुरोधादितिसि-
द्धान्तः केचित्तु कल्पभेदेनव्यवस्थामिच्छन्ति तदयु-
क्तम् । एकवाक्यत्वेसम्भवति वाक्यभेदकल्पनाया-
अन्याय्यत्वात् यदपि प्राप्तातेयंकिलकौमुदाख्या-
जागृध्वेतिवचनात् कार्त्तिकद्वादशीविषयस्यप्रबो-
धस्यमन्त्रलिंगजत्वाद्द्वादश्येवप्रबोधसमयस्तथाच-
शयनकालोपिसएव प्रबोधशयनयोरेकतिथिनिय-
मादिति । तदपिनलिङ्गापेक्षयाश्रुतेर्बलवत्वात् अ-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तएवश्रुतिलिङ्गप्रकरणेत्यादिजैमिनिसूत्रंसंगच्छते । द्वादश्यांसंधिसमयेनक्षत्रापायसम्भवे । आभाकासितपक्षस्य शयनावर्त्तनादिकमित्यादौसामीप्यलक्षणयातदेकादशीपरमितिशिष्टाचारोप्येवमिति॥माघवाद्येषुषट्स्वेवमासिदर्शद्वयम्भवेत् द्विराषाढःस विज्ञेयःशेतेचश्रावणेऽच्युतः अत्रोपसंहारवलाद्विराषाढोद्वितीयाषाढइतिकेचित् माधवाद्येष्वित्यादिविरोधात् किन्तुद्विराषाढोमलमासएवतथाचाठाढस्यैवद्विराषाढत्वंमलमासत्वेशेतेचश्रावणेऽच्युत इत्यत्रैवाषाढस्यैवकृष्णादिरीत्या चतुर्थपक्षेसौरश्रावणेतत्रनमिथुनार्कादरइत्यर्थः घटकेष्वित्युपलक्षणपरम् दशानांफाल्गुनादीनांप्रायोमाघस्यचक्वचित् नपुंसकत्वम्भवतिनतुपौषस्यकुत्रचिदितिस्मरणात् । यव्यद्वयंश्रावणादिसर्वानद्योरजस्वलाः तासुस्नानंनकुर्वीतवर्ज्जयित्वासमुद्रगाः यव्योमासः सचकृष्णादिरितिस्मृतिसारः शुक्लादिरितिसमयप्रदीपः सौरइतिरत्नाकरप्रभृतयः अयन्तुपक्षः श्रेयान् सिंहकर्कटयोर्म्मध्येसर्वानद्योरजस्वलाः तासुस्नानंनकुर्वीतदेवर्षिपितृतर्प्पणतिति श्रुतेराचाराच्च-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समुद्रगाः साक्षात्समुद्रगामिन्यः तास्तु गङ्गा-
महानदीतापीतुङ्गभद्राताम्रपर्णीकावेरीरेवासिन्धु-
नामानइत्येकादश शिष्टाः तपनस्यसुतागङ्गागो-
मतीचसरिद्वरा रजसाचनदुष्यन्तियेचान्येनदसंज्ञ-
काःइतिपठन्ति आदौकर्कटकेदेवीत्र्यहंयावद्रजस्वला
चतुर्थेऽहनिसंप्राप्ते शुद्धाभवतिजाह्नवी सिंहकर्कटयो-
र्मध्यइतिच ॥ अशून्यशयनव्रतेतुतथाकलत्रस-
म्बन्धोदेवमासेवियुज्यताम् इतिमन्त्रे स्त्रियाएतद्व्रते
क्रियमाणेपतिसम्बन्धइतिनोहः कार्य्यः पुरुषस्यस्त्रि
याश्चेतिप्रक्रमाद्युगपद्विधौ प्रकृतिविकृतिभावविर-
हेणोहासम्भवात् नचासमवेतार्थकतासम्बन्धस्यो-
भयघटिततयापतिमत्त्वस्याप्याशंसार्थत्वादिति॥ ति
थिवेधेगौडाः युग्माग्नीकृतुभूतानिषण्मून्योर्वसुर-
न्ध्रयोः रुद्रेणद्वादशीयुक्ताचतुर्द्दश्यातु पूर्णिमाप्रति-
पदात्वमावास्यातिथ्योर्युग्मंमहाफलम् एतद्व्यस्तं-
महाघोरंहन्तिपुण्यंपुराकृतम् । तिथ्योर्युग्ममितिसर्व
त्रापिसंबध्यते तेनैतदुक्तम्भवति द्वितीयातृतीयया-
मिश्राव्रतार्थंग्राह्याएवं तृतीयापिद्वितीयामिश्रा-
एवंयुग्मांतरेऽपिसहिततिथिग्रहणमेव एतद्व्यस्तमिति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूर्वोक्तविपरीतत्वकार्य्यमित्यर्थः चतुर्द्दशीचात्रशु-
क्लैव पूर्णिमायोगसामर्थ्यात् कृष्णाचतुर्द्दशी तुत्रयो
दशीयुक्तैव कामविद्धोहरः पूज्यइतिविशेषकथनात्
षष्ठ्यष्टमी अमावास्यातथाकृष्णात्रयोदशी एताः प-
रयुताः कार्य्याःपराःपूर्व्वेणसंयुताः एकादश्यष्टमीष-
ष्ठी द्वितीयाचचतुर्द्दशी अमावास्यात्रयोदश्याघु
पोष्याः स्युः परान्विताः इतिवचनादतएवरात्रिद्व-
येपिशिवरात्रिव्रतेयोग्यकाललाभेप्रथमदिनएवत्रयो
दशीमिश्रैवग्राह्या । अतएवोदयगानिन्यैवपरदिने
ग्राह्येतिपरेषाम्मतमपास्तम् पराः सप्तम्यादयएव
परयुताइत्यनेनतासामेव प्रकृततयोपस्थापनात् ए-
वंच कृष्णात्रयोदशीचतुर्द्दशीसहितोपोष्येतिसिद्धम्
प्रतिपदपिशुक्लैवामावास्यायोगात् तदेवंद्वितीया
दिद्वादशीपर्य्यन्ताःशुक्लाः कृष्णाश्चविशेषानुपदेशात्
एवंचदशमीनवमीमिश्रैवग्राह्याविशेषाश्रुतेः कृष्णाच
तुर्दशीत्रयोदशीमिश्रैव कृष्णाप्रतिपदपिपूर्णिमामिश्रै
वशुक्लत्रयोदशीद्वादशीमिश्रैव वैपरीत्येविशेषात्
युगमन्वादितृतीयादावुदयगामिन्यामखंड तिथौस्ना
नदानादिदेवंकर्म्मपूर्वाह्णे कार्य्यम् संदेहेवीजाभा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वात् उभयतिथिवेधे तृतीयादावुदयकाललाभेउत्त रदिनएवयुगाद्यावर्षवृद्धिरुक्तसप्तमीपार्वतीप्रिया सूर्य्योदयमपेक्षन्तेनतत्रतिथियुग्मतेतिवचनात् युगाद्याइतिपुण्यकालत्वेन मन्वादिपौर्णमास्यादीनामप्युपलक्षणम् न्यायतौल्यात् शिष्टाचाराच्च एवमुदयद्वयेपिकर्म्मयोग्यतृतीयालाभेप्रथमोदयगामिन्यामेव कपालाधिकरणन्यायात् नचरम्भाख्यांवर्ज्जयित्वातुगणयुक्ताप्रशस्यतइतिविशेषवचनात्तत्रापिचतुर्थीमिश्रैवग्राह्येतिवाच्यम् एतस्यलिंगाद्वैधविषयत्वेनाखंडतिथ्यविषयकत्वात् युगादिश्राद्धेतुयोग्यकालव्यापिनीग्राह्यादिनद्वयमध्याह्ने पितल्लाभेप्रथमेदिनएवप्रथमप्राप्तत्वात् सूर्य्योदयमपेक्षन्ते इत्यादिवचनानामत्राप्रवृत्तेश्चेतिसर्वंरमणीयम् अयंच युग्मविधिरहोरात्रसाध्योपवासादिकर्म्मणि सर्वत्रबोद्धव्यः देवपूजादावपिविहितपूर्वाह्नादिकाललाभेसति यदाचैकस्मिन्नेवदिनेविहितकाललाभस्तदातत्रैव उभयत्रविहितकाललाभ एवयुग्मविधेरपेक्षितत्वात्नियममात्रेलाघवाच्च व्यस्तानिन्दापितत्रैवविधिशेषत्वात् एवंचवचनान्तरेउपवासश्रुतिरुपलक्ष

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णम् केचित्तु उपवास एव युग्मविधिमिच्छन्ति ते हि भ्रान्ताः वचनान्तरविरोधात् निषेधनिन्दायां तु न युग्मविधिः अष्टम्यादौ मांसनिषेधस्य समस्तकालव्यापकत्वेनाक्षेपविरहात् । एवं च निषिद्धे कालवर्ज्जनमिति वचनं न्यायमूलकमेव भूपालमते तु सप्तम्येकादश्योर्वार्चनिकी व्यवस्था तिथ्यन्तरेषु तु प्रधानकालानुरोधात् उदयकालव्यापितिथ्यादरो ऽत एव व्रतोपवासनियमे घटिकैकापि या भवेत् सा तिथिः सकला ज्ञेया पित्रर्थे चापराह्णिकीति गौडीयवचनमपि न्यायमूलकमेव एवं नक्षत्रेऽपि द्वैधे उदयकालीननक्षत्रादर एव न्यायसाम्यात् ननु सप्तमीमुपवसेदिति विधिस्तिथिद्वैधे न सम्भवत्येव अहोरात्राभोजनरूपस्योपवासस्य सप्तम्यां कर्त्तुमशक्तेः तिथ्यन्तरसहकारितया नैरपेक्ष्यबाधापत्तेरिति चेन्न अहोरात्रावच्छेदेनैव सप्तम्याद्यन्वयात् तस्माद्यस्मिन्नहोरात्रे ताहृशसप्तम्यान्वयस्तत्र न भुञ्जीतेत्यस्यैव विधिशरीरत्वादिति रात्रिकालीने तु नक्तादिव्रते रात्रियोग एवादरणीयः पठन्ति च नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यत इति कार्त्तिकामावास्यामधिकृत्य दिवा तत्र न

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भोक्तव्यमृतेवालातुराज्जनात् प्रदोषसमयेलक्ष्मी-
म्पूजयित्वायथाविधीत्यत्र यद्यपितत्रेत्यनेनामावा-
स्यापरामृष्यते तथापिप्रदोषइतिश्रवणात् । दिवा-
भोजनरहितोलक्ष्मींसम्पूज्यभुञ्जीतेत्यर्थः तेनामा-
वास्याप्रदोषात्प्राक् चतुर्द्दश्यामप्यभोजनमेकवाक्य
तानुरोधात् अतएवोभयप्रदोषेतल्लाभेपिप्रथमप्रदो
षएवतदाचरणम् प्राथम्यात् रात्रिव्रतेषुसर्व्वेषुरा-
त्रियोगोविशिष्यतेइत्यादेः चतुर्थीचाप्यमावास्या
उपोष्याः स्युः परान्विताः इत्यस्यदिवातनवेधवि-
षयत्वादिति । आश्विनाधिकारेविष्णुधर्म्मोत्तरेति-
थिव्यवस्थायाम् । अष्टम्यानवमीयुक्तानवम्याचा-
ष्टमीयुता अर्द्धनारीश्वरप्राया उमामाहेश्वरीति-
थिः एकादश्यष्टमीषष्ठीद्वितीयाचचतुर्द्दशी चतुर्थी
चाप्यमावास्या उपोष्याःस्युः परान्विताः सप्तम्या-
चाष्टमीयुक्तानाष्टमीसप्तमीयुता सर्व्वेषुव्रतकालेषु
अष्टमीपरतः शुभाः । भोजराजोपि नदिवानिनि-
शानचाविष्टिहता नचसप्तमिशल्यसमोपहता । य-
दिचाष्टमिशेषभवानवमी अमरैरपिपूज्यतमाकथि
ता अष्टमीतिशेषः विश्वरूपः परित्यज्ययत्रयत्र-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नलभ्यते । तत्रपूजाबुधैः कार्य्यालंघनीयानक-
र्हिचित् विशिष्टत्यागोशक्यत्वेसएवाह । विशिष्टंत्य-
क्त्वामहाष्टम्यांपूजांयः कुरुतेजनः तस्यपूजान्नगृह्णा
मितेनाहमपमानिता जम्भेनसप्तमीविद्धापूजिताच-
महाष्टमी इन्द्रेणनिहतोजम्भस्तदादानवपुंगवः त-
स्मात्सर्वप्रयत्नेनसप्तमीमिश्रिताष्टमी वर्ज्जनीया-
हिमनुजैरात्मनः शुभकाङ्क्षिभिः सप्तमीशल्यसंयुक्तां
मोहादज्ञानतोपिवा महाष्टमींप्रकुर्व्वाणोनरकंप्रति-
पद्यते । दिनकृत्ये उभयस्मिन्दिनेऽष्टमीलाभेनवमी
युक्ताष्टमीकार्य्या । रात्रिकृत्येतु । तल्लाभेएव । या
तु सोपवासोनिशार्द्धेतु महाविभवविस्तरैरित्यनेन
विजयकामस्यतल्लाभेएवसूचितः आश्विनेशुक्लपक्षे
तुदशम्यां पूजयेत्ततः एकादश्यान्नकुर्वीतपूजनञ्चा-
पराजितामत्रैकादश्यान्नकुर्वीतेतिश्रवणादुभयत्रवि-
हितकालेदशमीलाभे पूर्व्वविद्धायासेवापराजिता
पूजादेवीविसर्ज्जनमपितदैवतदन्तापकर्षन्यायात्त-
दइतिश्रुतेरिति ॥ पूर्णिमामधिकृत्य । दिवातत्र-
नभोक्तव्यंमनुजैश्चविवेकिभिः स्त्रीबालवृद्धैर्म्मुर्खै-
श्चभोक्तव्यंपूजितैः सुरैः ॥ पूज्याश्चसफलैः पुष्पै-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्तथाद्वारोर्द्ध्वभिस्तय: द्वारोपान्तेप्रदीपस्तुसंपूज्यो-
हव्यवाहन: सम्पूजितश्च:पूर्णेन्दु: पयसापायसेनच-
रुद्र:सभार्य्य:स्कन्दश्चतथानन्दीश्वरोमुनि: गोमद्भि:
सुरभि:पूज्याच्छागवद्भिर्हुताशन: उरभ्रवद्भिर्वरुणोग
जवद्भिर्विनायक:पूज्य: साश्वैश्चरेमन्तोयथाविभववि
स्तरै: तथापूज्योनिकुम्भश्चसामिषैस्तिलतण्डुलैरि
त्यत्रनिकुम्भपर्य्यन्तानांपूजनंपूर्व्वाह्णएवानिरपवादश्रु
ते:पूजितै:सुरैरित्यादेर्लक्ष्मीन्द्रयो: पूजनन्तु रात्रावेव
कौमुद्यांपूजयेल्लक्ष्मीमिन्द्रमैरावतस्थितमितिविशेषा
त् ॥नच कान्ताप्रदीपदानस्य रात्रिकर्त्तव्यत्वेऽस्थिते
युगपत्तत्रकर्त्तव्याद्वादशैतेमहोत्सवा इत्यनेनयौगप-
द्यविधानादन्येपिरात्रिकर्त्तव्याएवेतिवाच्यम् तत्रेति
पदेनपूर्व्वंप्रक्रान्ताश्विनपूर्णिमामात्रपरामर्षेणाव्यप -
स्थापकपदविरहाच्च॥ ० ॥गौडास्तु अरुणोदयवेलायां
शुक्लामाघस्यसप्तमी प्रयागेयदिलभ्येतसहस्रार्कग्रहै:
समा तदित्थमत्रप्रयोग: ओं अद्यमाघशुक्लसप्तम्याम
रुणोदयवेलायांसूर्य्यग्रहकालीनप्रयोगस्नानजन्यपु -
ण्यसहस्रगुणपुण्यप्राप्तिकाम: प्रयागेस्नानमहङ्करिष्ये
इतिनतुकालेसहस्रार्कग्रहसम्बन्धोऽस्त्रसोयाथादिति॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अर्द्धोदयपरिभाषायांम ध्यदेशीयाः पठन्ति । अमार्क्के पातश्रवणैर्य्युक्ताचेत् पौषमाघयोःअर्द्धोदयः सविज्ञेयः सूर्य्यपर्व्वशताधिकः अमा अमावस्या अर्क्कोर विवारःपातोव्यतीपातः । अथमन्वन्तरादयः अश्व युक्कृष्णानवमीद्वादशीकार्त्तिकेतथातृतीयाचैत्रमास स्यतथाभाद्रपदस्यच फाल्गुनस्यत्वमावस्यापौषस्यैकादशीतथा आषाढस्यापिनवमीमाघमासस्यस प्तमी श्रावणस्याष्टमीकृष्णातथाषाढीचपूर्णिमा - कार्तिकीफाल्गुनीचैत्रीज्यैष्ठीपञ्चदशीसिता मन्व - न्तरादयस्त्वेतादत्तस्याक्षयकारिकाः इति यद्यपि कामधेनुनिबन्धेतृतीयामार्गमासस्येति पठितंतथापिकल्पतरुविरोधान्मधौतृतीयेति ज्योतिश्शास्त्रा च्चचैत्रतृतीयैवगृह्यते अथयुगाद्याः ब्रम्हपुराणेवैशाखशुक्लपक्षेचतृतीयायांकृतंयुगम् कार्तिकेशुक्लपक्षेतुत्रेताचनवम्यहनि अथभाद्रपदेकृष्णेत्रयोदश्यान्तुद्वापरम् माघेतुपौर्णमास्यांवैघोरंकलियुगंतथा युगारम्भास्तुतिथयोयुगाद्यास्तेनकीर्त्तिताः अत्रभाद्रकृष्णात्रयोदशीशुक्लादिरीत्याबोध्या औत्सर्गिकत्वात् लोकपरिग्रहाच्च नभस्यमासस्यतमिस्र-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पक्षेत्रयोदशीपञ्चदशीचमाघे इतिविष्णुपुराणीय
पञ्चदशीपदंपूर्णिमापरम् द्वयोरेकवाक्यताबलात्
किञ्चमाघावच्छेदेनपञ्चदशी पौर्णमास्येवप्राथम्यात्
नचतन्त्रतमिस्रपक्षइत्यनुषङ्गः ब्रम्हपुराणविरोधात्
एवञ्च दर्शेचमाघमासस्यप्रवृत्तंद्वापरंयुगमितिगौ-
डीयवचनमनाकरमेव साकरत्वेतुमन्वन्तरभेदेनस
मर्थनीयम् हरिहरपद्धतौतु पौर्णमास्यमावास्ययो-
र्युगादित्वेविकल्पउक्तः प्रवृत्यनुपपत्तिपराहतः ॥०॥
अथ। अवमंत्र्यहंच अवमन्तत्स्पृष्टशत्येकोयत्रयारास्त-
थित्रयम्। तिथिस्तुयत्रचारस्त्रीस्तत्त्र्यहं परिकीर्त्तित
म्॥अथरविसंक्रान्ति : द्वादशैवसमाख्याता : समा :
संक्रान्तिकल्पना : सप्तधासातुविज्ञेयाएकैकैवयथाश्रृ
णुमन्दामन्दाकिनीध्वांक्षीघोराचैवमहोदरी राक्षसी-
मिश्रिताचैवसंक्रान्तिस्सप्तधान्नृप समाः संक्रान्तित्वेन
त्यफला : अयनत्वादिरूपेणविशेषफलाअपि त्रिचतु:
पञ्चसप्ताष्टनवद्वादशएवच क्रमेणघटिकाएतास्त-
त्पुण्यंपारमार्थिकम् मन्दादिसप्तसुसंक्रान्तिषुक्रमे-
णयथासंख्यम् त्रिचतुरादिनाड्य : सूक्ष्मसंक्रमका-
लीनानुष्ठानजन्यपुण्यहेतवः घटिकाएवपुण्यहेतु-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वात्पुण्यमित्युक्तम् अतीतानागता भोगोनाड्यः प
ञ्चदशस्मृताः भोगोभोग्यः तेनातीतानागतरूपभो-
ग्यपञ्चदशनाड्यः पुण्यकालोभयतोरित्युक्तं भवति जा-
बालशातातपौ अर्व्वाक्षोडशविज्ञेयानाड्यः पश्चा
च्चषोडश कालःपुण्योर्क्कसंक्रान्तौविद्वद्भिः परिकीर्त्ति
तः संक्रान्तेः पुण्यकालस्तुषोडशोभयतः कलाः ए-
तद्दर्शनाच्च देवीपुराणेपि पञ्चदशनाडीभोगोप्युभय-
तएव तदपिपञ्चदशपदं स्वार्थायोगमात्रव्यवच्छेदप
रम् एतद्वचनबलादेव इदमपिदिवातनविष्णुपदी-
मात्रे । रात्रिसंक्रमणेऽनाकाङ्क्षितत्वादयनादावुद-
यवेलापुण्यनिषेधस्वरसाच्च । अयनादौदेवीपुराणम्।
अयनेतुविकल्पोयंतन्मेनिगदतः शृणु । यावद्विंशक-
लाभुक्तातत्पुण्यं तूत्तरायणे निरंशेभास्करेदृष्टेदिना-
न्तंदक्षिणायने । त्रिंशतिदण्डंयावत्पुण्यं उत्तरायणे
दक्षिणायनेतु दिनान्तपर्य्यन्तं संक्रान्तौ पुण्यमित्यु-
क्तम् तच्च षडशीतिमुखेचैत्रवृत्तेत्रविषुवद्द्वये भवि-
ष्यत्ययनेपुण्यमतीतेचोत्तरायणे । इत्यनेकपर्य्यालो-
चनयोत्तरायणेषडशीतिचतुष्टये विषुवद्द्वयेच संक्रा-
न्त्यनन्तरं दक्षिणायने संक्रान्तिपूर्वसमयेनेतव्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तदप्यनुक्तविशेषेविषुवद्वये षडशीति चतुष्टये षोडश
नाडीपर्य्यन्तमेवानुक्तविशेषेदृष्टत्वात् नचैवमुदया
नुपदमेवदक्षिणायनंसंक्रान्तौपुण्यंनस्यात् भ्रान्तो-
ऽसि भविष्यत्ययनेपुण्य मित्यादिनातत्रापितत्कथ-
नात् । सामानाधिकरण्यस्यमानाभावनिरस्तत्वात् ।
नचादिनान्तमित्येकवाक्यतयातदस्तु तस्यपक्षप्रा-
प्तानुवादत्वात् अन्यथातत्स्नानादिवाधापत्तेः नचैत
दिष्टमेव । दानाध्ययनजप्यादिविशिष्टंयज्ञहोमतः ।
वसोर्द्धारातुलभ्येत अन्यथानकथञ्चनेत्यादिवाधाप-
त्तेरिति । वस्तुतस्तु पञ्चदशपदस्यस्वार्थायोगव्य-
वच्छेदमात्रपरत्वेमानाभावादतएवानुक्तविशेषदक्षि-
णायनेविषुवेषडशीतिमुखेवाऽऽकांक्षासत्वात्तस्यैवा-
वच्छेदकत्वमितियुक्तमुत्पश्यामः तदेवंदिवासंक्रम-
णे व्यवस्थिते रात्रिसंक्रमणेदेवीपुराणम् मानार्द्धंभा
स्करेपुण्यसपूर्णेशर्व्वरीदले । सम्पूर्णेतूभयोर्हेयमति-
रेकेपरेऽहनि मानार्द्धम् दिनार्द्धम् भास्करे निरंश-
केदेयंयाज्यंदलेऽर्द्धे अतिरेके अर्द्धमात्रातिरेके । त-
दयमर्थः । अर्द्ध रात्राभ्यन्तरेरविसंक्रान्तौ पूर्व्वदि-
नोत्तरार्द्धम्पुण्यम् । अर्द्ध रात्रोपरिसंक्रमणे उत्तरदि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नेपूर्व्वार्द्धम् सम्पूर्णार्द्धरात्रेतुपूर्व्वदिनेउत्तरार्द्धं उत्तर-
दिने पूर्व्वार्द्धञ्च । एतच्चतिथिपार्थक्ये यदिचपूर्व्वदि-
नेसंक्रमवेलायाञ्चैकैवतिथिर्भवतितदापूर्णार्द्धरात्रेपि
संक्रमणे पूर्व्वदिनोत्तरार्द्धमेवपुण्यंभवति आदौपुण्यं-
विजानीयाद्यदाभिन्नातिथिर्भवेत् इतिवचनात् । गौ
डास्तुकलान्यूनेऽर्द्धरात्रेतुयदिसंक्रमणंरवेः । तदहः पु-
ण्यमिच्छन्तिगार्ग्यगौतमगालवाः ॥ तदहःपदंदिनो-
त्तरार्द्धमात्रपरम् अर्द्धरात्राद्धस्तस्मिन्मध्याह्नस्यो-
परिक्रियेतितल्लिखितवाक्यात् नन्वेवंरात्रिसंक्रमणे-
पिदिवैवपुण्यकथनात् राहुदर्शनसंक्रान्तिविवाहा-
त्ययवृद्धिषु ॥ स्नानदानादिकंकुर्य्यात् निशिकाम्यव्रते
षुचेतिवचनं रात्रिसंक्रान्तिकृत्यबोधकमनुपपन्नमि
तिचेत् नैवम् रात्रिसन्निहितसंक्रांतौतत्तत्षोडस-
कलादिरूपातीतानागतविहितसमयेन रात्रेरपिव्या-
पनात् तद्विषयत्वेनोपपत्तेः अत्रनिशीतिपदमजह-
त्स्वार्थलक्षणया पर्य्युदस्तसमयपर मन्यथा सायाः
न्हेविवाहादिसंक्रमोपरागयोः स्नानादिनस्यादि-
ति इदंतुचिन्त्यते रात्रिसंक्रान्तिरवचेत्यत्र पर्य्युदासनिषेधे
लाघवेनतद्दिनस्यैवग्रहेयता ननुपुण्यदिनस्यैवमाना

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भावात् अन्यथानकथंचनेत्यादिनातावन्मात्रएवा वच्छेदकत्वकल्पनादतएवाह रविसंक्रमणेपुण्येनस्नायाद्यस्तुमानवः। सप्तजन्मन्यसौरोगीदरिद्रश्चोपजायते ॥ ६ ॥ अथग्रहणम् ॥ चन्द्रसूर्योपरागेतुयावद्दर्शनगोचरः। उपरक्तदर्शनानन्तरं यावद्दर्शनगोचरो दर्शनयोग्य उपरागस्तावत्पुण्यकालोनतुसंक्रान्तिवदधिकोपीत्यर्थः। योग्यताचदर्शनानन्तरं यावदुपरक्तकालीनदर्शनाभावानुमापकलिंगविरहएव अत्रचसूर्य्योपरागानिमित्तत्वप्रतिपादनात् ज्ञातस्यनिमित्तत्वेन ज्ञानमात्रेप्राप्तेयावद्दर्शनगोचरः इतिश्रुतेः राहुदर्शनसंक्रान्तीतिश्रुतेश्च चाक्षुषज्ञानविषयस्यैवेहनिमित्तताचाक्षुषज्ञानएवदर्शनपदस्यशक्तत्वात् नचनेक्षेतोद्यन्तमादित्यंनास्तंयान्तं कदाचन। नोपरक्तंनवारिस्थंनमध्यं नभसोगतमिति मनुनातदानींदर्शननिषेधात्दर्शनपदानुरोधेन शेषस्यगोचरपदेनतद्योग्यतायालक्षितत्वात् वेदोवेत्यत्रतथैवसिद्धान्तनात् तत्राहि त्रयोवेदा अजायन्तइत्युपक्रमस्यवेदपदेनवेदनाजनकविभागपरतयातदभिधानात् तदनुरोधादुपसंहारस्थै ऋग्भिर्श्चाक्रियते उच्चैः साम्नाउपांशुयजुषा

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उच्चैर्निगदेनेत्यत्र ऋग्यजुस्सामपदैर्यपदेशनाजनक-
विभागाभिधानेतस्य चकरणत्वासंभवात् ऋगाद्या-
म्नातकर्म्माण्येवलक्षणयोच्यन्तइतिसिद्धान्तः अत्र-
च यजुष्युपांशुत्वविधानाद्यजुर्विशेषेनिगदे उच्चै-
स्त्वमप्राप्तमितितद्विधित्वात् अत्र दधितक्रवत्
सामान्यविशेषन्यायइतिकश्चित् तन्न निगदस्यप-
रसंबोधनार्थकयजुष्टु नोच्चैस्त्वस्यानुपलभ्यत्वेनवि-
शेषान्नदधितक्रवत्सामान्यविशेषन्यायः किंत्वनन्य
गत्यापूर्वान्वितमात्रान्वयाद्गोवृषन्यायेनसामान्यवि-
शेषन्यायात् अतएवदधितक्रन्यायस्यप्राप्तातिरि-
क्तस्यापि प्रापकत्वेनगोवृषन्यायस्यप्राप्तप्रापकत्वेन
सामान्यविशेषत्वेपिभेदइति योग्यताच दर्शनबाध-
कमानाभावरूपा साच मेघगुल्मादिव्यवहितेप्यस्ति-
मेघाद्युपगमेग्रासदर्शनस्यापिसंभवात् मेघाद्यावृत-
त्वेनदर्शनाभावस्यानुमानाभावात् दोषातनरविग्रह
दिवातनशशिग्रहयोस्तु दोषातनत्वादिनैवदर्शनाभा-
वोनुमातुंशक्यते इतिनतत्रयोग्यता । तेनैतादृशयो-
ग्यतालिंगितोग्रासोयावदनुवर्त्तते दर्शनानन्तरंताव-
त्पुण्यकालइति नप्रयत्नानपनेयप्रतिबन्धकाविरहो-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

योग्यतेतिकेचित् तन्नदर्शनोत्तरं मेघच्छन्नेप्यनधि-
कारापत्तेः किंचादिवातनशशिग्रहदोषातनरविग्रह-
योरतएवानिरासः यदिकोपिग्रासंपश्यतितदायो-
ग्यताज्ञायते मेघच्छन्नेकस्यचिद्दर्शनसंभवेनतत्रार्थतो
योग्यतापगमादितितल्लिखनविरोधापत्तेः अन्य-
दृष्टेग्रासेऽन्यस्यस्नानाधिकारइतिकेचित्तन्न लाघवे-
नसामानाधिकरण्यस्यैवप्रयोजकत्वात् राहुदर्शन-
संक्रांतिविवाहात्ययवृद्धिषु स्नानदानादिकं कुर्यान्ना-
निशिकाम्यव्रतेषुच ॥ ० ॥ सुर्य्यवारेरविग्रासश्चंद्र-
वारेशशिग्रहः चूडामणिरितिविख्यातस्तस्यानन्तफ
लंस्मृतम् ॥ इंद्रोर्लक्षगुणंप्रोक्तंरवेर्द्दशगुणन्तथा ॥
गंगातीरेतुसंप्राप्तेइंदोः कोटीरवेर्द्दश ॥ यत्तीर्थस्ना
नजन्यंप्रकृतंयत्फलंतदिंदुग्रहे लक्षगुणंभवति गंगाया
न्तुचन्द्रग्रहेकोटिगुणं रविग्रहे दशकोटिगुणंस्नानेफ-
लंभवतीत्यर्थः सूतकेमृतकेचैवनदोषोराहुदर्शनेता
वदेवभवेच्छुद्धिर्यावन्मुक्तिर्न्नदृश्यते ॥ सर्वेषामेववर्णा-
नां सूतकंराहुदर्शने स्नात्वाकर्माणिकुर्वीतशृतम
न्नंविवर्जयेत् ॥ सूत केमृतकेस्नायाद्ग्रस्तयोश्चन्द्रसु-
र्य्ययोः । अस्नायीमृत्युमाप्नोतिस्नायीपापन्नवि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्द्दति । एवंचैतद्वचनवलादेवतर्पणान्तं स्नानमशुचि
नापिकार्यमितिकेचित्तन्न एतद्वचनस्यैवनिर्म्मूल-
त्वात् । ग्रहणकालेचागतयाउद्धृतोदकेनस्नानकरणे
तदानीमेवजलाश्रयात्तोयमुद्धरणीयम् तेनस्वर्धुन्यं-
भस्समतात्तत्कालभूमिष्ठस्यतस्यभवति पूर्वोद्धृत-
स्यतस्यमानाभावेनतोयमात्रतैवस्वर्धुन्यंभस्स मा-
निस्युस्सर्वाण्यंभांसिभुतलइतिश्रुतेः ॥ अहोरात्रंचना
श्नीयाच्चन्द्रसूर्य्यग्रहोयदा मुक्तंदृष्ट्वातुभुंजीतस्ना-
नकृत्वाविधानतः सूर्याचन्द्रमसोर्लोकानक्षयान्याति
मानवः । धौतपाप्माविशुद्धात्मामोदतेतत्रदेववत्
इदंच राहोरात्रावनशनंकाम्यंफलश्रुतेः । तत्रापि-
मेघादितोमुक्तादर्शनपक्षएव मुक्तं दृष्ट्वातुभुंजीतेति
श्रुत्यामुक्तदर्शनानन्तरमत्रापिभोजनविधानात् ए-
वंक्रामनाविरहेतत्रापिमुक्तिं प्रमायभोक्तव्यमुक्तवच
नात् मुक्तस्यमेघतोऽदर्शनेप्यनुपदमस्तमनेवाभोज-
नमदुष्टमेव अतएवनाश्नीयादपतत्कालेग्रस्तयो-
श्चन्द्रसूर्य्ययोः । मुक्तयोश्चकृतस्नानः पश्चात्कुर्यात्
स्ववेश्मनि ॥ अत्रमुक्तयोरविधानेनमुक्तिमात्रस्यै-
वापेक्षणीयत्वसिद्धेः । कुर्य्यादित्यत्रावपरिणतमथ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमित्यनुषज्यते ॥ ज्योतिषे अर्द्धरात्रेव्यतीतेतुयदाचन्द्रग्रहोभवेत् सायन्तत्रनभुंजीतनतुप्रातरभोजनम् ॥ नाद्यात् सूर्य्यग्रहात्पूर्वमह्निसायंशशिग्रहात् ग्रहकालेचनाश्नीयात् स्नात्वाश्नीयाच्चमुक्तयोः ॥ मुक्तेशशिनिभुंजीतयदिनस्यान्महानिशामहानिशाच प्रथमसार्द्धप्रहरोत्तरमुहूर्तचतुष्टयम् । तथास्नात्वाहृष्ट्वापरेह्निरक्षाद्ग्रस्तास्तमितयोस्तयोः अत्रचग्रस्तास्तेयन्मुक्तिपर्य्यन्तमभोजनन्तदावश्यकम् एतद्वचनवलादेव । अतएव विष्णुरपि सूर्य्यचन्द्रोपरागेनाश्नीयान्मुक्तयोरस्तंगतयोर्दृष्ट्वास्नात्वापरेह्निचाश्नीयादिति दर्शनं ज्ञानंचाक्षुषज्ञानं तत्रैवदृशेः शक्तेः नचैवमुत्तरदिनेमेघाच्छन्नेऽप्यभोजनंस्यात्मेघजालादिदोषेणयदिमुक्तिर्नदृश्यते आकलय्यतुतत्कालंभुंजीताथविशंकितइतिनिरवकाशप्रवर्त्तमानवचनेन तदानीन्तत्रापिभोजनविधानात् बालवृद्धादेः प्रहरचतुष्टयमनशनाशक्तस्यार्द्धरात्रेव्यतीते इत्याद्युक्ताव्यवस्था अतएव गोतमः सूर्य्यग्रहेतुनाश्नीयात् पूर्वंयामचतुष्टयम् चन्द्रग्रहेतु यामांस्त्रीन् बालवृद्धातुरैर्विनेति ॥ अत्राप्यशक्तप्रतिमार्कण्डेयपु-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

राणे सायाह्ने ग्रहणंचेत्स्यात् अपराह्ले नभोजनं । अपराह्ले नमध्याह्ने मध्याह्ने चेन्नसंगवे ॥ ग्रहणं संगवेचेत्स्यान्नपूर्वंभोजनक्रियेति ॥ संक्रमोपरागादौ पूर्वदिनेतद्दिनेवायदुपोषणं काम्यमुक्तं तत्पुत्रवता गृहिणा नकार्य्यम् संक्रान्तौरविवारेच ग्रहणेचंद्रसूर्य्ययोः पारणं चोपवासंचनकुर्य्यात्पुत्रवान् गृहीतिवचनात् अयं चतन्निमित्तोपवासस्यनिषेधोनन्त्वेकादश्यादेरपि तन्निमित्तोपवासस्यनिषेधोयमुदाहृतः नानुषंगकृतोदोषोयतोनित्यमुपोषणमितिस्रवणात् वैधकर्म्मचिकीर्षुणातु ग्रहणपूर्वं सर्वथानभोक्तव्यं ततः शरीरस्रोतोभ्योमलनिस्यन्दविस्रवात् अन्नादीनां प्रवेशाच्चस्यादशुद्धिर्विशेषतइतिश्रुतेः ॥ नचार्द्धरात्रइत्यादिलिखितं वचनमप्रायत्योपमर्द्दकं वाधसापेक्षतापत्तेः किन्तुसुखरात्र्यादौवालादिभोजनवत् प्रत्यवायाभावमात्रवोधकमेव हन्त तथापितावदेवभवेच्छुद्धिरित्यादिवचनादशुचेरपिदानाधिकारोस्तुन । वचनस्यैवनिर्म्मूलत्वात् समूलत्वेप्युपसंहारानुरोधेन सांगस्नानमात्रवोधकत्वादिति ॥ * ॥ अथपतिव्रताधर्म्माः ॥ आर्त्तार्त्तेमुदिते-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हृष्टाप्रोषितेविमनास्तुया मृतेवामृयतेनारी साविज्ञेयापतिव्रता ॥ अतएवानुमरणपर्य्यन्तेनतन्निर्व्वाहः प्रोषितेतुविशेषमाह देशान्तरमृतेपत्यौ साध्वीतत्पादुकाद्वयम् निधायोरसिसंशुद्धाप्रविशेज्जातवेदसम् । अत्रपादुकाद्वयमुपलक्षणम् फलानितु मृतेभर्त्तरियानारीप्रविशेद्धव्यवाहनम् सारुंधतीसमाचारास्वर्गलोकेमहीयते ॥ तिस्रः कोट्योर्द्धकोटीचयानिरोमाणिमानवे तावन्त्यब्दानि सास्वर्गंभर्तारंयानुगच्छति । व्यालग्राहीयथाव्यालं वलादुद्धरतेविलात् तद्वद्भर्तारमादायतेनैवसहमोदते मात्रिकं पैत्रिकंचैवयत्रकन्याप्रदीयते पुनातित्रिकुलंनारीभर्तारंयानुगच्छति ॥ त्रिंशत्परान्त्रिंशदपरान्त्रिंशच्चपरतः परान् । पुनातित्रिकुलं नारीभर्तारं यानुगच्छति ब्रह्महावाकृतघ्नोवामित्रघ्नोवापिमानवः । तंवैपुनातिसानारीभर्त्तारं यानुगच्छतिसाध्वीनामेव नारीणामग्निप्रपतनादृते नान्योस्तिधर्म्मोविज्ञेयोमृतेभर्त्तरिकर्हिचित् । एवकारोऽप्यर्थः समुचितस्यैवफलस्यकामनाविषयत्वमेकवाक्यतावलात् पतिव्रतयापतिवयवधाने तद्भोजनकालमवधार्य्यतदु-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्तरंभोक्तव्यम् अतएव भारते नलव्यवधानेदमयन्त्याभोजनमुक्तमिति ॥ ० ॥ भविष्यपुराणम् ब्राह्मं पाद्मंवैष्णवञ्च शैवंभागवतंतथा ॥ कूर्म्मपुराणम् ॥ शैवंभागवतं चैवभविष्यन्नारदीयकम् ॥ अत्रोभयत्रापिभागवतं भगवतीपुराणमेव अतएव संहितायां तत्रतत्रतद्वचनान्येवोपगृहीतानि नत्वन्यत् निबन्धकृद्भिस्तद्वचनानामनुपग्रहात् अतएवभारतादिवत् स्मृत्याकारेणापरिणतत्वान्नतस्यप्रामाण्यमपीतितत्वं यत्तुक्षेत्रापरपुरग्रासंदत्वामत्समतामियादित्यादीनिनगरयाचकैरतिलुब्धैरुपगृहीतानि किंतावतेति ॥ ० ॥ मत्स्यपुराणे द्वियोजनमथार्द्धं च पूर्वपश्चिमतः स्थितम् वरणासिर्नदीयाच याचशुष्कनदीतथा । एषक्षेत्रस्यविस्तारः प्रोक्तोदेवेनशूलिना । अर्द्धयोजनविस्तीर्णं दक्षिणोत्तरतः स्थितम् वरणासिर्न्नदीया च याचशुष्कनदीतथा ॥ भीमचंडींसमारभ्यपर्वतेश्वरमन्तिके ॥ स्कन्दपुराणे ॥ चतुः क्रोशंचतुर्दिक्षुक्षेत्रमेतत्प्रकीर्तितम् । योजनं विद्धिचार्वंगिमृत्युकालेऽमृतप्रदम् अत्रचकल्पभेदेन परिमाणभेदोद्रष्टव्यः तेननविरोधः ॥ असीवरणयो-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्म्मध्येवाराणसीक्षेत्रमिति तु नियमएव । तेनासीतः पूर्वंवरणातः पश्चाद्वाराणसीक्षेत्रमितिरहस्यम् ॥ ० ॥ लिंगपुराणे शिववाक्यं पिंगलानामयाप्रोक्ताआग्नेयी साप्रकीर्तिता शुष्कासरिच्चसा ज्ञेया लोलार्कोयत्रतिष्ठति ॥ इड़ानाम्नीतुयानाड़ीसासौम्यासंप्रकीर्तिता वरणानामसाज्ञेया केशवोयत्रसंस्थितः ॥ आभ्यांमध्येतुयानाड़ीशुषुम्नासाप्रकीर्तिता मत्स्योदरीचसाज्ञेयाविषुवत्तत्प्रकीर्तितम् एवं लोलार्ककेशवयोः शुष्कनदीवरणातीरस्थयोर्मध्येमत्स्योदरीसंज्ञकनदी चिह्नितम् । असीवरणयोर्म्मध्ये वाराणसीक्षेत्रमितिवर्तुलार्थः ॥ असीतिगंगाक्षेत्रमग्नावरणासंगतावाराणसीक्षेत्रपूर्वस्थानदी नचवाराणस्यांपूर्वंदिशि असीनास्त्येव किन्तु गंगापूर्वकूलमपिक्षेत्रान्तर्गतमेव अतएव क्षेत्रमध्याद्यदागंगागमिष्यतिसरित्पतिं तेनसामहतीपुण्यापुरारुद्रभविष्यतीति ब्राह्मेब्रह्मवाक्यमपिसंगच्छते ॥ किंचआमध्याद्देवसरित आहरिश्चन्द्रमंडपात् आगंगाकेशवाच्चापि आस्वर्गान्मणिकर्णिकेतिमणिकर्णिकाप्रमाणमपिघटते तदेतदयुक्तम् वरणाचाप्यसिश्चैवद्वेनद्यौदेवनिर्म्मिते ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अंतरालेतयोः क्षेत्रंभूमावर्पिविशेन्नतत् ॥ इतिवाक्यपर्य्यालोचनयाऽसीवाह्यस्यवरणासी क्षेत्रत्वाभावेसिद्धे क्षेत्रमध्याद्यदागंगा गमिष्यतिसरित्पतिमितिवचनात् यद्यपिक्षेत्रमध्येगंगा प्रवाहइत्यापाततः प्रतीयते तथापिक्षेत्रमध्यपदं क्षेत्रस्यशीमामात्रपरं ग्राममध्येनगतइतिवत् एतदपिप्रायिकमेव आमध्यादित्यत्रचदेवसरित्पदं असीनदीपरमेव द्वेनद्यौसुरनिर्म्मित इत्यादिसंवादादन्यथा नदीवाराणसीचेयं पुण्यापापप्रणाशिनी क्षेत्रमेतदलं कृत्यजाह्नव्यासहसंगतेत्यसीवरणासंगमबोधकस्कन्दपुराणवचनविरोधःस्यात् वरणायुक्तासीति तद्विवरणात् अतएव मात्स्येपिवाराणसीजाह्नवीभ्यां संगमेलोकविश्रुते दत्वाब्वंचविधानेन सभूयोनाऽभिजायते ॥ स्कान्देपि नदीवाराणसीचेयं जाह्नव्यासहसंगता संगमेदेवनद्योश्चयः स्नात्वामनुजः शुचिरित्येतदपिघटतइतिदिक् ॥

इति महामहोपाध्याय केशवमिश्रविरचितं महामहोपाध्याय कल्याणमिश्र सुश्लिष्टं । द्वैतपरिशिष्टं समाप्तमितिशिवम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पृ०	पं०		पृ०	पं०	
१	१	व्यवहारनिर्णयः	३	१८	उत्तर लक्षणम्
३	३	पक्ष लक्षणम्	५	१२	सापदेश मिथ्योत्तरम्
४	१४	मिथ्योत्तरम्	६	८	प्रत्यवस्कन्दनम्
५	२०	कारणो त्तरम्	८	११	संकरो त्तरम्
८	३	प्राङ्न्यायो त्तरम्	१	१३	साक्षि संख्या
१०	१२	अथ साक्षिणः	२१	८	वादिशपथाधिकारः
२०	२०	साक्षिशपथाधिकारः	२४	१०	जयपत्र लक्षणम्
२३	१८	दिव्यप्रकरणम्	३२	१	चतुष्पाद्व्यवहारः
२५	१०	भोगः	३३	८	ऋणभाक्
३२	१५	कुसीद लक्षणम्	३८	२०	संसृष्टम्
३७	२१	पुत्रादायहराः	४३	१४	भ्रातवदने दोषाभावः
४१	१	धनग्राहिणः	४४	१	अशौचनिर्णयः
४३	१६	शपथकरणे दोषादोषौ	५४	८	देशान्तरलक्षणम्
५५	१	देशान्तरमृतस्यसद्यः	५७	११	अथ सापिण्ड्यम्
		शौचम्	६१	८	मातृसपिण्डा
६१	१२	चाण्डालादिस्पर्शेस्नानं	६२	२	असवर्णस्यपितुस्तर्पणम्
६२	७	तिलकुशयो रनावश्य	६२	११	प्रेताधिकारेपाकलवण-
		कतावश्यकते			भक्षणयोर्न्निषेधः
६३	१४	पिण्डदानम्	६४	३	पर्णनरदाहः
६६	५	स्त्रियारजोयोगेपि-	६७	१२	शिरोमुण्डनम्
		ण्डानदेयाः	६८	४	तीर्थश्राद्धम्
७१	१	प्रयागेवपनम्	७२	८	प्रातः स्नानम्
८१	१	सन्ध्यागर्जे व्रतनिषेधः	८४	७	अकालवृष्टिः
८५	५	उपनयनम्	८७	१५	गुरोर्महाती

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पृ०	पं०		पृ०	पं०	
९२	१०	उद्वाहेऽधिकारनिरू-	९७	३	अथ नामद्वैतम्
		पणम्	९९	१	दानहोमयागपदार्थः
९९	११	अप्रतिपत्तिकेदाने	१००	१५	वैश्वदेवहोमे
१००	८	होमसमिदा हुतिवि	१०१	१	गोदान विधिः
		चारः	१०४	२	तडाग विधिः
१०	१	कृष्णाजिन प्रदानम्	१२१	१२	सूक्तजपः
१२१	६	कुण्डनिरूपणम्	१२४	८	कृष्णाष्टमीव्रतम्
१२४	१७	एकादशी व्रतम्	१३०	१२	प्रथमस्यैव विवाह-
१३१	५	प्रमादतो हिरण्यनाभि-			स्य संस्काररूपता
		प्रायश्चित्तम्	१३२	९	विवाहे दानवाक्यम्
१३२	१६	शतभिषायां स्नाना-	१३३	१५	शौचविचारः
		नानिषेधः	१३४	१८	दन्तधावनम्
११६	९	स्नानम्	१४१	७	स्वखानितवाप्यादौस्व-
१४३	७	स्नानतर्पणे			स्नानविचारः
१४४	९	सन्ध्यावन्दनविधिः	१४५	१०	दर्भोच्चयः
१४५	१८	त्याज्यकुशाः	१४६	१६	पवित्रलक्षणम्
१४६	२१	हिरण्यादिभिरशून्यः-	१४७	६	जीवत्पितृकस्यापित-
		करः			र्पणेऽधिकारः
१४७	१८	समन्त्रकतर्पणम्	१५२	१८	जलेगायत्रीजपनिषेधः
१५४	४	जलेवस्त्रानिपीडनोद-	१५८	१९	देवपूजानित्या
		कदाननिषेधः	१५९	७	प्रथमंसूर्य्य पूजा
१५९	११	इष्टदेवता पूजानित्या	१६०	५	शिवपूजा उदङ्मु-
इति २		गायत्री जपप्रणवव्या-			नकार्या
ेपाद		हृतिसाहित्यम्	१७७	१५	भूस्वाम्यन्नदानम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पृ०	पं०		पृ०	पं०	
१६१	३	अथ नुष्यनिर्णयः	१६३	१८	अथ पंचमहायज्ञाः
१६८	१	भक्ष्याअपिमत्स्याःश्राद्धशेषाण्वभक्ष्याः	१६९	२	भोजनवि०
१६९	७	अगुल्यादंतकाष्ठंप्रत्यक्षलवणमृद्भक्षणंचनि०	१६९	१३	शूद्रस्यकापिलपयः पानंनिषिद्धम्
१६९	१८	मैथुनिनः स्नानवि०	१७०	१३	मांसभक्षणवि०
१७१	२	शरदिशुक्लपक्षेपार्वणम्	१७१	१४	यत्रपाकि श्राद्धम्वमन्ते
१७३	३	हेमतेनवान्नश्राद्धम्	१७६	२	सर्वत्रश्राद्धे दक्षिणामुखेनपादप्रक्षालनम्
१७६	९	भूगतजानुनापित्र्यंकर्मकार्यम्	१७६	११	श्राद्धे सेकसंकल्पयोर्वि०
१७६	१९	श्राद्धे गायत्रीजपवि०	१७७	१५	श्राद्धभूमिस्वामिनेऽग्रभागदानम्
१७९	२	नित्यश्राद्धलक्षणम्			
१८०	३	अर्घपात्रस्यकरेणाच्छादनंचित्यम्	१७९	१७	देशविशेषेद्रव्यविशेषवि०
			१८०	१४	अर्वदानवाक्यम्
१८०	१६	परिवेषणंदक्षिणहस्तेन-	१८१	१३	वाजसनेयिनामन्त्रविकिरणेविशेषः
१८१	१८	सव्येनगायत्र्यादिजपः			
१८४	६	श्राद्धे वेद्यामुल्लेखनंवामहस्तेन	१८३	८	शय्यादिदानवाक्येस्वर्गपदानन्तरंप्राप्तिपदंनदेयम्
१८५	४	श्राद्धे नीवीविस्रंसनाद्यनेकक्रियाविचारः	१८४	१४	करप्रोंछनम्
२०२	३	श्राद्धे पाकादिविचारः	२०२	१८	ग्रहणेतीर्थप्राप्तौचश्राद्धविचारः
२०५	४	श्राद्धेऽशौचपाते विचारः			
२०७	६	एकस्मिन्न हनिअनेकश्राद्धप्राप्तौक्रमविचारः	२०६	६	मलमासेश्राद्धकरण विचारः
२१३	१२	सम्वत्सराभ्यन्तरमलमासपातेसा सिककरणवचारः	२०८	१८	सपिण्डीकरणादूर्द्धं मृताहव्यतिरिक्ते दिनेपार्वणमेवकर्तव्यम्
			२१८	१	नीलवृषलक्षणम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पृ०	पं०		पृ०	पं०	
			२१८	८	वृषोत्सर्ग विचारः
२२४	१३	सपिण्डीकरण विचारः	२३५	१	मासिकेप्रारब्धे चतेमासिककरणविचारः
२३५	२६	नवश्राद्धाद्यन्न भक्षणेप्रायश्चित्तम्	२३७	८	सव्रणाद्यष्टौ श्राद्धे वर्ज्याः
			२३७	१४	सावनमासस्तुद्विधा
२३७	१४	कृत्रिमसुतेणपितृत्वेनैवनिर्द्देशः कर्त्तव्यः	२४१	१	एकोद्दिष्टानन्तरमेव बलिवैश्वदेव कर्म्मणीकार्य्यं
१४१	१०	नित्यश्राद्धं सपिण्डीकरणात्प्राक्कार्य्यम्	२४१	१४	वृद्धि श्राद्धं सपिण्डीकरणात्प्राक्नकार्य्यम्
२४१	१८	श्राद्धादौपशुघातोनदोषाय	२४७	१५	शूद्रस्योच्छिष्टभोजनवि
२४८	७	पार्वणादौसंकल्पकरणविचारः	२५२	८	स्वरितजितःकृतिसूत्रार्थ
२५४	१	पितृपक्षश्राद्धविचारः	२५७	९	गजच्छाया
२६३	७	अथाभ्युदयिककालाः	२६६	६	स्वपितृभ्यः पितादद्यादितद्वचनार्थः
२६२	१५	अथ श्राद्धाधिकारिणः			
२७३	४	औरसपुत्रेण श्राद्धकरणविचारः	२८७	१	हरिशयनैकादशी
			२८८	१८	कालविशेषेनद्यांस्नानविचारः
२८९	१३	तिथिवेधेनिर्णयः			
२९४	१२	विजयदशमी विचारः	२९४	१७	आश्विनपूर्णिमाकृत्यम्
२९५	१४	माघशुक्लसप्तमीकृत्यम्	२९६	४	अथमन्वन्तरादयः
			२९७	११	अथ रविसंक्रान्तिः
३०१	४	अथ ग्रहणम्	३०३	९	चूडामणियोगः
३०६	१९	पतिव्रताधर्माः	३०८	२	देवीभागवतमेत्र पुराणम्
३०८	११	काशीस्थितिः			

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection